ष्ट्यमिति रीत्या बोधे व्याप्तिरिष्टेष्टव्या दण्डवानित्यादौ तु दण्डत्वविशिष्टवैशिष्ट्यबोधे दण्डत्वप्रकारकधीत्वेन हेतुत्वमतत्र
धर्मितावच्छेदकामिश्रितस्य संशयस्याप्रसिद्ध्या निश्चयत्वस्याप्रवेशात् दण्डो रक्तो न वेति संशयानुव्यवसायश्च न रक्तत्ववि राम०
ष्टदण्डोपत्त्वावगाही किं तु रक्तत्वरक्तत्वाभावप्रकारकदण्डधर्मिकज्ञानवत्त्वावगाही विशेष्ये विशेषणमिति रीत्या वा रक्तदण्डज्ञा १७
नवत्त्वावगाहीति न तत्र व्यभिचारः

विशिष्टविषयोपधानेनेति तृतीयाप्रकारे घटमिच्छामीत्यादौ घटत्वविशिष्टविषयित्वरूपस्यैव तदुपधानस्येच्छादौ प्रकारत्वादिति
प्रतियोगित्वाभाववत्त्ववद्विषयित्वप्रकारकतादेरनुपस्थितस्यैव प्रकारत्वाभ्युपगमात् तथा च विषयितापि निरूपितत्वसंबन्धेन घ
टत्वविशिष्टवैशिष्ट्यावगाहिता दृशेच्छादिसाक्षात्कारे व्यभिचारान्न ज्ञानत्वं तादृशकारणतावच्छेदकमिति भावः अविनश्यदव
स्थत्वज्ञानादिच्छाद्वेषयोः साक्षात्कारः संभवतीति विनश्यदवस्थज्ञानजनितयोरिच्छाद्वेषयोश्च साक्षात्कारो नाभ्युपेयत इत्यरुचे
राह कृतेश्चेति साक्षात्कारोत्पत्तिक्षणे तत्त्वांशे निर्विकल्पकरूपः कृतित्वांशे सविकल्पकस्य विषयांशे सविकल्पककृतित्वांशे नि

ज्ञानोपरमेऽपि विशिष्टविषयोपधानेनेच्छाद्वेषयोः कृतेश्च साक्षात्काराद्विशेषण
विषयकाद्विशिष्टसंस्काराद्वा विशिष्टस्मरणाच्च

र्विकल्पकत्वसंभवादिति न च कृतिसाक्षात्कारात्पूर्वं प्रत्यासत्त्यर्थं विषयस्मृतेरावश्यकतायां कथं व्यभिचार इति वाच्यम्
सविषयसप्रकारके तेनैव संस्कारादिसाधारण्येन प्रत्यासत्तित्वादिति ननु तत्र विशिष्टबुद्धिं प्रति तत्र विशेषणधीत्वेन हेतुत्वात्कृ
तिसाक्षात्कारस्य विशेषणधीनियमितविषयस्मृतेरवश्यकत्वे कथं व्यभिचार इत्यत आह तत्रापि ज्ञानतत्स्याप्रवेशं दर्शयति वि
शेषणविषयकादिति इदं च विशिष्टज्ञानस्य कारणतावच्छेदकप्रदर्शनाय विशेषणविषयकत्वेनैव तत्र हेतुत्वाद्विशेषण
विषयकसंस्कारेण न विशिष्टस्मृतिः समानविषयकसमानप्रकारकत्वेनैव संस्कारस्मृत्योः कार्यकारणभावादत एव

[illegible]

तद्विषयकगुणानाम् तादृशविशिष्टविषयकगुणानाम् तत्तत्तादृशविशिष्टवैशिष्ट्यबोधे अत्र च गुणानामिति स्वरूपप्रदर्शनमात्रम् विशेषणतावच्छेदकप्रकारकसंशयान्यत्वेन प्रकारकतया विशेषणतावच्छेदकवत्संशयान्यत्वेन वा हेतुतेति ध्येयम् न च रक्तदंडांशे दृढसंस्कारवतः पुरुषांशे लौकिकसंनिकर्षवतो रक्तदंडवान् पुरुष इति विशिष्टवैशिष्ट्यबोधापत्तिः ज्ञानस्य प्रत्यासत्तित्वे परिरक्तो दंडो न वेति संशयदशायां तादृशानुद्बुद्धसंस्कारसत्वात्तादृशबोधापत्तिः एवं रक्तदंडांशे लौकिकसंनिकर्षदशायामपीति वाच्यम् तत्र तत्र तत्तद्व्यक्तिविशेषप्रतितत्तदुद्बोधकानामपि तत्तद्व्यक्तित्वेन हेतुत्वात् उत्पत्तावपि तत्तदुद्बोधकव्यक्तिविशेषाणां स्मृतिविशेषहेतुत्वस्यावश्यकत्वे संस्कारप्रयोज्यतादृशविशिष्टवैशिष्ट्यबोधात् पूर्वं स्मृतिव्यक्तिविशेषकल्पनाया एव गौरवपराहतत्वात् न च पत्रपुरुषसंनिकर्षदशायामुद्बोधकसमवधाने किं तु तदभावदशायामुद्बोधकसमवधानेन स्मृतिस्तत्र तादृशोद्बोधकस्य प्रत्यक्षव्यक्तिं प्रति

तद्विषयकगुणानां तत्र हेतुत्वेन नन्वनवच्छिन्नत्वे निवेशात् इच्छादितः संस्काराद्यानुमितेस्तु दृश्यात्संस्काराद्यन्यत्वस्य गुरुत्वात् यात्वत्तानत्वेनैव हेतुत्वात्

अपि हेतुत्वकल्पने गौरवम् अकल्पने च पुरुषसंनिकर्षदशायां रक्तदंडगोचरानुद्बुद्धसंस्कारसत्वात्तादृशप्रत्यक्षापत्तिरिति वा च्यम् तत्र पुरुषसंनिकर्षदशायामेव तादृशसंस्कारोद्बोधकसमवधानेन तादृशविशिष्टवैशिष्ट्यप्रसंगे जनितत्वात्तादृशसंनिकर्षाभावकाले स्मृतिवारणाय तादृशोद्बोधकव्यक्तेः स्मृतिहेतुत्वकल्पनाया भावनायामपि तुल्यत्वादिति अत एव तत्र संस्कार एव प्रत्यभिज्ञाहेतुरिति प्राचीनाः मणिकारमतेतु प्रतिबंधकाभावे सति चोद्बुद्धसंस्कार एव स्वयं स्मृतिरिति तत्र स्मृतिरेव प्रत्यभिज्ञाहेतुरिति न च संभवो नुमितावपि ज्ञानत्वस्य हेतुतावच्छेदकः प्रवेशादत आह इच्छादितइति नन्विच्छादितोप्यनुमितिरूपस्य घतस्य वस्तुतो ह्यानेभविरानुमित्यभावस्य निर्णीतुमशक्यत्वादत आह संस्काराद्येति अत्र च स्थूलकालीनतभाविनानुमित्यभावः सुनिश्चि

विषयत्वेनेति अत्रेदं पश्यामीत्यनुव्यवसायसाक्षिको लौकिकत्वनियामको विषयताविशेष एव कार्यताकारणतयोरवच्छेदकः पद्मा वान्तु अथ चंदनमित्यादौ सौरभं न पश्यामीति धीः अत एव कुसुमांजलिप्रकाशे साक्षात्कारत्वावच्छिन्नविषयताघटितमेव लौकिकप्रत्यक्षलक्षणमुक्तं वर्द्धमानोपाध्यायैः तत्र तादृशविषयतया प्रत्यक्षत्वं कारणतावच्छेदकं तेन न प्रमाणवादिसाधारणतादृशविषयतावत्प्रत्यक्षत्वं कार्यतावच्छेदकम् तेन विषयाजन्य सर्वांशोपनीतभानव्यावृत्तिः न च सर्वांशोपनीतभानाप्रसिद्धिः पुर्वं त्रात्म प्रत्यक्षसामग्रीसत्वादिति वाच्यम् कामिनीजिज्ञासावशादात्माद्यविषयकत्वस्य संभवात् तादृशप्रत्यक्षस्य च तादृशविषयतासंबंधेन कार्यता तादृशविषयस्य च नादात्म्य महेतुता तेन व्यभिचारः तत्प्रत्यक्षेतद्विषयकप्रत्यक्षे अत्र चावश्यमुपेयविषे

न च परामर्शानुव्यवसायेति व्याप्तिः सामान्यतः प्रत्यक्षे विषयत्वेन तत्प्रत्यक्षेतत्त्वेन कदाचिज्ज्ञानादिप्रत्यक्षे ज्ञानत्वादिना तद्धेतुत्वमनुयायिनेव तत्रादितरत्वादिविषयनिष्ठो धर्मस्तेन तद्विषयकत्वेन च कार्यकारणभावो मैत्रा च लोकितचैत्र मिनीत्वेन एव तद्विषयकत्वादिना तत्वेऽनंतकार्यकारणभावप्रसंगान्मानाभावादन्यथोपपत्तेश्च ॥ ॥

षकार्यकारणभावेनैवातिप्रसंगभंगे ज्ञानप्रत्यक्षे ज्ञानत्वादिना हेतुत्वकल्पनमेव प्रामाणिकमित्याशयेनाह कदाचिदिति तत्रादितरत्वादिरिति इच्छात्वस्य उक्तप्रमाणशास्त्वप्रत्ययः प्रमेकान्वयीतेन तत्वतदितरत्वादिरित्यर्थः तेन तत्तदितरत्वादिना विषयस्य कारणतातद्विषयकत्वेन तत्तदितरत्वादिधर्मवद्विषयकत्वेन प्रत्यक्षस्य कार्यता तथा च व्याप्तिप्रकारकपक्षधर्मताविषयकसेदयान्यज्ञानत्वेन तादृशतद्विषयकप्रत्यक्षत्वेन न कार्यकारणभाव इति भावः परामर्शत्वघटकदलचतुष्टयसाम्यप्रदर्शनाय मैत्रावलोकितेत्यादि चतुष्टं नीलेतरघटत्वद्विषयकत्वादिनेत्यत्रापि इच्छात्मस्य सत्वप्रत्ययस्य घटेनापि संबंधः ननु प्रामाणिकत्वगौरवं नदोषायेत्यत आह मानाभावादिति

चिं·शि·भ·
१९

विशिष्टस्मरणादिति व्याप्तिप्रकारकपक्षधर्मतास्मरणादित्यर्थः यद्यप्यप्रामाण्यज्ञानास्कंदितेनापि स्मृतिजननान्तदनास्कंदितत्वेन स्मृतिजनकता
वच्छेदकम् परामर्शस्यानुमितिजनकतायांतुतदवच्छेदकमेवेति नातिव्याप्तिसंभावनातथापि तज्ज्ञानीयाप्रामाण्यज्ञानाभावस्य सर्व
त्रनिश्चयकारणतावच्छेदकत्वे विनिगमनाविरहेण स्वातंत्र्येणहेतुत्वस्यैवोचितत्वमित्याशयात् अप्रामाण्यपक्षेमतं प्रामाण्या
भावश्चनचैवमेकस्मिन्ज्ञानेऽप्रामाण्यज्ञानेसति प्रतिबंधकसत्वात्तदनास्कंदितज्ञानांतरादपि नानुमितिः स्यात् इष्टत्वात् अतएवाप्रा
माण्यज्ञानानामननुगमेपि न क्षतिः यादृशाप्रामाण्यज्ञानसत्वेपरामर्शसत्वेनानुमितिस्तादृशज्ञानाभावकूटस्यैवहेतुत्वात् अ
न्यथातत्तुल्ययोगप्रामाण्यज्ञानाविषयपरामर्शत्वादिना हेतुत्वेऽनंतकारणभावकल्पनायां तात्प्रमेयज्ञानमप्रमेत्यप्रामाण्य

अथविशिष्टस्मरणेतिव्याप्तिः नचेपिक्षान्यत्वेनतत्रहेतुत्वम् उपेक्षात्वंहिनजातिः चाक्षुषत्वादिजातिसंकरप्रसंगात्
आंशिकात्वोपगमाच्चनापिप्रवृत्तिनिवृत्यजनकत्वम् अजिज्ञासितविषयकत्वंवा तादृशादपिस्मृत्युत्पादात् ॥

ज्ञानाविषयपरामर्शत्वादिना हेतुत्वेऽनंतकार्यकारणभावकल्पनापातात् प्रमेयज्ञानमप्रमेत्यप्रामाण्यधीसत्वेऽनुमित्यनुदयप्र
संगाच्च यत्रविषयविशेषपरामर्शेप्रामाण्यज्ञानाभावस्तत्र अभिप्रायेणेदमित्यपिकश्चित् यत्तुपेक्षात्वंचेदेकं निर्वक्तुंशक्यतेतदातद
न्यत्वेन हेतुत्वंवक्तुंयुज्यत इत्यतस्तदेवदूषयतिउपेक्षात्वमिति संकरेति जगन्नाथादिचाक्षुषेऽपेक्षात्वंविहायचाक्षुषत्वंचाक्षुष
त्वंविहायोपेक्षात्वंवा चादौवर्तमानमेस्त्यानंकिंचिदंशेऽपेक्षात्मकं किंचिदंशेउपेक्षात्मकं चानुभूयतेउपेक्षात्वस्यजातित्वेतन्नस्या
त् जातेरनांशिकत्वादितिभावः प्रवृत्तिनिवृत्यजनकस्यापिजिज्ञासितविषयस्यानुपेक्षात्वादाह अजिज्ञासितेतितद्विषयकजि

राम०
१९

संस्कारजनकत्वमनुपेक्षात्वमितिशेषः तज्जनकतावच्छेदकेति तज्जनकतावच्छेदकाप्रसिद्धेर्जनकताग्रहएवासंभवीजनकतावच्छेदकांत
रेचनास्तीतिभावः ननूपेक्षान्यत्वेनैवतद्ग्रहस्यतामनआह अन्योन्याश्रयादिति संस्कारजनकभिन्नत्वरूपउपेक्षात्वेज्ञातेपेक्षान्य
त्वेन संस्कारजनकत्वज्ञानंसंस्कारजनकत्वेन च ज्ञातेतु तदन्यत्वरूपमुपेक्षात्वं ज्ञातव्यमित्यन्योन्याश्रयादित्यर्थः रूपांतरापरिच
यादितिपाठे अन्योन्याश्रयादित्यत्रैवहेतुः रूपांतरमुपेक्षान्यत्वादतिरिक्तमूननुघटत्वप्रकारकैतद्घटविषयकज्ञानस्यता
दृशसंस्कारंप्रतिजनकत्वग्रहोस्तिनिजनकताग्रहीत्वातादृशसंस्कारजनकयावद्भेदकूटवत्त्वरूपमनुपेक्षात्वंसुग्रह मेव अतएवनांशिकत्व

नापिसंस्कारजनकत्वम् तज्जनकतावच्छेदकरूपांतरापरिचयात् अन्योन्याश्रयप्रसंगात् संस्कार
नुत्पत्त्यैवास्मरणसंभवेस्मृतिजनकतायांतदप्रवेशाच्च॥ ॥ ॥

क्षतिः एतद्घटांशेउपेक्षात्मकस्यापिज्ञानस्य यदादौघटांतरेवाऽपेक्षात्वसंभवात् नचघटत्वप्रकारकैतद्घटविशेष्यकसंस्कार
त्वावच्छिन्नंप्रतितत्तद्व्यक्तित्वेन प्रतिबंधकत्वंकल्प्यमतथासत्युपेक्षात्मकत्वाने विद्यमानेऽपेक्षात्मकज्ञानांतरादपितादृशसंस्का
रानुत्पत्त्यापत्तेः तथाचघटत्वप्रकारकैतद्घटविशेष्यकस्मृतिंप्रतिघटत्वप्रकारकैतद्घटविषयकसंस्कारजनकयावद्भेदकूटव
द्भिन्नत्वेनजनकत्वेनकोपिदोषइत्यतआह संस्कारानुत्पत्त्यैवेति अस्मरणसंभवेउपेक्षणीयास्मरणसंभवेन रप्रवेशोतउ
पेक्षान्यत्वाप्रवेशात्॥

नच स्मृतिं प्रत्येव तत्वेन हेतुत्वमस्तु संस्कारं प्रति तत्सामान्यरूपेणैव तदस्त्विति वाच्यम् तथा सति उपेक्षास्थले संस्कारव्यक्तेः स्वनाशस्य च क
ल्पनागौरवात् नचैवं तु स्वन्यायतया संस्काराननुत्पत्त्यैव संशयात्स्मृत्यनुत्पत्त्यनुत्पत्तिसंभवे स्मृतिजनकतायामपि निश्चयत्वप्रवेशाद् इति
वाच्यम् अतीतानां जनकत्वाद्यत्तद्रूपेण हेतुत्वसंभवात् तत्साधारणरूपेण कारणतायाश्च न्याय्यत्वादन्यथा ज्ञानत्वेनैव हेतुतास्तु संस्का
राभावादेव स्मृत्यभाववत्त्वस्यापि सुवचत्वात् नचैवं तु स्वन्यायतयोपेक्षान्यत्वस्यापि प्रवेश इति वाच्यम् उपेक्षात्वस्यानावच्छेदकरू
पस्य सर्वैर्दुःपरिच्छेदानयानदन्यत्वस्य दुर्ज्ञेयत्वात् तथाच इदंत्वावच्छेदेन घटत्वप्रकारकसंस्कारं स्मृतिं च प्रतीदंत्वावच्छेदेन
विरोधसंबंधेन घटत्वाभावाप्रकारकेदंत्वावच्छिन्नविशेष्यकघटत्वप्रकारकज्ञानत्वरूपं निश्चयत्वं जनकतावच्छेदकमतएव हृद्यं
घटो न वाऽयं घट इति समूहालंबनस्यायं घटो घटत्वाभाववांश्चेति समुच्चयस्यापि संग्रहः संशयस्थले तद्रूपजनकतावच्छेद
काभावान्नादृशसंस्कारस्य स्मृतेश्चानुत्पाद इति यत्तु स्मृतिं प्रत्येवोक्तरूपेण हेतुता संस्कारं प्रति त्विदंत्वावच्छेदेन घटत्वप्रकारक
धीत्वेनैव हेतुता अन्यथायं घटो न वेति संशयानंतरं केवलधर्मिस्मरणानुपपत्तिः तथाच संशयस्थले इदंत्वावच्छेदेन घटत्वप्रका
रकसंस्कारसत्त्वात्तथास्मृतिवारणाय तज्जनकतायां निश्चयत्वं निवेश्यत इति तन्न धर्मिस्मरणान्यथानुपपत्त्या धर्मितावच्छेदकप्रका
रेण धर्मिविषयत्वेपि संस्कारस्य धर्मितावच्छेदकावच्छेदेन घटत्वप्रकारकत्वकल्पने मानाभावात् अन्यथा संस्कारएव निश्चयत्वेन
हेतुतास्तु स्मृतौ तु ज्ञानत्वेनैवेति किं न स्यात् शुद्धधर्मितावच्छेदकप्रकारकसंस्कारं प्रति शुद्धधर्मितावच्छेदकप्रकारकज्ञानत्वेनैव पृथगेव
हेतुतायाः सर्वसम्मतत्वेनैव धर्मिस्मृत्युपपादनात् नचैवमयं घटो न वेति संशयात्केवलधर्मिण इव केवलघटस्यापि स्मरणापत्तिस्त

रक घटत्वप्रकारकज्ञानानुरोधेन घटत्वप्रकारकज्ञानत्वेन सप्रकारकजन्यज्ञानत्वेन वा पृथगेव हेतुताया अवश्यं वाच्यत्वादिति वाच्यम् इ
ष्टत्वात् यद्यपि संस्कारस्याफलैकविषयकत्वे मानाभावः स्मृतित्वेन संस्कारत्वेनैव कार्यकारणभावः संस्कारत्वावच्छिन्नं प्रति तो
नत्वेन सप्रकारकजन्यज्ञानत्वेनैव वा हेतुत्वात् उपेक्षाव्यावृत्तये तत्तद्व्यक्तित्वेन हेतुत्वस्यापि समप्यावरणीयत्वाच्चातिप्रसंगो न इदं
त्वावच्छेदेन घटत्वप्रकारकस्मृतिं प्रतीदंत्वावच्छेदेन घटत्वाभावाप्रकारकेदंत्वावच्छिन्नघटत्वप्रकारकज्ञानत्वेन संस्कारद्वारा हे
तुता च नातिप्रसंगः व्यापारव्यापारिणोरेकमेव जन्यतावच्छेदकमिति तत्र मानाभावात् केवलघटत्वादिप्रकारकस्मृतिं प्रति घटत्वा
दिप्रकारकधीत्वेन हेतुत्वम् न तु तत्र निश्चयत्वस्यापि निवेश इत्युभयमिदमेव न च ज्ञानत्वेन स्मृतित्वेनैव कार्यकारणभावोस्तु सं
स्कारस्येदंत्वावच्छेदेनेत्युक्तरूपेण हेतुताच्च नातिप्रसंग इत्येव किं न स्यादिति वाच्यम् संस्कारस्य सविषयकत्वासिद्धेः ज्ञाने सविष
यकत्वस्यानुव्यवसायेनैव ग्रहादिति तत्र घटपटसमूहालंबनस्य पटांशे उपेक्षात्मकस्य घटांशेऽनुपेक्षात्मकस्य तज्जन्यसंस्कार
संबंधेन सत्त्वात् स्मरणापत्तेः नच तदुद्बोधकाभावाद् स्मरणमपि स्यात् संस्काराणामनंतरं यत्र सदृशविलक्षणवस्तुभानानंतरमेवाव
श्यं पूर्वस्मृतिस्तत्र तत्सुरुह्यापदस्मृतिं प्रति तादृशवस्तुज्ञानत्वेनैव हेतुत्वेन उद्बोधकाभावस्यासंभवात् एवमेकस्मिन् घटे घटत्व
द्रव्यत्वोभयप्रकारकज्ञानाद् घटत्वांशे उपेक्षात्मका द्रव्यत्वांशेऽनुपेक्षात्मका द्रव्यत्वप्रकारकस्मृत्यापत्तिवारणाय संस्कारस्य
प्रकारकताकल्पनीयेति एवं चोक्तस्थलेऽतिप्रसंगवारणाय संस्कारस्य तत्तत्प्रकारकत्वतन्निष्ठविशेष्यत्वादिरूपेण जनकत्वस्याव
श्यकत्वे ज्ञानत्वेन स्मृतित्वेनैव कार्यकारणभावः कल्प्यते न तु विशेषरूपेणापि प्रयोजनाभावादिति तु पुरुक्तः पन्थाः ॥

तथात्वम् स्मृतिजनकत्वम् सकृदिति असकृदनुभवे चैकसंस्कारांतरं संभवतीति भावः ननु संस्कारस्य फलनाश्यत्वे न प्रथमस्मरणेनैव
समूहालंबनसंस्कारस्य नाशात् तदनंतरं तद्विषयांतरस्मरणानुपपत्तिरत आह समानाकारस्येति घटत्वप्रकारकसंस्कारं प्रति घ
टत्वप्रकारकस्मृतित्वेन पटत्वप्रकारकसंस्कारं प्रति पटत्वप्रकारकस्मृतित्वेन नाशकत्वकल्पनात् घटत्वप्रकारकस्मृतिसत्वेपि
पटत्वप्रकारकस्मृत्यभावात्तदुभयप्रकारकसंस्कारस्यानाशादित्यर्थः अत्र च स्मृतिजन्यसंस्कारस्य क्षणिकत्वापत्तिवारणाय
तत्तत्स्मृतिजनकत्वं तत्र स्मृतिनाश्यतायामवच्छेदकमिति बोध्यम् समूहालंबनादौ त्वादिने कधर्मिविशेष्यकानेकप्रकारकज्ञा
नासंग्रहः ननु पाक्षिकमेव स्मरणं न तु समूहालंबनात्मकं तथा तादृशसंस्कारस्यानाशाय तत्काला दैरेव नाशकत्वं कल्प्य
म् तथा च फलनाश्यत्वे व्यभिचारः तत्र च्छक्तित्वेन नाशकत्वकल्पने च सकृदनुभूतस्थलेपि चरमफलमेव नाशकमस्तु वस्तु
तस्तु कालादेरेव तत्तच्छक्तित्वेन नाशकत्वमनन्यगतिकत्वात् स्मृतौ तु संस्कारनाशकतावच्छेदकत्वे नैकाजातिरेव चरमफलमा
नाप्यनुभवत्वेन तथात्वम् संस्कारस्य फलनाश्यतया सकृदनुभूतस्य स्मरणोत्तरस्मरणप्रसंगात् समानाकारस्यैव च फल
स्य नाशकत्वात् समूहालंबनादितो नैकैकगोचरक्रमिकस्मरणानुपपत्तिः जायते च पुनः पुनः स्मरणात् दृढतरः संस्कारः
नहि विस्मृतित्वव्याप्याकल्पनेन तथाचोपधायकता संबंधेन विजातीयस्मृतिविशिष्टसंस्कारनाशं प्रति विजातीयस्मृतित्वेन हेतुता अत एव विजा
तीयस्मृतिजन्यसंस्कारस्य कालांतरे विजातीयस्मृत्युपधायकस्यापि न क्षणिकता तदानीं तस्य तदुपधायकत्वाभावेन न तद्विशिष्टताभावात् अत
एवात्र नाश्यतायां स्मृतिजनकत्वमपि न प्रवेश्यमिति तत्कस्यैवानतिप्रसक्तत्वादत आह जायते चेति अभिहितं भवति स्मरणादिना कार्ये
णानुमितो दृढतरत्वनामा संस्कारः विजातीयविशेषः तदवच्छिन्ने चान्वयव्यतिरेकाभ्यां पुनः पुनः स्मरणमेव कारणम् तत्र पूर्वपूर्वस्मरणे

नन्वेकस्यैव संस्कारस्य पुनः पुनः स्मृतिजननानंतरं भवतीत्युद्बोधकसमवधानमेव दार्ढ्यम् तावतैव झटिति स्मरणसंभवात् तथा च तादृशजातौ मा
नाभाव इत्यत आह परित्यज्य चेति अनुभवं विनापि स्मृतितः संस्कारसंभावनायाः सत्वादनुभवत्वे संदिग्धव्यभिचारकम् ज्ञानं विना संस्कार
संभावनाविरहात् ज्ञानत्वं निश्चितव्यभिचारकमिति व्यभिचारज्ञानरूपप्रतिबंधकाभावात् तदवच्छेदेनैव हेतुता निश्चीयत इति भावः इदमेव नि
श्चिताव्यभिचारकम् ~~ज्ञानं विना संस्कारसंभावनाविरहात् ज्ञानत्वं निश्चिताव्यभि~~ ज्ञत्वमेव हेतुतावच्छेदकत्वयोग्यं कार्यतावच्छेदकं तु विशेषरूप
मेव निश्चिताव्यभिचारकत्वात् न तु संदिग्धव्यभिचारकं सामान्यरूपम् अत एव विशेषणधीजन्यतावच्छेदकं विशिष्टानुभवत्वमित्युपाध्या
याः न चाप सिद्धं तदित्याह अभिहितं चेति तत्र पूर्वपूर्ववर्णस्मृतिसहितांत्यवर्णानुभवस्य पदप्रत्यक्षे हेतुरित्याक्षिपेत्स्मृतीनामित्यादि
परित्यज्य च निश्चिताव्यभिचारकं रूपं शृंखमाणाव्यभिचारके कारणत्वकल्पनानुदयात् इदमेव चान्यत्र सामान्यस्य हेतुतावच्छेद
कत्वे बीजम् अभिहितं चैतात्पर्यनिबंधनीकायां प्रथमसूत्रे अवयवविवेचनप्रस्तावे वाचस्पतिमिश्रैः स्मृतीनां त्वकार्यसंस्का
रविरोधिनीनाम सहभावादिति चिन्त्य चरमज्ञानपदस्यानुभावपरत्वा
समाधानफक्किकास्वकार्योपः संस्कारस्तत्कृतो यो विरोधो विनाशस्तद्वतीनामित्यर्थः अनुभवपरत्वादिति केचित्तु यत्रैकस्मिन्नेव घटे
ऽयं घट इति प्रत्यक्षानंतरं दिवसादिविलंबेनायं घट इत्यनुमित्यादिकमुत्पन्नं तत्र तादृशसंस्कारं स्मृतिं च प्रति निश्चयत्वेन हेतुत्वविव
क्षणेपि तादृशनिश्चयद्वयजन्यसंस्कारद्वयसत्वात्तच्छयात्मकस्मृत्यापत्तिरतस्तथाविधस्मृतिवारणायेदंत्वावच्छेदेन घटत्वप्रका
रकस्मृतिं प्रतीदंत्वावच्छेदेन घटत्वाभावप्रकारकस्मृतिसामग्र्या एवं तादृशघटत्वाभावप्रकारकस्मृतिं प्रति तादृशघटत्वप्रकारक
स्मृतिसामग्र्याः प्रतिबंधकत्वमवश्यं वाच्यम् तथा च स्मृतिजनकतायां संस्कारजनकतायां च निश्चयत्वाप्रवेशेपि न क्षतिः न च नेत्रा

वि॰शि॰ ४
२२

साक्षात्तज्जन्यत्वं स्वाव्यवहितप्राक्कालवृत्तित्वसंबन्धेन ताहृशपरामर्शजन्यत्वं तेन सिद्ध्यादिनाशकालीनेन विशेषणज्ञानतया परामर्श
जन्येन धूमवति वह्निप्रत्यक्षेणाननितायामनुमितौ नाव्याप्तिः कस्याश्चित्तस्यैतेः स्वाव्यवहितप्राक्कालवृत्तिपरामर्शजन्यत्वसंभवे पि तत्र सं
भवे पि तत्र संस्कारस्य प्रसक्तिसत्त्वे न तु ताहृशप्राक्कालवृत्तित्वमिति नातिप्रसंगः अत्रानुभवत्वापेक्षया गौरवमस्वरसः प्रकारान्तरेण
पि स्मरणातिव्याप्तिवारणप्रकारो दर्शयति किञ्चेति तदुभयवैशिष्ट्येति व्याप्तिप्रकारेण धूमे पर्वतनिरूपिताधेयतायाः पर्वतत्वरूपेण
पर्वतव्याप्यनिरूपिताधारतायाः अवगाहित्वं च मूलेन प्रमेयमिति ज्ञानस्य व्याप्यपर्वते इत्यादेश्च वारणम् आधेयत्वाधारत्वयोश्च
समानसंवित्संवेद्यत्वाद्दोषः व्याप्तिप्रकारेण धूमे पर्वताधेयत्वावगाहित्वस्य पर्वतत्वरूपेण पर्वते वह्निव्याप्याधारत्वावगाहित्वस्य

साक्षात्तज्जन्यत्वस्य विवक्षितत्वादित्यपि कश्चित् किंच व्याप्यविशेष्यकात्पक्षविशेष्यकाच्च परामर्शादनुमितिदर्शनान्न उभयवै
शिष्ट्यावगाहिनिश्चयत्वेन तत्र हेतुत्वम् लक्षणघटकमपि तदेव एकतरविशेष्यकज्ञानादन्यतरविशेष्यकस्मरणाभावात् अ
न्यथाऽनियमेनैकस्मात्तदुभयविशेष्यकत्वप्रसंगात्

चास्मत एव वा हेतुतावच्छेदकं लक्षणघटकमपीति अन्यथाऽसंभवापातात् तदेव ताहृशोभयवैशिष्ट्यावगाहिनिश्चयत्वावच्छिन्नहेतु
त्वमेव न तु स्मृतावपुक्तरूपेण कुतो न हेतुताः तत्राह एकतरेति पर्वते वह्निव्याप्य इति ज्ञानात्पर्वतो वह्निव्याप्यवानित्यस्मरणादित्यर्थः
अन्यथा अनुमिताविव स्मृतावप्युभयवैशिष्ट्यावगाहित्वेनैव हेतुत्वे अनियमेन विशेष्यतानियामककार्यकारणभावरूपनियमविरहे
णस्यैकविशेष्यकस्मृतिसामग्र्या एवान्यविशेष्यकस्मृतिसामग्रीत्वात् नियमेन नियमतः उभयविशेष्यकतापत्तेरिति भावः ॥ ॥

राम॰
२२

ननु तत्प्रकारकतद्विशेष्यकस्मृतिं प्रति तत्प्रकारकतद्विशेष्यकधीत्वेन हेतुत्वम् अत एव स्मृतेर्नोभयविशेष्यकत्वम् एवमुभयवैशिष्ट्या
वगाहित्वेनापि सामान्येन हेतुतापद्विशेषयोरिति व्याप्यपास्त आह समानप्रकारकत्वेनैवेति तथा च ताहृशसामान्यहेतुतयैव यद्विशेष
योरिति व्याप्तेरुपस्थितार्थत्वान्न तद्व्याप्तिबलादुभयवैशिष्ट्यावगाहित्वेनैव हेतुत्वमिति भावः केचित्त्वेकतरविशेष्यकज्ञानादन्यतरविशेष्य
कस्मृतिस्वीकारे समानप्रकारत्वेन ज्ञानस्मरणयोः कार्यकारणभावभंगप्रसंग इत्याशयेनाह समानप्रकारकत्वेनैवेत्याचक्षुः त
च्चस्मृतौ विशिष्टवैतत्प्रकारकतद्विशेष्यकत्वादिनैव स्वकारणव्यवच्छेदमादन तक्तरूपेणेति तदुभयवैशिष्ट्यावगाहित्वेनेत्यर्थः एव
ञ्चोभयवैशिष्ट्यावगाहित्वेन हेतुत्वविवक्षणे च विशिष्टवैशिष्ट्यबोधादावित्यादिना ताहृशपदार्थोपस्थितिजन्यशाब्दबोध

समानप्रकारकत्वेनैव ज्ञानस्मरणयोः कार्यकारणभावाच्च तत्र विशिष्टैकवकार्यकारणभावेन तत्क्रूपेणायोग्यत्वान्मानाभावाच्च
एवं च विशिष्टवैशिष्ट्यबोधादौ क्वापि नातिप्रसक्तिः शंकापि वृक्षाद्यनुमितौ वक्ष्याद्यव्यभिचारधीविरोधिधी विषयधर्मप्रकारक
पक्षधर्मताज्ञानत्वेन हेतुतामते च नितरामलक्षणोपि तथैव निवेशात् ॥

परिग्रहः हेतुतामते चेत्यनेन पूर्वोक्तो स्वरसः सूचितः नितरामिति नातिव्याप्तिशंकापीत्यनेनान्वयः तत्र हेतुमाह तथैवेति ताहृशरूपाव
च्छिन्नहेतुत्वस्यैवेत्यर्थः पर्वते वह्निव्याप्य इत्यनुभवस्य पर्वतो वह्निव्याप्यवानिति स्मृतिसमानविषयकत्वे सत्त्वात् तत उत्पत्तिसंभाव
नयाऽतिव्याप्तिशंका कदाचित्स्यात् वह्न्यभावव्यापकाभावप्रतियोगि धूमवान् पर्वत इत्यनुभवस्य वह्निव्याप्यवान् पर्वत इति स्मृतिनि
न्नविषयकतया ततस्तदुत्पत्तेरसंभावितत्वेन स्मृतौ तेन रूपेण हेतुत्वस्यासंभवादतिव्याप्तिशंकास्पदमपि नेति भावः ॥

अतएवग्रन्थरूपेणा हेतुत्वस्य लक्षणे निवेशादेश व्याप्यवत्साध्यादीत्यादिना पक्षविशिष्टव्याप्यपरिग्रहः व्याप्यविशेष्यकपरामर्शस्य हेतुतावादिनये पर्वतो वह्निव्याप्य इति ज्ञानत्वेनैव हेतुत्वादिति भावः येषां मते विशिष्टवैशिष्ट्यबोधत्वावच्छिन्नं प्रति विशेषणतावच्छेदक प्रकारकनिश्चयत्वेन न हेतुत्वं तन्मतेऽप्यभावप्रत्यक्षे प्रतियोगितावच्छेदकप्रकारकप्रतियोगितावच्छेदकप्रकारकप्रतियोगिनिश्चयत्वेन हेतुत्वं वाच्यम् तथा चेतदादाय घटाभावप्रत्यक्षेऽतिव्याप्तिः स्यात्साऽपि प्रकृतविवक्षया न संभवतीति भावः हेतुत्वेऽपीत्यसिद्धा योग्यत्वस्य सत्त्वं च नापत्तीजं तु प्रतियोगिविधेयोजन्यतायां ज्ञानाभावप्रत्यक्षत्वमवच्छेदकं इदंत्वादिना तत्प्रत्यक्षे व्यभिचारात् तेनापि प्रतियोगितासंबंधेन सप्रकारकाभावप्रत्यक्षत्वं तद्व्यापकाभावत्वेन घटाभावप्रत्यक्षे घटत्वप्रकारकाद्यधियो व्यभिचारात् नापि घटत्वारूपेण ज्ञानं विशेषणीयम्

अतएव व्याप्यवत्पक्षाद्यभावग्रहेऽतिव्याप्यवत्पक्षादिज्ञानत्वेन हेतुत्वेऽपि न क्षतिः व्याप्यविषयकत्वेन वा जन्यं ज्ञानं विशेषणीयम् प्रतियोगितासंबंधेन घटप्रकारकाभावप्रत्यक्षत्वं तथा मानाभावात् वस्तुतस्तत्प्रतियोगिज्ञानाभावदशायां तत्सत्त्वेऽपि वाऽभावत्वावच्छेदे न घटीयत्वासंसर्गाग्रहेणेत्याकारकप्रत्ययप्रसंगः तथा च तत्र द्विद्वियसंबद्धविशेषणतायां घटत्वविशिष्टवैशिष्ट्यावगाह्यभावत्वप्रकारकप्रत्यक्षं पटत्वविशिष्टवैशिष्ट्यावगाह्यभावत्वप्रकारकप्रत्यक्षत्वमिदंत्वेनाभावप्रत्यक्षोपगमे चैतत्प्रकारकाभावप्रत्यक्षत्वं नानैककार्यतावच्छेदकम् अतएव विशेषे विशेषणमिति न्यायेनापि नाभावधीः अतएव शिविशिष्टवैशिष्ट्यबोधसामान्ये हेतोरन्यतरत्वेनैन पृथक्कार्यकारणभावकल्पनेति ध्येयम् अन्वाधारत्वाधेयत्वयोः समानसंवित्संवेद्यत्वे मानाभावात् दशान्यतरत्वं च गौरवादि बेजन्यकतावच्छेदकम तो वह्निव्याप्यवान् पर्वतः पर्वते वह्निव्याप्य इति ज्ञानयोः प्रातिस्विकरूपेणैव हेतुत्वं वाच्यम् तथा चातिप्रसंग इत्यत आह व्याप्यविषयकत्वेनेति ॥

एतेन व्याप्यविषयकत्वविवक्षणेन जन्यविशिष्टज्ञानत्वावच्छिन्नं प्रति विशेषणधियो हेतुत्वव्यवस्थापनेऽवश्याभ्युपेये विशेषणज्ञानस्यैव विशेषणतावच्छेदकप्रकारकत्वमतान्नाद्दश विशिष्टवैशिष्ट्यबोधत्वावच्छिन्नं प्रति विशेषणतावच्छेदकप्रकारकधियो हेतुत्वं ध्रुवं स्यादपि तस्याद्द्याशयेनैतच्चैव व्यभिचारो वा स्यादिति स्मृतिमित्यादिना केचित्तन्मतः क्वचिद्व्यापारतो जन्यविशिष्टज्ञानत्वावच्छिन्नं प्रति विशेषणज्ञानस्याव्यवहितपूर्ववृत्तित्वमित्यर्थः विशेषणधियो हेतुत्वस्येत्यादि विषमं तच्चतुष्पदस्य कल्पनादित्ययेतनेनान्वयः ननु संबंधभेदेन व्यापकताभेदान्नैकं हेतुत्वं संस्कारस्य व्यापारतापि न संभवति संस्कारस्य जनयित्वापि विशेषणज्ञानेन विशिष्टज्ञानजननादित आह निर्विकल्पकात्मकस्यापीति तथा च सर्वत्रैव विशेषणधियः साक्षाद्धेतुतामिति भावः ननु समानप्रकारकसमानविशेष्यकत्वेनैव स्मृतिप्रतिका

एतेन स्मृतिं प्रति संस्कारद्वारानुभवं प्रति च साक्षाद्विशेषणधियो हेतुत्वस्य निर्विकल्पकात्मकस्य वा स्मरणस्यानुभवं प्रत्येव वात स्याहेतुत्वस्य नियमतः स्मृति साक्षा[illegible]रएवं विषयस्मृतेश्च कल्पनाद्याप्यवत्पक्षवत्तादिज्ञानेऽतिव्याप्तिरित्यपि परास्तम् ॥

रणांतरस्य कार्यतावच्छेदकांतरस्य च क[illegible]नं गौरवपराहतमन च घटत्वांशेऽन्यप्रकारकघटत्वविषयकस्मृतिं प्रति तादृशघटत्वधीत्वेनैव संबंधविधया समवायविषयकस्मृतिं प्रति तादृशसमवायविषयकज्ञानत्वेन घटविषयकस्मृतिं प्रति घटधीत्वेन च कार्यकारणभावकल्पनाद्घटत्वप्रकारकघटविशेष्यकस्मृतित्वं न कार्यतावच्छेदकमतो निर्विकल्पकात्मकं स्मरणं नानुपपन्नमिति वाच्यम् एकस्य घटस्य घटत्वेन घटांतरस्य च द्रव्यत्वेनैव ग्रहे घटांतरविशेष्यकघटत्वप्रकारकस्मरणापत्तेरत आह अनुभवमिति तथा च विशेष्यानुभवत्वं तज्जन्यतावच्छेदकमिति न स्मृतौ व्यभिचार इति भावः तस्याः विशेषणधियः नियमतो विषयस्मृतेरिति अपेक्षाबुद्ध्यात्मकज्ञानेन च द्वित्वादिकं न जन्यत इत्याशयः ॥

चिं॰ दी॰ अ॰
२४

साध्यादेरित्यादिना यत्संहेतुहेतुतावच्छेदकसंबंधसाध्यतावच्छेदकसंबंधपरिग्रहः देवादित्तिस्तत्यां वन्हिव्याप्यानुमितीच्छापां वन्हिव्याप्यव्याप्यवान्
न्हिव्याप्यवांश्च पर्वत इत्याकारकपरामर्शो ज्ञातो यां पर्वतो वन्हिव्याप्यवान्वन्हिमांश्चेत्यनुमिता विनार्थः तस्मात् व्याप्तिप्रकारकपक्षधर्मतानिश्चय
जन्यायाम् सापि अव्याप्तिरपि अनुभवत्वव्याप्यत्वेन अनुभूतित्वेन तथानुभवनिष्ठभेदप्रतियोगितावच्छेदकत्वम् एवंच अनुभवत्वव्याप्यजातिमत्त्व
विवक्षणेच अनुभवत्वव्याप्यत्वापेक्ष्यालाघवार्थमाह पर्वतवन्हीति प्राग्युक्तोभयवैशिष्ट्यावगाहित्वस्य कारणतानवच्छेदकत्वादाह वन्हि
व्याप्यवत्पर्वतेति प्रतियोगिकोत्तरत्वं च कार्यतायां विशेषणं अवच्छेदकत्वमवच्छेदकताश्रयत्वेन तत्त्वच्छेदकतापर्याप्त्यधिकरणत्वमवच्छेदक
त्वाश्रयश्च ता दृशविशिष्टशरीरघटकपदार्थस्तोमएवतथा च पर्वतविधेयकवन्हिप्रकारकानुमितित्वस्यावच्छेदकत्वे वन्हित्वादेरपि तद्घट

साध्यादेरनुगमादेको पादानेऽन्यानुमितौ दोषाव्याप्तिविषयपि रणं च तस्यामव्याप्तिः प्रपञ्चयिष्यते सापि ता दृशज्ञानत्वमनुभवत्व
व्याप्यजातिमत्त्वभिन्नक्ष्यानिरूपणीया एतत्ता भावे वचानुभवार्थकं चरमज्ञानपदं मूएवं वान्वयव्यतिरेकव्याप्तोः पृथक्कार्य
जकत्वेपि न क्षतिः। पर्वतवन्हिव्याप्यवैशिष्ट्यावगाहिनिश्चयत्वावच्छिन्नकारणताप्रतियोगिककार्यतापावन्हिव्याप्यवत्पर्व
तनिश्चयत्वावच्छिन्नकारणताप्रतियोगिकव्याप्तिविषयकवृत्तिकार्यतायावा अवच्छेदिकात्वानुवृत्तिः सामानाधिकरण्ये
नावच्छेदिकावायाजातिस्तद्वत्त्वंवावो ध्यम् व्याप्तिभानेचश्चभासमानोपस्ताहृशानुमित्यविषयोर्थस्तद्विषयत्वंवाग्राह्यम्
कतपाततद्व्याप्तिव्याप्तिरतो ज्ञानहन्तिरितिज्ञानसमवेतस्यार्थः नन्वालोकलिंगकानुमितिव्याहृत्तस्यवन्हिव्याप्यधूमवान्पर्वत इत्येताहृशपरामर्शा
व्यवहितोत्तरताहृशवन्ह्यनुमितित्वस्य कार्यतावच्छेदकत्वेन तद्घटकज्ञानत्वमादाय ज्ञानमात्रेऽतिव्याप्तिरतआह सामानाधिकरण्येनेतिज्ञानत्वस्यका
र्यतासामानाधिकरण्यसत्त्वेपि सामानाधिकरण्येनैतत्स्यावच्छेदकत्वावगाहनादिति भावः व्याप्तिविषयकेत्यत्र संडाभावविशेषणपावे यथा
भावेपितदपेक्षपालाघवादित्याप्तिभानइतिव्याप्तिभानेवश्यंभासमानं साध्यमपीतितद्विषयकत्वोपादानेऽसंभव इत्यतस्ताहृशानुमित्यवि

ननु पर्वतो वन्हिमानित्यनुमितित्वावच्छिन्नं प्रतिपर्वतो वन्हिव्याप्यधूमवानितिपरामर्शत्वेन जनकतावन्हिव्याप्यैतद्रूपवान्पर्वत इतिज्ञानजन्येव्य
भिचारात्तन्नापि वन्हिव्याप्यधूमवान्पर्वत इतिपरामर्शाव्यवहितोत्तरता दृशानुमितित्वं कार्यतावच्छेदकम् अव्यवहितोत्तरत्वं हि ताहृशपराम
र्शाधिकरणकालध्वंसाधिकरणत्वे सति ताहृशपरामर्शध्वंसाधिकरणकालध्वंसानधिकरणत्वम् तच्चाप्रसिद्धम् कालमात्रस्यैव ताहृश
परामर्शाधिकरणकालध्वंसाधिकरणत्वात् अनादिसंसारेऽनंतानामेव ताहृशपरामर्शानां नाशात् तत्परामर्शव्यक्त्यधिकरणकाल
ध्वंसाधिकरणत्वे सति तत्परामर्शव्यक्तिध्वंसाधिकरणकालध्वंसानधिकरणत्वरूपेऽव्यवहितोत्तरत्वे कार्यतावच्छेदकस्य तत्तद्व्य
क्तिविश्रांतत्वात् तत्तद्व्यक्तित्वमेव तत्तद्व्यक्तित्वावच्छिन्नजन्यतावच्छेदकमतः परामर्शत्वस्यानुमितित्वस्य च कार्यकारणतयोरवच्छे
दकत्वे मानाभावः न च तत्तद्व्यवहितोत्तरत्वसंबंधेन सामानाधिकरण्यविशेषितेन परामर्शवदनुमितित्वमेव तयो ताहृशानेकपदार्थ
घटिताव्यवहितोत्तरत्वस्य संबंधत्वे मानाभावात् नचैककालावच्छेदेनैकात्मवृत्तित्वप्रत्यासत्त्या परामर्शविशिष्टानुमितित्वं तथा॰ क्ष
णद्वयात्मकः कालो धर्मियोनोन्नविनुश्यद्वस्यपरामर्शजन्यानुमित्यसंग्रह इति वाच्यम् एतद्दूपलिंगकवन्ह्यनुमितिहितीयक्ष
णततीयक्षणे वा धूमपरामर्शोत्पादे तादृशानुमितावपि तेन संबंधेन धूमपरामर्शवदनुमितित्वसत्त्वेन तत्र धूमपरामर्शस्य हेतुत्वे
नव्यभिचारात् स्वप्रागभावाधिकरणक्षणवृत्तिपरामर्शाधिकरणक्षणपाद्यावच्छेदेनैकात्मवृत्तित्वस्य च संबंधत्वे मानाभाव इत्य
स्वरसान्मूलोक्तलक्षणमुपेक्ष्य लक्षणांतरमाह यां कांचिदिति केचित्तु पत्रविषयविशेषे एकेनव्याप्येनैव व्यापकस्यानुमितपक्ष
त्वतद्व्याप्यविशिष्टताहृशपक्षज्ञानत्वेन तत्सत्त्वकताहृशविषयविशेषानुमितित्वेन कार्यकारणभावे बाधकाभावात् तदनुमितिमात्र
यजातिवृत्तित्वं मूलोक्तलक्षणमनाकुलमित्याहुः लिंगोपहितलैंगिकभानपक्षे वन्हिव्याप्यधूमवान्पर्वत इतिपरामर्शस्य वन्हि

कारकानुमितेः स्वीकारात्लिंगानुपधानपक्षेपि पर्वतो वह्निमानित्यनुमितित्वेन कार्यतावन्हिव्याप्यधूमवानयं पर्वत इति परामर्शत्वेन जनक
नतावन्हिमान्पर्वत इत्यनुमितेश्च धूमलिंगकतत्तदनुमितिस्वरूपविषयतैव कार्यतावच्छेदकसंबंधः अव्यवहितोत्तरत्वापेक्षपात्तदुत्वात्तस्य
रूपस्य संबंधत्वेन लक्ष्मत्वाच्च अत आलोकादिलिंगकानुमितौ न व्यभिचारः एवमालोकादिलिंगकानुमितावपीत्यपि वदंति मानसत्वव्या
प्यजातिविशेष एव परामर्शे वह्निमदनुमितिश्च समानतन्त्रवादनुमितौ तत्पर्वतत्वमनुमितित्वावच्छिन्नजनकतावच्छेदकमिति कश्चित्त
न्न केचिद्वपक्षे किंचिदेव साध्यमनुमितिविषयो नापरस्तत्र नियामकाभावेन वन्हिव्याप्यधूमवानयं पर्वत इति परामर्शात् घटमनुमिनोमीत्यनुव्यवसायव
दपि वह्न्यनुमितिप्रसंगात् न च घटानुमितौ तत्परामर्शः कारणं तादृशपरामर्शे घटस्यापि विषयत्वसंभवात्तदनुमितौ तद्व्याप्यवत्त्वज्ञान
त्वेन विशिष्य हेतुत्वकल्पने च किं परामर्शत्वेन जात्या न चानुमितित्वावच्छिन्नस्याकस्मिकतापत्तिः ज्ञानत्वेनैव तद्व्यक्तित्वं प्रति हेतुत्वस्यसु

यांकांचिदनुमितिव्यक्तिमादाय तद्व्यक्तिसमवेतानुभवत्वान्यानुभवान्यासमवेतधर्मसमवायित्वमनुमितित्वमिति वा वक्तव्यम्

वक्तव्यात् इति तद्व्यक्तीति संग्राहिकपाऽनुमितिव्यक्तिविशेषपरिग्रहः समवेतांतमन्यांतमसमवेतांतं च धर्मविशेषणमतस्त्राभाये एवं च
मेपदमतश्च प्रत्यक्षत्वादिवारणाय घप्रत्यक्षत्वादेः ऐकालिकसंबंधेनानुमितिवृत्तित्वात्समवेतेति अनुभवत्ववारणाय द्वितीयम् अत्रानु
भवत्वं तद्व्यक्तित्वेनोपादाय तद्व्यक्तित्वावच्छिन्नप्रतियोगिताकभेदो विवक्षितः अन्यथानुभवान्यासमवेतसकलानुभवसमवेतत्वरूपानुभ
वत्वमविशृ सकलानुभवसमवेतत्वावच्छिन्नप्रतियोगिताकभेदस्य विवक्षितत्वे सत्तादीनामपि वारणेऽनुभवान्यासमवेतेत्यस्यैव पथ्योपा
नात्तत्तानतादिवारणाय तृतीयं विशेषणम् अनुमितित्वस्यापि कालिकसंबंधेनानुभवान्यस्मिन्कालादौ वृत्तेरप्रसिद्धिरतोऽसमवेतेति तादृ
शधर्मवत्त्वस्य कालादावतिप्रसक्तत्वात् तादृशसमवायित्वमिति तथा च समवायसंबंधेन तादृशधर्मस्यैव लक्षणमिति भावः ॥ ॥

स्वर्गादिशाब्दबोधोत्तरं स्वर्गादिकमनुभवामीत्यनुव्यवसायाभावाभावात्प्रत्यक्षत्वादन्यन्नानुभवत्वम् स्मृतिव्यावृत्तोऽनुभवव्यवहारस्तु स्मरणा
न्यत्वात्तत्त्वनिबंधन इति नयेनाह अनुभवत्वजातीति तथा च निष्प्रयोजनकतयाऽनुभवत्वान्येति विहाय स्मरणान्यज्ञानान्यासमवेतत्वेनो

अनुभवत्वजात्यनंगीकारे तु तद्व्यक्तिसमवेतस्मरणासमवेतधर्मसमवा
यित्वमिति वक्तव्यम् ॥

रवात्स्मरणासमवेतत्वमेवोपादेयमिति भावः यद्यप्यनुभवत्वजात्यंगीकारेपि तद्व्यक्तिसमवेतप्रत्यक्षासमवेतधर्मसमवायित्वं लक्षणं
तु वचेमवत्तथापि प्रत्यक्षादिचतुष्कस्य लक्षणमनेनोक्तं तद्व्यक्तिपदेन प्रत्यक्षमितिपरिग्रहे प्रत्यक्षप्रमितेरेवं शाब्दविशेषव्यक्तिप
रिग्रहे शाब्दस्याप्यनेन लक्षणाकथनसंभवात् एवमुपमितावपीति भावः ॥ ॥ ॥ ॥ ॥

चिं·शि·अ·
२६

व्याप्तिज्ञानस्यैवकरणं परामर्शो व्यापारः व्यापारव्यापारिणोरैक्यमेवजन्यतावच्छेदकं तथैव व्यापारव्यापारिभावसंभवादिति मतानुसारेणाह व्या
प्तिज्ञानत्वावच्छिन्नेति वन्हिव्याप्यधूमवत्पर्वतवानिति विशिष्टवैशिष्ट्यबोधत्वावच्छिन्नकार्यतानिरूपकव्याप्तिज्ञानत्वावच्छिन्नेत्यव्याप्तिज्ञा
नत्वावच्छिन्नायाः कारणतायाः प्रतियोगिककार्यतापर्यवच्छेदकं तदवच्छिन्नमित्यर्थः व्याप्तिज्ञानत्वावच्छिन्नकारणताप्रतियोगिकप्र
त्यासत्तिकार्यतावारणायविशिष्टपरामर्शत्वावच्छिन्नेत्यादि तत्र हि व्याप्तिज्ञानत्वावच्छिन्नस्य कार्यतावच्छेदकं व्याप्तिविशिष्टज्ञा
नत्वं परामर्शस्य तु तादृशविशिष्टवैशिष्ट्यज्ञानत्वमिति नैकमुभयकार्यतावच्छेदकमिति तदादायप्रसक्तेर्दोनातिव्याप्तिः न चवन्हि
व्याप्यधूमवान्पर्वत इति परामर्शस्य तद्व्यवहितोत्तरपर्वतविशेष्यकवह्न्यनुमितित्वं कार्यतावच्छेदकमित्यत्रापि नैकमवच्छेदकमि

व्याप्तिज्ञानत्वावच्छिन्नकारणतानामतिप्रयोगिककार्यतावच्छेदकावच्छिन्नायाविशिष्टपरामर्शत्वावच्छिन्नकारणताप्रतियो
गिककार्यतायास्समानाधिकरणानुभवत्वव्याप्यजातिमत्त्वेतत्त्वमित्यपि केचित् ॥ ॥ ॥

तिवाच्यम् वन्हिव्याप्यो धूमो वन्हिव्याप्यरूपविशेषवान्पर्वत इति समूहालंबनात्मकव्याप्तिज्ञानाव्यवहितोत्तरवन्ह्यनुमितौ स्वजन्य
परामर्शसंबंधेन धूमीयव्याप्तिज्ञानस्य व्यभिचारितया कारणत्वाभावेन तज्जन्यतायामपि तादृशधूमपरामर्शव्यवहितोत्तरत्वादृशाच
न्ह्यनुमितित्वस्यावच्छेदकत्वात् यत्तु व्याप्तिज्ञानत्वावच्छिन्नकारणताप्रतियोगिककार्यतावच्छेदकं वन्ह्यनुमितित्वं न तद्वच्छिन्नातद्घटित
धर्मावच्छिन्नापर्वतविशेष्यकवह्न्यनुमितित्वस्य परामर्शजन्यतावच्छेदकस्य वह्न्यनुमितित्वघटितत्वादिति तन्न व्याप्तिविशिष्टवत्पर्वत
वैशिष्ट्यज्ञानत्वस्य तादृशपरामर्शजन्यतावच्छेदकस्य व्याप्तिविशिष्टज्ञानत्वारूपतादृशावच्छेदकघटितत्वादित्यव्याप्तेरिति केचित्तदि
अस्वरसबीजं तु व्याप्तिशरीरघटकत्वावच्छेदार्थानां स्मृतौ विशेष्यविशेषणमिति रीत्या पत्र परामर्शत्वच्च व्यधिकरणव्याप्तिज्ञानत्वेनकर

राम०
२६

पक्षधर्मतेति पक्षत्वविशिष्टे पक्षेयद्धर्मतात्तानं तज्जन्येत्यर्थः पक्षत्वस्य विशेषणत्वं च विशेष्यान्वयिनान्वयित्वं पक्षधर्मताज्ञाने तत्रज्ञानमेव
पक्षतायाः परंपरयाविशेष्यं तदन्वयिनी या जन्यता तत्र पक्षतायाः अप्यन्वयः तात्पर्यवशाच्च तानेसाक्षादन्वितस्य पक्षधर्मताद्वेविशेषणत्वे
पि पक्षधर्मताविशेषणपक्षविशेषणीभूतपक्षताया अपि विशेषणत्वेन तज्जन्यतायामप्यन्वयः यथा लोहितोष्णीषा ऋत्विजः प्रचरंतीत्या
दौ उष्णीषस्य प्राप्तत्वाद विवक्षितस्यापि तस्य विशेषणीभूतं लोहितविशेषणत्वेनैव साधनतान्वयीति भावः पक्षधर्मतेत्यत्र लक्षणावा के
पक्षतासहकृतत्वसंबंधेन प्रथमतानेविशेषणमिति केचित् तथोक्तायाः सिषाधयिषाविरह विशिष्टसिद्ध्यभावरू [illegible]
पायाः कालाघटीत्रियपदार्थघटितत्वेनन प्रत्यक्षमतो विशेष्यति विशेषणवत्ति विशिष्टाभावेस्य विशेष्याभावरूपत्वादेवं विशेष्यवति

पेतु पक्षधर्मतेत्यत्र पक्षताविशेषणम् तथा च पक्षतासहकृततादृशपरामर्शजन्यत्वमर्थः यथोक्तायाविशेष्याभावरूपाया वा
पक्षतायाः प्रत्यक्षस्य वारणाय परामर्शस्योपादानम् तत्वेन जनकत्वमेकावच्छेदेन तदुभयजन्यत्वं च विवक्षितम् तेन बाधादि
कालीनेन देवात्मविषयोगिविषयकेण परामर्शेनाजन्यपक्षतायाः प्रत्यक्षे तदुभयसमूहालंबनेवानातिप्रसंगः ॥

विशिष्टाभावस्य विशेषणाभावरूपत्वात् विशिष्टाभावस्यातिरिक्तत्वेपि पन्नविषयविशेषेसिषाधयिषाप्रयुक्तो नानुमित्युत्पादस्तत्र
सिद्ध्यभावस्यैव पक्षतात्वात् एवं यत्र सिद्धिकाले सिषाधयिषाप्रयुक्तैवानुमितिस्तत्र सिषाधयिषायाएव पक्षतात्वात्सा प्रत्यक्षजन
कत्वादतिव्याप्तिरिति परामर्शोपादानमिति भावः तत्वेन परामर्शत्वेन तत्वे नेत्यस्य फलमाह बाधादीति आदिना सत्प्रतिपक्षपरिग्रहः त
च्चानुमितिसामाग्र्यभावप्रदर्शनाय दैवात् स्वसामग्रीवशात् प्रतियोगीति सिद्ध्यभावप्रतियोगीसिद्धिविषयकेणेत्यर्थः अत्र च सिद्धि
त्वप्रकारकसिद्धिज्ञानत्वेन सिद्ध्यभावजन्यतावच्छेदकतालौकिकप्रत्यक्षत्वावच्छिन्नं प्रतिजनकत्वमित्यादीनां सम्मतं तेनैकावच्छेदेन

त्वंसंचितम् एकावच्छेदेनेत्यस्य फलमाह तदुभयसमूहालंबनइति नचपरामर्शमत्वक्षेपरामर्शत्वेनकारणताभावादेकावच्छेदेनेतिव्यर्थमितिवा
च्यम् वन्हिव्याप्यधूमवान्पर्वतोनास्तिसिद्ध्यभावश्चेतिसमूहालंबनेतात्पर्यात् यदिचविशिष्टवैशिष्ट्यबोधत्वावच्छिन्नंप्रतिविशेषणतावच्छेदकप्रका
रकधीत्वेननहेतुत्वम् अभावोपनीतभानंमत्वपिप्रतियोगितावच्छेदकप्रकारकधीत्वेननहेतुत्वं तदासुरभिव्याप्यदंडःखवदात्मभिन्नमिदंसुरवीवाना
त्मेतिसिद्ध्यभावश्चेतिसमूहालंबनेतात्पर्यात् यदिचविशिष्टवैशिष्ट्यबोधत्वावच्छिन्नंप्रतिविशेषणतावच्छेदकप्रकारकधीत्वेननहेतुत्वम्
अभावोपनीतभानस्यपिप्रतियोगितावच्छेदकप्रकारकधीत्वेननहेतुत्वंतदासुरभिव्याप्यदंडःखवदात्मभिन्नमिदंसुखवानात्मेतिसिद्ध्यभाव
श्चेतिसमूहालंबनेतिव्याप्तिर्द्रष्टव्या॥ ॥तच्चिंत्यमितिचिंतावीजंतुपरामर्शजन्यतावच्छेदककोटौतल्लिंगकत्वनिविष्टंपक्षताजन्यतावच्छे
दकंवन्हिव्याप्यधूमवान्पर्वत इतिपरामर्शस्यकार्यतावच्छेदकंधूमलिंगकपर्वतोवन्हिमानित्यनुमितित्वमुभयत्रैववन्हिमत्पर्वतस्य

तद्वत्त्वनुभवत्वव्याप्यजातिमत्वविवक्षयावनाव्याप्तिरित्याहुस्तच्चिंत्यम् ॥ ॥ ॥ ॥ ॥

विषयतावच्छेदकत्वात् नचपक्षतावच्छेदकसामानाधिकरण्येनसिद्ध्यभावस्यकार्यतावच्छेदकंपक्षतावच्छेदकसामानाधिकरण्यमात्रा
वगाह्यनुमितित्वंपर्वतत्वसामानाधिकरण्येनपरामर्शस्यतुपर्वतविशेष्यकवह्न्यनुमितित्वंपर्वतत्वावच्छेदेनवह्न्यनुमितिसाधारणमुपर्वतत्वावच्छे
देनवन्हिव्याप्यपरामर्शस्यापितत्सामानाधिकरण्यावगाहित्वेनव्यभिचाराभावादितिवाच्यम् अवच्छेदकावच्छेदेनसिद्ध्यभावेसामानाधि
करण्यावगाहिपरामर्शोयोरिवप्रकृतेनिवेशात् पर्वतत्वसामानाधिकरण्येनवह्न्यनुमितित्वस्यतदुभयजन्यतावच्छेदकत्वात् अवच्छे
दकावच्छेदेनानुमितावपिसामानाधिकरण्यावगाहित्वसत्वादितिदिक्॥

व्याप्तिज्ञानत्वंव्याप्तिप्रकारकज्ञानत्वम् पक्षधर्मतांशेव्याप्तिप्रकारकत्वविनिश्चयत्वेनहेतुतायांव्याप्तिप्रकारकज्ञानत्वस्यापिनिवेशा
त् व्याप्तिज्ञानत्वंव्याप्तिप्रकारकपक्षधर्मतानिश्चयत्वमितिवार्थः व्याप्तिप्रकारकज्ञानत्वोदलेघुव्याप्तिप्रकारकज्ञानत्वादितत्वात्तस्यै
वतादात्म्येनहेतुत्वमुचितमित्याशयेनाह तादात्म्येनेतिननुव्याप्तेः साध्यसाधनादिभेदेनाननुगतत्वात्तद्व्याप्तिज्ञानजन्यत्वानितादृशज्ञा

तत्करणमितिनचव्याप्त्यादिज्ञानजन्यज्ञानकरणत्वेनतरभेदसाधनेव्याप्तिज्ञानत्वंतादात्म्यसंबंधेनज्ञानवयाव्याप्तिनमेगमकं

तत्करणमनुमानम्। ॥ ॥ ॥

व्याप्तेरननुगमेप्यधिकस्याभागासिद्धिवारणमात्रप्रयोजनकत्वादितिवाच्यम् फलोपहितस्यलक्ष्यतयाव्याप्तिज्ञानत्वोरे
रतिप्रसक्तत्वात्ः॥

तिमत्करणत्वस्यसकलव्याप्तिज्ञाननिष्ठत्वाद्भागासिद्धिवारणमेवाधिकांशप्रयोजनंस्यादत आह व्याप्तेरितिअधिकस्यतादृशज्ञा
तिमत्करणत्वस्य भागासिद्धीतितथाचव्याप्तिग्रहणोपपिकतयावतत्सार्थकत्वमितिभावः फलायोगव्यवच्छिन्नंकारणंकरणमि
तिलक्षणाभिप्रायेणाह फलोपहितस्येतितथाचफलानुपहितेपिव्याप्तिज्ञानत्वसत्वेनव्यभिचारात्तद्वारणेपतादृशज्ञानतिम
त्करणत्वंफलोपधानरूपंहेतुकार्यमितिभावः॥

अनुमितिस्वरूपयोग्यसत्त्वस्य त्वपि न क्षतिरिति मिश्रप्रभृतिराह करणत्वेति तथा च परनिष्ठैतन्न्यायाद्भूमिमिदानीं वैयर्थ्यमिति भावः ज्ञान
त्वादीत्यादिना व्याप्तिज्ञानत्वपरिग्रहः यद्यपि व्याप्तिज्ञानत्वमेव करणत्वं तस्य च व्याप्तिज्ञानत्वेनैव व्याप्तिग्रहसंभवस्तथापि ज्ञानां
तरवृत्तिकरणत्वानुरपत्तये कृतविशेषणं विना व्याप्यग्रहात्तस्य सार्थकत्वमित्यर्थः स्वरूपसंबन्धरूपाकरणताभिन्नैवेत्यपि वदन्तीता
दृशज्ञानत्वं परामर्शत्वं तस्य करणत्वानात्मकत्वाद्भूमिभेदइत्यनेधूमप्रागभाववद्भूमिभेदेष्विवैयर्थ्यमिति मतेनाह व्यतिरेके हेतित्व

करणत्वनिष्ठव्याप्तेस्ताहशज्ञानत्वाद्यनवच्छिन्नत्वात् व्यतिरेकव्याप्तेर्गमकतया व्यर्थत्वशंकानवकाशश्चेति लिंगस्य नित्य
त्वेष्यनुमितिकरणस्य स्वरूपतः प्रत्यक्षोपजीवकत्वेयवस्थापन्नाह तच्चेति अनुमितेरीनाकरणकत्वानन्त्वेन प्रत्यक्षप्रमिति

तच्च लिंगपरामर्शेनेत्युपरामृश्यमाणलिंगमितिवक्ष्यते ॥ ॥

मध्यनिवेशेतत्करणस्यापि प्रत्यक्षप्रमाणांतर्भावः स्यादिति तन्निरस्यनितंश्चेतीव्यपिकम्पितः ॥ ॥ ॥

मध्यनिवेशेतत्करणस्याभावनिरूपितसाध्याभावनिष्ठव्याप्तेरुक्तत्वाद्यहेतोर्वैयर्थ्यशंकानवकाशादितिभावः नित्यत्वेपीति यद्यप्यनित्यम
पि सर्वं न स्वरूपतः प्रत्यक्षोपजीवकं तथाप्यदृष्टद्वारानित्यमात्रस्यैव प्रत्यक्षोपजीवकत्वं संभवतीति तथोक्तमज्ञानाकरणकेतिज्ञानत्वा
वच्छिन्नकरणत्वाभावव ज्ज्ञानत्वं ज्ञानकरणकत्वव्यभिचारानुभवत्वव्याप्यजातिमत्त्वं वार्थः अत्रानुमिनोमिनसाक्षात्करोमीत्यनुव्य
वसायबलादनुमितेरपि प्रत्यक्षत्वे जातेसिद्धे तत्करणस्यापि वैलक्षण्यमवर्जनीयमतोनुमितावुक्तलक्षणातिव्याप्तिः इत्येवं

सिद्धासिद्धिव्याघाताद्राह अनुमानत्वेनेति मुख्यार्थपरतेत्यनुमानपदं संगमयति असदिति तन्मतेपदानामलीकएव श
क्तिः अनुगताकारमात्रस्यैवालीकत्वादिति प्रमाणांतरविषयस्वलक्षणविषयकत्वरूपसंवादेन संभावनायामलीकविष

अनुमानप्रामाण्यं परीक्षितुं चार्वाकमतमुत्थापयति अथेति अनुमानं अनुमानत्वेनाभिमतं धूमादिज्ञानं असत्या

अथानुमानं न प्रमाणम् योग्योपाधीनां योग्यानुपलब्ध्याऽभावनिश्चयेप्ययोग्योपाधिशंकया व्यभि
चारसंशयात् शतशः सहचरितयोरपि व्यभिचारोपलब्धेश्च लोके धूमादिदर्शनानंतरं वह्न्यादिव्यव
हारश्च संभावनामात्रात् संवादेन च प्रामाण्याभिमानात्

त्युपनीतमनुमानमेव वा संवादेन संवादाभिमानेन संभावितस्यासतोनुगताकारस्य परमार्थसत्त्वलक्षणमात्रसाक्षिणाध्य
क्षेणानुल्लेखात्

पिप्रामत आह संवादेनेति यथाश्रुतार्थस्यायोगे बीजमाह संभावितस्येति असत्त्वे हेतुरनुगताकारस्येति परमार्थसन्यः स्वलक्षणस्तन्मात्रवि
षयकेणेत्यर्थः स्वप्रमसाधारणमनेकदेशकालावृत्तिस्वात्मकं तदेव लक्षणं व्यावर्तकं यस्य तन्मते भेदेन धर्मधर्मिभावस्यानभ्युप
गमात् एतेनानुगतधर्मसम्बन्धेन तस्य व्यावर्तकत्वेन तदसत्त्वसम्बन्धाभावात्कथं तस्य परमार्थसत्त्वमिति शंका निरस्ता ॥

चिं॰ शि॰ भ॰
२९

ननु तन्मते नैतत्संवादलक्षणं एवोपरोध्यक्षत्वस्तोरेकैकस्य लक्षणाविषयकत्वात् जगतः क्षणभंगुरत्वात् किंच निरुक्तसंवादस्य प
रमार्थसद्विषयत्वघटितमूर्तिकस्य विकल्पेनासंस्पर्शात् कथं भ्रमोपि नातस्तन्मते सिद्धसंवादमेवोपपादयति अध्यक्षमूलकेति
शशविषाणादिविकल्पानामनादिवासनापरिपाकमात्रमूलानां वारणार्थमध्यक्षमूलकेति अत्र संभावितसत्यनुषज्य

अध्यक्षमूलकविकल्पोल्लिखितत्वाद्वा संवादः अनुमानाप्रामाण्ये च तन्मूलकसमयनिर्णयाद्यधीनप्रवृत्तिकयोः

इति नाप्रत्यक्षं प्रमाणमिति चेन्न ॥

शब्दोपमानयोः स्वतन्त्रप्रामाण्यानाप्रत्यक्षं प्रमाणमित्याह इतीति ॥ ॥ ॥ ॥

ज्यते तथा च संभावितसाध्यक्षमूलकविकल्पोल्लिखितत्वात्संभावनायामध्यक्षमूलकविः कल्पोल्लिखितविषयक
त्वे संवाद इत्यर्थान्न पंचम्यनुपपत्तिः समयसंभावनयैव शब्दादेः प्रवृत्तिः स्यादत उक्तं निर्णयेति आदिनाकांक्षातात्पर्यादि
निर्णयपरिग्रहः नाप्रत्यक्षं प्रमाणमिति तथा च स्वाभिमतस्य प्रत्यक्षातिरिक्ते प्रमाणत्वाभावव्यवस्थापनस्यानुगुणत्वेने
वानुमानाप्रामाण्यसाधनं चार्वाकस्येति भावः ॥ ॥ ॥ ॥ ॥ ॥ ॥

राम॰
२९

अप्रमाणसाधर्म्यस्य प्रमाणेपि सत्त्वादप्रमाणसाधर्म्यत्वेन न प्रमाणत्वाभावव्याप्यत्वेमत आह प्रमाणेतेति प्रमाणताप्रयोजकं
त्विंद्रियत्वं व्याप्तिनिश्चयत्वादि चैकतरसिद्धम् तथा च फलं व्यभिचारशंकोपवर्णनं व्याप्तिनिश्चयाभावदर्शनद्वाराप्रमाणता

अप्रमाणसाधर्म्येण प्रमाणताप्रयोजकरूपशून्यत्वेन दृष्टसाधर्म्यस्य साधर्म्यदर्शनस्य वा ॥ ॥ ॥

अप्रमाणसाधर्म्येणाप्रामाण्यसाधने दृष्टसाधर्म्यस्यानुमानत्वात् एतद्वाक्यसं
दिग्धविपर्यस्तान्यतरश्चस्यार्थवत्त्वात्तत्पोश्चपरकीययोरप्रत्यक्षत्वात् ॥ ॥

प्रयोजकरूपशून्यत्वसंपादनायैवेति भावः दृष्टं साध्यसाधनवत्तया निश्चितं तस्य साधर्म्यं साध्यव्याप्यहेतुस्वरूपम् तस्य
दृष्टं ज्ञायमानमतीतत्वस्याविवक्षणात् तथा च ज्ञायमानसाधर्म्यस्येति वार्थः ज्ञानकरणतापक्षमाश्रित्य पूरयति साध
र्म्यदर्शनस्येति ॥ ॥ ॥

चि॰शि॰भ॰प॰
३०

अभिहितमेवेति व्यवहारहेतुरित्यनेनान्वितम् तथा चानुमानप्रामाण्ये परकीयसंदेहादिकञ्च साधर्म्यदर्शनेन संभाव्यते न तु व्यव
हारोपपत्तिरित्युक्तं कस्मादित्यर्थः केचित्तु अभिहितमेव हि साधर्म्यदर्शनम् प्रमाणतो प्रयोजकरूपशून्यत्वदर्शने संभावना अ
नुमानेऽप्रामाण्यसंभावना ननु संभावनायां कथमप्रामाण्यव्यवहारः कथं वा परकीयसंदेहादिकमनिर्णीयते दुक्तो सापश

नन्वभिहितमेव साधर्म्यादर्शनं संभावनाभावयति संभावनैव बद्धमूलोऽव्यवहारे हेतुरित्यत आह अनुमानमिति ननु

अनुमानं न प्रमाणमिति वाक्यस्य प्रामाण्याप्रामाण्ययोर्व्याघातात्त्वाच्च अपि च अनुमानाप्रामाण्ये प्रत्यक्षस्या
प्रमाणत्वापत्तिः प्रामाण्यस्यानुमेयत्वात् ॥ ॥ ॥

न व्ययमायातस्तो भ्रमजनकत्वलक्षणमप्रामाण्यं निरूपयामो येन भ्रमस्य विषयबाधाधीनतया प्रामाण्यं संभाव्येतापि
तु भ्रमाकरणत्वव्यतिरेकमत आह अपि चेति

व्यप्रयोगहेत्यत आह संभावनैवेति तथा च परकीयसंदेहादिकमपि संभाव्येतेति हि शब्दप्रयोगहेत्वर्थ इति व्याचक्षुः आपा
तत इति यावत्सत्वाभिनिव्यक्त्वस्याप्यत इत्यर्थः तत्सिद्धौ तु भ्रमस्यासत्वातिरूपत्वया भ्रमजनकत्वसिद्धावपि नाप्रामाण्याभा
वसिद्धिरिति भावः विषयबाधेति अप्रामाण्याभाववत्वप्रामाण्यप्रकारकत्वरूपभ्रमत्वस्य विशेष्येऽप्रामाण्याभाववत्ता विना
नुपपत्तेरिति भावः ॥

राम॰
३०

संशयो हि जातत्वप्रकारकत्वात्मकरजतत्वभ्रमाभ्रमसाधारणधर्मदर्शनाद्विशेषादर्शनाच्च भवेत्स्वकेनेतन्न संभवतीत्याह अनुगताकारसंस्प
र्शिनीत्यादिना अनेन साधारणधर्मवद्धर्मिज्ञाननिरासः परमार्थसदित्यनेन विशेषादर्शननिरासः तादृशस्वलक्षणविषयक
त्वस्यैव व्यावर्तकधर्मदर्शनविधया संशयविरोधित्वादिति कोटिस्पर्शविशेषनिश्चयमपि दर्शयति स्वसंवेदनेति स्वेन स्वात्मके

स्वतन्त्र इति न चानुगताकारसंस्पर्शिनि परमार्थसत्स्वलक्षणमात्रसाक्षिणि स्वसंवेदनसंविदितप्रामाण्ये निर्विकल्प
स्वतः प्रामाण्ये तत्संशयानुपपत्तेः ॥

कथं विज्ञानेन प्रामाण्यं संदिग्धत्वे परं तु तदुत्तरभाविनि समुल्लिखितालीकानुगताकारे सविकल्पक एवेति वाच्यम् ॥ ॥

न संविदितं विषयीकृतं प्रामाण्यं यस्येति सविकल्पके संशयकारणोपपत्तिमाह परन्त्विति प्रत्यक्षेऽप्रामाण्यशंकाविरहे क
थमिन्द्रियार्थसन्निकर्षानन्तरमुत्पन्ने ज्ञानेऽप्रामाण्यसंशयानुभवस्तत आह तदुत्तरेति समुल्लिखितो विषयीकृतोऽलीको
ऽनुगताकारो येन तत्र ॥ ॥

सन्मात्रेति असद्विषयकत्वे सति सद्विषयकत्वं सन्मात्रावलंबनत्वम् तच्च निर्विकल्पकविषयः असद्घटितमूर्तिकत्वादि

निर्विकल्पकस्य सन्मात्रावलम्बनत्वस्वविषयकत्वप्रमाणाव
गाहित्वानामनुमानाधीनसिद्धिकत्वात्

षयितानवस्थापाताच्च न वक्तुमपि संभावनीयम् तथा सति प्रत्यक्षे सन्मात्रावलंबनत्वप्रामाण्यादीनाम प्रामाण्यापातात्
संभावनायाः प्रमाणत्वाभावादिति भावः ॥

॥श्रीगणेशाय नमः सर्वमिदम्॥ अनुमानप्रामाण्यसाधनं समाप्येति समाप्यानुमानप्रामाण्यपरीक्षां तत्कारणीभूतव्य
व्याप्तिग्रहोपायप्रतिपादनं तस्य निदानमित्यर्थः व्याप्तिस्वरूपज्ञाने हि व्यभिचारज्ञानाभावो व्यभिचारग्रहे सहचारग्रह

॥सर्वमिदं सति व्याप्तिनिश्चये स्यात्स एव तु न संभवति उपायाभावादित्यत आह व्याप्तीति समाप्यानुमा
नप्रामाण्यपरीक्षां कारणीभूतव्याप्तिग्रहोपायप्रतिपादननिदानं व्याप्तिस्वरूपनिरूपणमारभते ननु
त्यादिना साध्याभाववदव्याप्तिग्रहोपायश्चावश्यंते ननु अनुमितिहेतुव्याप्तिज्ञाने का व्याप्तिः न तावदव्य
भिचरितत्वम् तद्धि न साध्याभाववद्वृत्तित्वम् साध्यवद्भिन्नसाध्याभाववद्वृत्तित्वं वा ॥ ॥

वृत्तित्वस्याव्याप्यवृत्तिसाध्यकसद्धेतावव्याप्तिमाशंक्याह साध्यवद्भिन्नेति ॥ ॥ ॥ ॥

असमानाधिकरणवृत्तिधूमत्वरूपव्याप्तौ सहचारांशस्य विशेषणतया तज्ज्ञानविधयोपयोगित्वेन प्रतिपादयितुम
क्तेनान्यथेति भावः अव्याप्येति। कपिसंयोग्येतद्वृक्षत्वादित्यादावित्यर्थः ॥ ॥ ॥ ॥

३ समानार्थकपदयोरेकत्रान्वयेतत्रैकस्यवैयर्थ्यादितिनियमः ३

अव्यावर्तकत्वेन ~

साध्यवद्भिन्नोयः साध्याभाववानितिकर्मधारयेसाध्याभाववदित्यस्यवैयर्थ्यमित्यतः सप्तमीतत्पुरुषंव्याचष्टेसाध्यवद्भिन्नइति
। नचसाध्यवद्भिन्नेनसमंवृत्तित्वस्यान्वयाभावाद्घटपृथ्वीसन्निवेशेनवैयर्थ्यमितिवाच्यम् अभेदेनसाध्यवद्भिन्नान्वितसाध्या
भाववत्त्वविशिष्टइतिवान्वयेसाध्याभावस्याव्यावर्तकत्वेनवैयर्थ्यादभेदेनसाध्यवद्भिन्नीयावृत्तित्वस्यैवसम्यक्त्वादितिनचा
धिकरणाभेदेनाभावभेदपक्षएवेतल्लक्षणमितिसाध्यवद्भिन्नेयोभावइत्येतावतैवसामंजस्येसाध्यपदवैयर्थ्यमितिवाच्यम्
व्याप्यव्याप्यवृत्तित्वरूपविरुद्धधर्मसंसर्गाद्द्रव्यवृत्तिसंयोगाभावाद्गुणादिवृत्तिसंयोगाभावस्यैवभिन्नत्वोपगमात् ।

॥ साध्यवद्भिन्नेयः साध्याभावस्तद्वृत्तित्वमित्यर्थः ॥ ॥

ननुघटत्वाभावादेरपिअधिकरणभेदेनभेदाभ्युपगमेमानाभावात् यदिचाभावमात्रस्यैवाधिकरणभेदेनभेदइतिमतेनेदम्
तथापिसाध्याभावेत्वत्राभावत्वंभावाभावसाधारणमुपात्तम् अन्यथाघटत्वाभाववान्यघटत्वादित्यत्राभावसाध्यकेभावभिन्न
साध्याभावस्याप्रसिध्याव्याप्तिः स्यात्तथाचसाध्यवद्भिन्नेकालिकेतयोद्रव्यत्वादिरूपोद्रव्यत्वाभावाभावस्तद्वृत्तिधूमादिहेतुतिस्व
संभवेनासंभवोव्याप्तिर्वास्यादतःसाध्येति साध्याभाववत्त्वंचसाध्यवत्ताग्रहविरोधितानियामकसंबंधेनतेनकालिकत
याःत्वतस्याभावेदैशिकतयासाध्येआत्मत्वादिहेतौनाव्याप्तिः ॥ ॥ ॥ ॥ ॥

अनुमितिविधेयत्वं ४

कर्मादावितितथाचसाध्यवद्भिन्नेगुणादौयःकपिसंयोगाभावःसाएववृक्षेपीत्यव्याप्तिःउदम्मुपलक्षणम् घटत्वघटाकाशसं
योगान्यतराभाववानाकाशत्वादित्यादावव्याप्तिः तत्रहिसाध्यवद्भिन्नेघटेयस्तादृशसंयोगरूपःसाध्याभावस्तद्वृत्तिगगनआका
शत्वस्यवृत्तेः नचसाध्यवद्भिन्नवृत्तित्वविशिष्टोयःसाध्याभावस्तद्वृत्तित्वमित्युक्तौनायंदोषइतिवाच्यं१साध्याभावपदवै
यर्थ्यात् सिद्धिक्रमत्वंसाधनत्वमित्यभिप्रायेणोक्तंसाध्यवत्पक्षेति। अव्याप्तिरितिमासत्यवृत्तिधर्मानवच्छिन्नप्रतियोगितोक
त्वेनामोन्याभावविशेषणत्वेनतद्रूपवानेतद्रसादित्यादावेवलक्षणगमनादसंभवोनभवतीतिभावः साध्याभाववतिसाकल्यम्

कर्मादौसंयोगाद्यभावस्यभिन्नत्वेमानाभावादाह साध्यवदिति हेतोःसाध्यवत्पक्षभिन्नदृष्टांतवृत्तित्वेनाव्या
प्तेराह सकलेतिसाकल्यंसाध्याभाववतिसाध्येचबोध्यम् ॥ ॥ साध्यवत्प्रतियोगिकान्योन्याभावासमाना
धिकरणंयद्वा सकलसाध्याभाववन्निष्ठासंताभावप्रतियोगित्वंवा ॥ ॥

वेशएवसाध्येसाकल्यंसार्थकमितिप्रथमंसाध्याभाववतिसाकल्यंव्याचष्टेसाध्याभाववतीति साध्याभावेसाकल्यदानेतु
धूमवान्वह्नेरित्यादावतिव्याप्तिः तत्तद्धूमादावृत्तित्वावच्छिन्नाभावघटितसाध्याभावस्तोमस्यप्रतियोगित्वेयदधिकरणयावच्छिन्नस्या
धिकरणगुणादौवह्न्यादेरभावसत्वात् अव्याप्तिश्चपृथिवीत्वाभाववान्जलत्वादित्यादौ तत्र तत्तद्घटपटाद्यवृत्तित्वावच्छि
न्नाभावघटितसाध्याभावस्तोमाधिकरणाप्रसिद्धेरितितत्रोक्तम् ॥ ॥

कपिसंयोगी कपिविभागादिसादेनाव्याप्तिः

ह

ननु वन्हिमत्यपि सकलवन्ह्यभावसत्वादव्याप्तिः व्यासज्यवृत्तिधर्मानवच्छिन्नप्रतियोगिताकत्वेनाभावविशेषणेतु जातिमान्सत्वादित्यादावव्याप्तिः तत्रपूर्वक्षणावृत्तित्वविशिष्टसकलजात्यभावस्य जातिमत्यपि सत्वात् न च सकलसाध्यस्य तत्तद्व्यक्तित्वावच्छिन्नप्रतियोगिताकाभाव एवात्र निवेश्यो गुणान्यत्वविशिष्टजातिमान्सत्वादित्यादावतिव्याप्तेः तत्र सकलसाध्यान्तर्गतायाः सत्तायास्तद्व्यक्तित्वावच्छिन्नाभाववति जात्यादौ सत्तायाश्चाभावसत्वात् अतः साध्यतावच्छेदकेति व्याप्यवृत्तीति कपिसंयोगेन द्रव्यत्वादित्यादौ हेतोरव्याप्यवृत्तित्वे तु तत्राभावसत्वेन नाव्याप्तिरिति भावः यद्यपि हेत्वभा

साध्यतावच्छेदकावच्छिन्नप्रतियोगिताको वाभावो ग्राह्यः तेन विपक्षैकदेशनिष्ठाभावप्रतियोगिनि व्यभिचारिणि नातिव्याप्तिर्नवा नानाव्यक्तिकसाध्यकसद्धेतावव्याप्तिः अव्याप्यवृत्तिसाध्यकव्याप्यवृत्तिसद्धेतावव्याप्तेर्व्यभिचारिणि चाव्याप्यवृत्तावतिव्याप्तेर्वारणाय अभावद्वये प्रतियोगिव्यधिकरणत्वं बोध्यम्

वे प्रतियोगिवैयधिकरण्यस्यावश्यकत्वादव्याप्यवृत्तिसद्धेताव व्याप्तिः संभवति तथाप्ययथाश्रुतस्य नाव्याप्तिरिति व्याप्यवृत्तीत्युक्तम् व्यभिचारिणीति पृथिवी कपिसंयोगादित्यादौ अभावद्वये साध्याभावे हेत्वभावे च प्रतियोगिवैयधिकरण्यं साध्यतावच्छेदकसंबंधेन हेतुतावच्छेदकसंबंधेन यथायथं बोध्यम् तेन द्रव्यत्वप्रकारकेत्तत्प्रमावान्द्रव्यत्वादात्मा ज्ञानादित्यादौ नातिव्याप्तिरव्याप्तिर्वा द्रव्यत्वप्रकारकप्रत्यक्षमायां गुणादिकं न विषयः सैव प्रमेत्यतेन धर्तव्या तेन द्रव्याणि यावन्ति सर्वं प्रमेयमिति समूहालंबनद्रव्यत्वप्रमाया विषयतया केवलान्वयित्वेन समवायेन त

हेत्वभावो यत्रापि ना साध्याभावोपि प्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिव्यधिकरणो बोध्यः तेन गुणान्यत्वविशिष्टसत्तावान्जातेरित्यादौ नातिव्याप्तिः न च साध्याभावो यत्रापीत्येव कुतो नोचितं अपिना हेत्वभावसमुच्चयपरतिकिंन कृतम् तथा सति तत्प्रतियोगित्वमित्यत्र तत्पदे न हेत्वभावपरामर्शानुपपत्तेः हेत्वभावप्रतियोगित्वमित्युक्तौ च शब्दगौरवादिति क्रमेण विशेष्यविशेषणयोः फल

हेत्वभावोपि प्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिव्यधिकरणस्तत्प्रतियोगित्वञ्च हेतुतावच्छेदकरूपेणावोध्यम् तेन द्रव्यत्वादौ साध्यविशिष्टसत्वादौ नाव्याप्तिः नवा विशिष्टसत्तात्वादिना तादृशाभावप्रतियोगिनि सत्वादावतिप्रसंगः श्रीः ॥४४॥

माह तेनेत्यादिना अत्र निरुक्तप्रतियोग्यनधिकरणवृत्तित्वविशिष्टसाध्याभाववत्सकलनिष्ठनिरुक्तप्रतियोग्यनधिकरणवृत्तित्वविशिष्टाभावप्रतियोगित्वं हेतोर्ग्राह्यम् तेन कपिसंयोगी एतद्वृक्षत्वात्कपिविभागाद्वेत्यादौ प्रतियोगिसमानाधिकरणभिन्नस्य साध्याभावस्य हेत्वभावस्य चाप्रसिद्धत्वेपि प्रतियोग्यनधिकरणवृत्तिर्यः कपिसंयोगाभावस्तद्वृत्तिद्रव्यत्वाभावसामान्येपि नक्षतिरिति ॥

४ सकलसाध्याभाववद्व्यापकीभूताभावप्रतियोगित्वं ४

साध्ये साकल्याप्रसिद्धेः साध्याभाववति साकल्याप्रसिद्धेर्हेत्वभावे सकलसाध्याभाववद्वृत्तित्वाप्रसिद्धेः क्रमेणाव्याप्तिमत्रे
णीमाह प्रमेयत्वादिनेति तत्र साध्यतावच्छेदकावच्छिन्नसाध्याभाववित्वविवक्षणे साकल्याप्रवेशादाह विपक्षो वेति एक
व्यतिरेक इति लिङ्गविपरिणामेनान्वयः ईश्वरभिन्नं घटत्वादित्यादावित्यर्थः तत्राव्याप्तिरित्यग्रेतनेनान्वयः ननु साकल्य
मिह्याशेषत्वरूपं व्यापकत्वपर्यवसितमतस्त्राह निर्धूमत्वादीत्यादि निर्धूमत्वस्य धूमत्वावच्छिन्नसामान्याभावात्मकस्ये

यत्रैकव्यक्तिकं साध्यं विपक्षो वा तत्र निर्धूमत्वादिव्याप्ये तत्त्वे न साध्ये निर्वह्नित्वादौ चाव्याप्तिः तत्र हेत्वभाव
स्य वह्न्यादेः प्रत्येकं यावद्विपक्षात्तृत्तित्वादतस्त्राह साध्यवदिति अत्रान्योन्याभावस्य साध्यवत्त्वावच्छि
न्नप्रतियोगिताकत्वं व्युत्पत्तिबललभ्यम् न हि भवति नीलो घटो घटादन्य इति साध्यवदन्यावृत्तित्वं वो

केवलान्वयिन्यभावात्

कव्यक्तिकत्वात् साध्ये साकल्याप्रसिद्धिरेव दोषः तस्य नोव्याप्येति ताहशव्याप्यस्य जल
त्वादेस्ताद्रूप्येण साध्यत्वापन्नं निर्वह्नित्वस्य प्रतिचारितासङ्गत्वार्थमाह तत्त्वेनेति व्याप्यत्वेनेत्यर्थः ननु साध्यवत्प्र
तियोगिकान्योन्याभावासामानाधिकरण्यमित्यस्य दोषेणेदमुपि दुष्टमतस्त्राह अन्येति साध्यवदन्यपत्रेत्यर्थः तत्र नु य
त्किंचित्साध्यवद्व्यक्तिभेदेपि साध्यवत्प्रतियोगिकान्योन्याभावो भवतीत्यव्याप्तिर्वह्निमान् धूमादित्यादाविति भावः व्युत्प

२ निर्वह्नित्वाभावस्य यावद्वह्निस्वरूपस्य पर्वते ऽसत्त्वाद्व्याप्तिरित्यभिप्रायः २

एकत्र विशेषणत्वेनान्वितस्यान्यत्र विशेषणत्वेनान्वयायोगात् ३

अत्र च साध्यवच्छब्देन लक्षणया साध्यवत्त्वावच्छिन्नप्रतियोगिताकोभिधीयते तस्य चान्यपदार्थैकदेशे भेदे भेदेनान्वयः घटोन्यादौ च
घटतरभावयोर्घटत्वावच्छिन्नप्रतियोगिताकत्वसंसर्गः न तु विशेषणीभूतघटत्वादेरभावेन समं तत्प्रतियोगितावच्छेदकत्वं संसर्गः तथा स
त्यभावो घटीयो घट इत्याकारः स्यात् एवं घटत्वस्येतरविशेषणतया पदार्थैकदेशतया चाभावेन्वयासंभवाच्चेत्यध्येयम् तत्र घटत्व
विशिष्टोपस्थापकपदसमभिव्याहृतनञ्पदस्य घटत्वावच्छिन्नप्रतियोगिताकत्वसंबंधेन घटप्रकाभावशाब्दबोधत्वं कार्यतावच्छेद

रको४

कम् नीलसाकाङ्क्षघटोपस्थापकपदसमभिव्याहृतनञ्पदस्य नीलघटत्वावच्छिन्नप्रतियोगिताकत्वसंबंधेन नीलघटप्र
कारकाभावशाब्दत्वं तथा नीलो घटो नास्तीत्यादौ च घटत्वावच्छिन्नप्रतियोगिताकत्वसंबंधेन बोधाभावस्तात्पर्याभावा
त् विशेषणान्तरसाकाङ्क्षत्वेनाज्ञातघटत्वादिविशिष्टोपस्थापकपदसमभिव्याहृतनञ्पदत्वादिना वा घटत्वावच्छिन्न
प्रतियोगिताकत्वसंबंधेन बोधजनकत्वं वाच्यम् घटादन्य इत्यादौ च पंचम्या अवधित्वेऽवधिमत्त्वे वा शक्तिः तत्र घटत्वा
वच्छिन्नवृत्तित्वं घटत्वावच्छिन्ननिरूपितत्वं वा संबन्धः एवं घटस्याभाव इत्यादौ प्रतियोगित्वेऽनुयोगित्वे वा षष्ठ्यर्थे घटत्वा
वच्छिन्नवृत्तित्वादिकं संबंधः कंबुग्रीवादिमान्नास्तीत्यादौ चायोग्यतानिश्चयशून्यानां भ्रमात्मकः शाब्दबोधः घटतरभा
वयोर्घटत्वावच्छिन्नप्रतियोगितायाः एव संबंधत्वेन कंबुग्रीवादिमत्त्वावच्छिन्नप्रतियोगितायास्त्र संबंधत्वात् न चात्र भ्रमो

नकंबुग्रीवादिमत्त्वस्यावच्छेदकत्वे तस्याप्रकारत्वात् नापि कंबुग्रीवादिमत्त्वावच्छिन्नप्रतियोगितासंबंधेन घटस्याभावे तादृशप्र
तियोगितायाम् अलीकत्वादिति वाच्यं कंबुग्रीवादिमत्त्वावच्छिन्नत्वप्रतियोगिता नो मम संबंधतया भानात् अभावस्य घटत्वाव
च्छिन्नप्रतियोगितयैव घटसंबंधितया कंबुग्रीवादिमत्त्वावच्छिन्नप्रतियोगितासंबंधेन घटासंबंधितेन तेन संबंधेन घटप्र
कारकत्वादिति भूतले घटपटौ न स्त इत्यत्र भूतलवृत्त्यभावे घटपटयोरुभयत्वावच्छिन्नप्रतियोगितासंबंधेनान्वय इ
ति स्त इति द्विवचनप्रयोगस्साधुत्वमात्रं दाराः सन्तीतिवत् भूतलवृत्त्यभावस्य घटपटोभयत्वावच्छिन्नप्रतियोगितासंबंधेन घटप
टयोरन्वयः तथा च भूतलवृत्त्यभावीयो घटपटौ स्त इत्यन्वय इति केचित् भूतलाधेयत्वस्य समभिव्याहृतार्थस्याभावो घटपटोभय
त्वसामानाधिकरण्येनेत्यपि कश्चित् तत्सजातीयेन समाख्यातगुणत्वेन स्त इत्यत्र गत्यभावः घटपटौ न स्त इत्यादौ च य
त्तत्वं पटत्वमुभयत्वं च परस्परसामानाधिकरण्यापन्नं प्रतियोगित्वावच्छेदकं न तूभयत्वमात्रं केवलं घटत्वं पटत्वं वा
यत्किंचिदुभयत्वेन तादृशप्रत्ययः एवं दंडी पुरुषो नास्तीत्यादावपि विशेषणविशेष्यभावापन्नं पुरुषत्वं दंडो
दंडत्वं च प्रतियोगितावच्छेदकमित्यादिकमूह्यम्

२ वतिकेवलघटवतिकेवलपटवति वा घटपटौ न स्त इति प्रसंगात् तादृशप्रतियोगितावच्छेदकावच्छिन्नं च घटपटोभयमेवातस्त
२ दुभयवत्सेव २

त्वंतदधिकरणा

लक्षणार्थयोः पौनरुक्त्यमाशंक्याह साध्यमिति असमानाधिकरण्यं च तदनधिकरणाधिकरणानधिकरणत्वं वा आधेयता सा
न द्रव्यत्वादितादात्म्यव्याप्तिः सत्तायां द्रव्यत्वानधिकरणाधिकरणत्वस्य सत्त्वात् तत्राह यदधिकरणेति साध्यमसमा
नाधिकरणं यस्येत्यत्र समानाधिकरणाभिन्नस्य साध्यस्य यत्पदार्थसंबंधो लभ्यते तच्च बाधितमविवक्षितं चेत्

नापीति साध्यमसमानाधिकरणं यस्य यदधिकरणानधिकरणं साध्यं तत्त्वं साध्यनिष्ठासामाना
धिकरण्यप्रतियोगित्वम् नापि साध्यासामानाधिकरण्यानधिकर
णत्वम्॥

तोयदिनीति कश्चित् अत्रापि यत्त्वतत्त्वयोरननुगमादाह साध्यनिष्ठेति साध्यनिष्ठाभावप्रतियोगिवृत्तित्वनिरूप
काधिकरणताप्रतियोगित्वम् साध्यनिष्ठाभावीयवृत्तित्वनिष्ठप्रतियोगितायां निरूपकतासंबंधेनावच्छेदकं प
रधिकरणं न वृत्तित्वमिति यावत् द्रव्यं सत्त्वादित्यत्र द्रव्यत्वे साध्ये गुणवृत्तित्वाभावस्य सत्त्वात् साध्यनिष्ठाभावीयवृ
त्तित्वनिष्ठप्रतियोगितायां निरूपकतासंबंधेनावच्छेदको गुणस्तद्वृत्तित्वस्य सत्तायां सत्त्वान्नातिव्याप्तिः ॥ ॥

च्छेदके हेतुमन्निष्ठसाध्याभावप्रतियोगितावच्छेदकत्वस्य व्यभिचारत्वात् अवच्छेदकत्वं चेह तत्पर्याप्त्यधिकरणत्वं तेन ।
विशिष्टवह्न्यभावस्य ह्रदत्ववह्नित्वोभयावच्छिन्नाभावस्य च प्रतियोगितावच्छेदकत्वेऽपि वह्नित्वस्य नाव्याप्तिः सत्त्ववतीत्युच ।
भयत्वावच्छिन्नस्य प्रतियोगिताधिकरणावृत्तित्वात् शुद्धवह्नित्वस्य तत्सामानाधिकरण्येऽपि तत् ॥रणादौ संयोगाद्यभावोऽपि व्याप्यवृत्तिः
स्यावच्छेदकत्वाद्घटत्वात् लक्षणवृत्तार्थे विवक्षणात् यदाह सामानाधिकरण्येनेत्ति चेत्र प्रतियोगितासमानाधिकरणं यद्घटावच्छेद
कं तदन्यत्वमात्रे सोक्तावुक्तदोषेण तथा विवक्षणात्वस्तुवस्तु सामानाधिकरण्येनानवच्छेदकत्वविवक्षणेऽपि वह्नि ह्रदोभयं नास्तीत्यभा
वे वह्नीत्वह्रदत्वादीनां सामानाधिकरण्येन प्रतियोगितावच्छेदकं न दाम्भिप्रायोक्तार्थः ननु संयोगी सत्त्वादित्यत्रातिव्याप्तिः संयोगाभा
वस्याव्याप्यवृत्तितया व्याप्यवृत्त्यभावात् प्रतियोगितानवच्छेदकत्वात्संयोगत्वस्येत्यत आह सत्त्ववतीति व्याप्यवृत्तीति तथा च हे

ननु गुणकर्मणामन्यत्वायां व्यभिचारिणामतिव्याप्तिवारणाय पारिभाषिकगवच्छेदकत्वमवश्यं वाच्यम् तथा च व्याप्यवृत्तित्वं प्रतियोगिव्यधिकरणत्वं च
भावविशेषणमेवमिस्त्रिप्रायेणाह वक्ष्यमाणं वेति सिद्धान्तलक्षणे वक्ष्यमाणमित्यर्थः न च हेतुसमानाधिकरणाभावप्रतियोगितायाः सामानाधिक
रण्येनानवच्छेदकं यद्विशिष्टसंबंधिनिष्ठाभावप्रतियोगितायाः सामानाधिकरण्येनानवच्छेदकं तत्पारिभाषिकावच्छेदकं तदन्यत्वं साध्यतावच्छेदकत्वं वाच्यमित्य
र्थः तेन सत्तावान् जातेरित्यत्र जात्यधिकरणगुणादिनिष्ठाभावप्रतियोगितावच्छेदकविशिष्टसत्तात्वानतिरिक्तवृत्तित्वेपि सत्तात्वस्य न क्षतिः न वा तादृशा
भावप्रतियोगितावच्छेदकं यत्तदवच्छिन्नाभाववत्संबंद्धयादिविशिष्टसामान्यं तत्पारिभाषिकावच्छेदकमित्युक्तौ सत्तावान्मेयत्वादित्यत्र ता
दृशाभावप्रतियोगितावच्छेदकं सत्तात्वं तदवच्छिन्नाभाववति सामान्यादौ समवायेन संबद्धं न स्याप्रसिद्ध्या तस्य पारिभाषिकावच्छेदकत्वक्षतिः तान्यधिक
रणगुणादिनिष्ठाभावप्रतियोगितावच्छेदकविशिष्टसत्तात्वस्य सत्तात्वविशिष्टसंबंधिनिष्ठाभावप्रतियोगितानवच्छेदकत्वाभावात् मेयत्वाधिकर

वक्ष्यमाणं वा प्रतियोगितावच्छेदकानतिरिक्तवृत्तित्वमेव तत्स्वच्छेदकत्वमिहापि पेयीयम् ॥ ॥ ॥ ॥

णसामान्यनिष्ठाभावप्रतियोगितावच्छेदकसत्तात्वस्य सत्तात्वविशिष्टसंबंधिनिष्ठाभावप्रतियोगितानवच्छेदकत्वाच्चेति अत्र प्रतियोगितयोरेकसं
बंधावच्छिन्नत्वं विशेषणताविशेषसंबंधावच्छिन्नत्वं वाच्यम् तेन साध्यतावच्छेदकसंबंधेनाभावस्य विवक्षणे संयोगेन साध्यतायां तादृशाव
च्छेदकाप्रसिद्धिर्भवतीति इत्यत्र धूमसमानाधिकरणाभावप्रतियोगितायाः विशेषणविशेषावच्छिन्नाया अवच्छेदकं घटकत्वप्रकारकप्रमा
विशेष्यत्वं तत् ननु घटत्वविशिष्टसंबंधिनिष्ठाभावप्रतियोगितानवच्छेदकत्वं तो घटत्वादेव तादृशावच्छेदकं घटत्वप्रकारत्वादौ सत्त्वान्न त
त्प्रसंगः इति धूमवान् वह्नेरित्यादौ वह्निसत्त्विष्ठाभावी तादृशप्रतियोगितावच्छेदकमयोगोलकान्यत्वप्रकारकप्रमाविशेष्यत्वं तत्तु धूम
त्वविशिष्टसंबंधिनिष्ठाभावीयतादृशप्रतियोगितानवच्छेदकमतो धूमत्वादेव तादृशावच्छेदकमतो न तत्रातिप्रसंग इत्यधिकं चाग्रे व्यं चापि

ननु गुणत्वमादाय संयोगत्वस्य पारिभाषिकावच्छेदकत्वं गुणसामानान्याभावे सोत्यन्तिवाल्लावच्छेदेनावयविनि वर्त्तमानतया गुणत्वस
संयोगत्वविशिष्टसंबंधिनिष्ठाभावप्रतियोगितानवच्छेदकत्वाभावादत आह गुणवृत्तीति गुणो वृत्तेरभावः संयोगवति नास्त्येव सन्निक
लेपि गुणवृत्तिद्रव्यत्वादेः सत्तादिनिभावः नन्विदं संयोगिगुणान्यत्वविशिष्टसत्तादित्यत्र गुणवृत्त्यभावो न हेतुसमानाधिकरण
इत्यतः संयोगसाध्यकव्यभिचारिमात्रे यादृशाभावमादाय नातिव्याप्तिस्तत्प्रदर्शयन्ति द्रव्येति द्रव्यसमवेतत्वं गौरवं वेणानप्रति
योगितावच्छेदकं तथात्वेपि वा तदवच्छिन्नाभावो न गुणादौ सत्तायास्तत्र सत्त्वात् तन्मात्रेति द्रव्यान्यासमवेतत्वं तदर्थः व्याप्यवृत्ती

भवति च गुणत्वगुणवृत्तित्वद्रव्यमात्रसमवेतत्वाघवच्छिन्नप्रतियोगिताकव्याप्यवृत्त्यभावप्रतियोगितावच्छेदकगुणत्वाद्यनतिरिक्तवृत्त्येव संयोगत्वमित्याहुः ॥

न्ति तथा च संयोगत्वविशिष्टसंबंधिनिष्ठाभावप्रतियोगितावच्छेदकत्वं न तस्येति न संयोगत्वस्य पारिभाषिकावच्छेदकत्वक्षतिरि
ति भावः यत्तु यत्किंचिदधिकरणावच्छेदेन व्याप्यवृत्तित्वनिर्वचने गौरवादाह वक्ष्यमाणं वेति तथा च सामान्यतः एवाव्याप्यवृत्तित्वं नि
वेशनीयमिति भावः शेषं पूर्ववदिति तन्न साध्यतावच्छेदकसंबंधेनाभावस्य विवक्षणे संयोगेन साध्यतायां तादृशावच्छेदकाप्रसिद्धिः
तादृशव्याप्यवृत्त्यभावप्रतियोगितानवच्छेदकस्य गगनत्वस्य घटत्वादिविशिष्टसंबंधिनिष्ठतादृशाभावप्रतियोगितायां अवच्छेदक
त्वात् साध्यतावच्छेदकसंबंधेन गगनत्वविशिष्टसंबंधिनोऽप्रसिद्धे घटत्वगगनत्वादीनां तादृशावच्छेदकत्वासंभवादिति दिक् प्रग
ल्भीयं लक्षणमाह साध्येति गुणान्यत्वविशिष्टसत्तावान् जातेरित्यत्र

शि·भ·चिं ५६

जातिसमानाधिकरणाभावाप्रसिद्धेस्तद्रूपसाध्यसमानाधिकरणत्वादिति व्याप्तिरतः साध्यतावच्छेदकावच्छिन्नेति तदर्थश्च साध्यता
वच्छेदकसंबंधेन तादृशसाध्याधिकरणे दैशिकविशेषणतया यद्वृत्तित्वं तेन समवायेन सत्तावान् ज्ञानत्वाद्व्याप्त्यादित्यादौ च नातिप्रसं
गः न वा पकालपरिमाणवान् प्रमेयत्वादित्यादौ सर्वेषामेव साध्याभावानां कालिकसंबंधेन वृत्तेरतिप्रसंगः न चैवं कालिकसंबंधावच्छिन्न
प्रतियोगिताकस्याकाशाभावस्याभावस्य साध्ये प्रमेयत्वादिहेतावव्याप्तिः तत्र च साध्याभावस्याकाशाभावात्मकस्य दैशिकवि
शेषणतया सर्वत्र सत्त्वादिति वाच्यम् दैशिकविशेषणतया कालभिन्नवृत्तित्वविशिष्टस्य यो भावस्तस्यापि साध्याभावात्मकस्य

साध्यतावच्छेदकावच्छिन्नसाध्यसामानाधिकरण्यावच्छेदकस्वसमानाधिकरणसाध्याभावत्वकत्वम् ॥ ❀ ॥

कालमात्रवृत्तितया साध्यसामानाधिकरण्याभावात् अवच्छेदकत्वं चानतिरिक्तवृत्तित्वं तेन धूमवान् वह्नेरित्यादौ व्यधिकरणधर्मावच्छि
न्नस्य धूमसमानाधिकरणत्वेपि न क्षतिः स्वेति हेतुतावच्छेदकावच्छिन्नहेतोर्हेतुतावच्छेदकसंबंधेन यदधिकरणं दैशिकविशेषणत
या तद्वृत्तित्वमित्यर्थः तेन द्रव्यगुणकर्मान्यत्वविशिष्टसत्ताद्यमात्मातामाज्जातिमान्मत्वादित्यादौ हेतुतावच्छेदकसमवायसंबंधेन
तदधिकरणे संयोगादौ वर्तमानस्य समवायेन जातिसामान्याभावस्य यथोक्तसाध्याभावस्य साध्यसामानाधिकरण्याभावान्नाव्याप्तिः
धूमवान् वह्नेरित्यादौ च धूमाभावस्यात्मत्वे कालावच्छेदेन साध्यसामानाधिकरण्ये सत्यपि विशेषणतया संयोगोल्लेके वृत्तेरभावस्या
पि साध्याभावतया धूमसामानाधिकरण्याभावादेव नातिव्याप्तिः

एम० ५६

यत्समानाधिकरणे साध्याभावास्तत्प्रमाणसामान्यपरत्वमर्थः तेन व्यधिकरणधर्मावच्छिन्नसाध्याभावप्रमायां साध्यवत्ताज्ञानाप्रतिबंधकत्वेपि
धूमवान् वह्नेरित्यादौ नातिव्याप्तिः प्रमात्वे च यावप्रमभिन्नत्वं तेनाव्याप्यवृत्तेः साध्याभावस्याव्याप्यवृत्तित्वभ्रमदशायां व्यधिकरणधर्मावच्छिन्नसाध्या
भावस्य साध्यतावच्छेदकावच्छिन्नसाध्याभावत्वभ्रमदशायां च साध्यवत्ताज्ञानप्रतिबंधकत्वेपि न क्षतिः साध्यवत्ताज्ञानप्रतिबंधकत्वं च हेत्वधिक
रणमात्रवृत्तिपदार्थमितावच्छेदकं तत्तदवच्छेदेन यत्साध्यवत्ताज्ञानं तत्प्रतिबंधकत्वं तेन वह्निमान् धूमादित्यादावुत्पत्तिकालावच्छेदेन धूमसमाना
धिकरणसंयोगवृत्त्यभावस्य हृदादौ प्रमायां साध्यवत्ताज्ञानप्रतिबंधकत्वेपि न क्षतिः हेतुतावच्छेदकावच्छिन्नत्वादेः स्वसंबंधभेदादेर्विवक्षणं
तत्प्रयोजनं पूर्ववद्बोध्यं सर्वत्रेति तादृशसामानाधिकरण्यावच्छेदकस्वसमानाधिकरणत्वं कमित्यत एवाग्रे स्य यत्समानाधिकरणप्रमात्वाव

यत्समानाधिकरणसाध्याभावत्ताज्ञानप्रतिबंधकत्वेनास्ति तत्त्वं व्याप्तिरिति तु युक्तं सर्वत्र साध्याभावपदवैयर्थ्यात् ॥ ॥

च्छेदेन तादृशप्रतिबंधकत्वं नास्तीत्यत एव द्वितीयस्य सम्यक्त्वादिति प्रथमलक्षणे साध्यतावच्छेदकावच्छिन्नप्रतियोगिसामानाधिकरण्यं द्वि
तीयलक्षणे साध्यतावच्छेदकावच्छिन्नप्रतियोगिमत्ताज्ञानं वाच्यं इत्थं च हेतुसमानाधिकरणघटाभावे तत्प्रमायां च वह्नित्वावच्छि
न्नघटस्याप्रसिद्ध्या तत्सामानाधिकरण्यस्य तज्ज्ञानप्रतिबंधकत्वस्य चाभावात् असंभव इत्युभयत्र साध्याभावपदमुत्र अवच्छेदकत्वे चा
नतिरिक्तवृत्तित्वरूपे साध्यतावच्छेदकावच्छिन्नप्रतियोगिसामानाधिकरण्याभावस्याखंडस्यैव प्रतिबंधकत्वे च कोपानुपपत्तिनियत
त्वरूपे साध्यतावच्छेदकावच्छिन्नप्रतियोगिमत्ताज्ञानाभावस्याखंडस्यैवाभिवेशान्नोभयत्र प्रतियोगिपदवैयर्थ्यमिति तु केचित् ॥ ॥

व्या·भ·वि· ५७

साध्याभाववद्यपरसार्थकीकृत्य कारणतया लक्षणद्वयमपि तुल्यं स्यैवलक्षणमुपन्यस्यति यत्त्विति यद्धेतौ यन्निष्ठतादृशवृत्तित्वसामान्येनेत्यनेनव्य
भिचारिणामुक्तधर्मावच्छिन्नसाध्याभाववद्वृत्तित्वस्य व्यभिचारिहेतुनिष्ठस्याविरोधित्वेपि न क्षतिः विरोधित्वं च ज्ञानतिष्ठविरोधितायाविष
यितयावच्छेदकतायपीत्यधिकरणत्वम् व्यभिचारिहेतुनिष्ठकेवलवृत्तित्वस्य न तथात्वात्साध्याभाववत्त्वीति नचैवमपि व्यभिचारि
रणप्रतिव्याप्तिः साध्यतावच्छेदकावच्छिन्नसाध्याभाववद्वृत्तित्वेन ज्ञानत्वेनैव विरोधितया साध्याभाववद्वृत्तित्वेनासाधकतानुमितमिजनकत्वा
नुमितिसामान्यविरोधित्वनसंभवतीत्यत आह प्रकृतेति साध्यतावच्छेदकसंबन्धेन तत्साध्यकतत्साधनानुमितिकारणीभूतज्ञानविरोधि
त्वमि त्यर्थः तेन समवायावच्छिन्नप्रतियोगिताकवह्न्यभाववति धूमइति ज्ञानस्य समवायेन वह्न्यनुमितिविरोधित्वेपि व्यभिचार

यत्तु साध्याभाववद्वृत्तिर्यद्धेतोः प्रकृतानुमितिविरोधित्वं तत्त्वं व्याप्तिरिति तन्न ॥ ॥ ॥ ॥ ॥

धियो अनुमीत्यविरोधित्वेपि न क्षतिः यत्त्वनुमितिविरोधित्वमनुमितिप्रतिबंधकत्वं तेन तच्च न व्यभिचारइत्यतन्न प्रकृतेति विरोधित्वविशे
षणं तथा चानुमितिकारणीभूतज्ञानप्रतिबंधकज्ञानविषयत्वं प्रकृतानुमितिविरोधित्वं एवं च धूमादिमन्न साध्याभाववद्वृत्तिहेतुरित्याकारकपध
हेतुविशेष्यकज्ञानसामान्येऽनुमितिकारणीभूतज्ञानप्रतिबंधकत्वाभावस्तत्त्वं फलितोर्थः तेन घटाभाववद्वृत्तिर्हेतुरिति ज्ञानस्य घटानु
मितिविरोधित्वादसंभवइत्यतः साध्याभाववत्तीति विशेषणान्तरप्रयोजनं तु पूर्ववदिति तत्त्वनएवमपि साध्याभाववद्वृत्तिर्हेतु घटाभाववद्वृत्ति
श्चेति ज्ञानस्य घटानुमितिविरोधित्वेनासंभवात् नच साध्याभाववद्वृत्तिहेतुत्वेन प्रतिबंधकतावाविषयतायाऽवच्छेदकमितिव्याच्यम्
साध्याभाववद्वृत्तिहेतुत्वमेव यत्र घटानुमितिहेतुतावच्छेदकं तत्र तथात्वस्यापि भवात् न च तत्तावच्छेदकतापानप्रयोगाभिरितिवा
च्यमत्तथापि केवलवृत्तित्वविशिष्टहेतौ तत्पर्याप्त्यभावेन साध्याभाववत्तीत्यस्योक्तव्यावृत्तिदानस्यास

॥ दीधितिटीका ॥ राम॰ ५७

अनुमित्यविरोधित्वज्ञानस्येति अनुमित्यविरोधित्वरूपव्याप्तिविषयकज्ञानस्येत्यर्थः अनुमितिविरोधित्वमनुमितिकारणीभूतज्ञानविरो
धित्वमित्युक्तमतत्कारणं च प्रकृतव्याप्तिज्ञानं तद्विरोधि च न साध्याभाववद्वृत्तित्वज्ञानं वह्निप्रतियोगिकाभाववद्वृत्तिर्धूम इति ज्ञानेनेत्यत
युक्तव्याप्तिग्रहात् किंत्वनुमितिविरोधि साध्याभाववद्वृत्तित्वज्ञानेन यथावत्तादृशविरोधित्वघटितलक्षणोऽसंभवः सद्धेतौ प्रकृतानुमि

अनुमित्यविरोधित्वज्ञानस्यानुमितिहेतुत्वे साध्याभाववद्वृत्तित्वज्ञानस्यानुमि
त्यविरोधितया व्यभिचारिण्यतिप्रसंगात् ॥

तिविरोधि साध्याभाववद्वृत्तित्वाभावात् इतरथात्वव्यभिचारिण्यतिव्याप्तिरितिभावः यद्यनुमितिपदं प्रकृतव्याप्त्यनुमितिपरं तत्र साध्या
भाववद्वृत्तिर्हेतुरित्याकारकम् तथा च यद्धेतुनिष्ठतत्प्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिताकसाध्यतावच्छेदकसंबंधावच्छिन्नसा
ध्याभाववद्वृत्तित्वसामान्ये साध्याभाववद्वृत्तिर्हेतुरित्याकारकज्ञानविरोधिज्ञानविषयतावच्छेदकत्वाभावस्तत्त्वं व्याप्तिरित्यर्थः
क्रियतेत्तदानायं दोषइतिस्मर्त्तव्यम् ॥ ॥

मिश्रलक्षणमेव परिष्कृत्य दर्शयन्ति केचित्त्विति साजात्यं सादृश्यं तच्च तद्भिन्नत्वे सति तद्गतधर्मवत्त्वम् तादृशधर्मश्च तद्वृत्तिपार्थक्येनान्वितितद्वृत्तिपार्थक्या
भेदो धान्येन धनवानित्यवत् तथा चाह्लादकत्वेन चंद्रसदृशं मुखमित्यत्राह्लादकत्वाभिन्नचंद्रवृत्तिधर्माश्रयं मुखमिति शाब्दबोधः एवं
तादृशान्यतररूपेण यावत्साध्याभावसजातीयाद्वृत्तित्वं तादृशान्यतररूप। भिन्नयावत्साध्याभाववद्वृत्तिधर्मवत्त्वं इत्यर्थः तथा च व्यतिरेकि
साध्यके व्याप्तिः तत्र तादृशयावत्साध्याभाववृत्त्यन्यतररूपस्याप्रसिद्धेरतः प्रत्येकमिति तेन च तत्तदभावानां प्रतिस्वीकरूपेण साजात्य
निरूपकता लभ्यते यावत्तामभावानां प्रत्येकनिरूपितत्वं यत्साजात्यं तद्वान्कोप्यभावो व्यतिरेकिसाध्यक इत्यत्रास्तीति तेन प्रत्येकवृत्ति

केचित्तु यावंतः साध्याभावाः प्रत्येकं तत्तत् सजातीयो येन तदधि
करणावृत्तित्वाभावास्तद्वत्त्वं तत्तम् ॥ ॥ ॥

त्वाभावस्य प्रत्येकसजातीयत्वं लभ्यते तदधिकरणेत्यत्र केवलेन तत्पदेन यावत्त्वविशिष्टसाध्याभावानुकर्षणे वह्निमान्धूमादित्यादौ
तत्तद्ह्रदादिवृत्तित्वावच्छिन्नप्रतियोगिताकाभावानां तत् ह्रदमात्रवृत्तीनां यावत्तामधिकरणमप्रसिद्धमतस्तत्तदधिकरणेति यावत्पद
दाने व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकसाध्याभावसजातीयत्वं ह्रदवृत्तित्वाभावस्य व्यभिचारिणि सत्त्वादतिव्याप्तिरिति तत्
डुयातम् समानाधिकरणधर्मावच्छिन्नसाध्याभाववद्वृत्तित्वस्यापि व्यधिकरणधर्मावच्छिन्नाभावसत्त्वाद्व्यभिचारिण्यपि तत्त्वा
न्निरतः सजातीयेति ॥

तस्याप्यभावत्वादिना सजातीयत्वात्तथैवातिव्याप्तिरतस्त्राह साजात्यं चेति समानेति समानं चासमानं च समानासमाने तत्र अधिकरणे
ययोस्तौ समानासमानाधिकरणौ तौ च तौ धर्मौ च ताभ्यामवच्छिन्ना प्रतियोगिता ययोरभावयोस्तत्त्वमित्यर्थः तेन साध्याभावनिष्ठ यत्स्व
प्रतियोगितासमानाधिकरणधर्मावच्छिन्नप्रतियोगिताकत्व स्वप्रतियोगित्वासमानाधिकरणधर्मावच्छिन्नप्रतियोगिताकत्वान्यतर
रूपं तद्वत्त्वं तादृशवृत्तित्वाभावे लभ्यते स्वप्रतियोगितासमानाधिकरणधर्मावच्छिन्नप्रतियोगिताकत्वं च स्वप्रतियोगित्वासमा
नाधिकरणधर्मावच्छिन्नप्रतियोगिताकायेयत्तद्भेदकूटवत्त्वम् एवं स्वप्रतियोगित्वासमानाधिकरणधर्मावच्छिन्नप्रतियोगिताक

साजात्यं च समानासमानाधिकरणधर्मावच्छिन्नप्रति
योगिताकत्वान्यतररूपेण

त्वं च स्वप्रतियोगितासमानाधिकरणधर्मावच्छिन्नस्वप्रतियोगितासमानाधिकरणसंबंधावच्छिन्नप्रतियोगिताकायेयत्तद्भेदकू
टवत्त्वम् तेन न स्वत्वाननुगमो दोषः समनियताभावैक्यमते सर्वस्यैव व्यधिकरणधर्मावच्छिन्नाभावस्य समवायसंबंधावच्छिन्नाका
शाभावाभिन्नात्मकसमानाधिकरणधर्मावच्छिन्नाभावाभिन्नतया तद्भेदकूटवदभावस्याप्रसिद्धेः स्वप्रतियोगितासमानाधिकर
णसंबंधावच्छिन्नत्वमपि प्रतियोगितायां विशेषणम् वस्तुतस्तु समनियताभावैक्यमते आकाशाभावत्वाकाशाभावभिन्नत्वान्य
तररूपेण सजातीयत्वमेव वाच्यम् लाघवादिति ध्येयम् ॥

त्रि·भ·चिं·
५९

पूर्वोक्तद्वितीयेति प्रथमरीत्यैव वह्न्याकाशोभयाभावस्य जलवृत्तित्वविशिष्टद्रव्यत्वाभावस्य वा तादृशस्य सजातीयस्य तद्वृत्तित्वाभावस्तस्य धूमादावभावादसंभवः स्यादिति भावः। अत्र साध्यतावच्छेदकसंबंधेन व्यापकत्वस्य अभावस्य च विवक्षणीयत्वादधिकरणीभूतयत्किंचिद्व्यक्तिवृत्त्यभावप्रतियोगितायां देशिकविशेषणताविशेषसंबंधावच्छिन्नायाः सामानाधिकरण्येनानवच्छेदकं यदभावव्यक्तित्वं तत्त्वं व्याप्यवृत्तित्वं बोध्यम्। तेन संयोगेन साध्यतायां व्याधिकरणधर्मावच्छिन्नाभावस्यैव सर्वाधिकरणावच्छेदेन व्याप्यवृत्तितया तत्सजातीयतद्वृत्ति-

साध्याभावस्य पूर्वोक्तद्वितीयरीत्या प्रत्येकत्वं वा
व्याप्यवृत्तिश्च ॥

त्वाभावस्य व्यभिचारिणि सत्त्वेऽपि नातिव्याप्तिः तद्वृत्तित्वाभावोऽपि व्याप्यवृत्तित्वानिरूपकाधिकरणवृत्तित्वाभावो बोध्यः तेन वह्निमान्धूमात्कपिसंयोगी एतत्त्वादित्यादौ वह्न्यभावस्य कपिसंयोगाभावस्य च जले गुणादौ च व्याप्यवृत्तेः केवलान्वयितया तद्वृत्तित्वस्य व्यापकप्रतियोगिताकस्य सजातीयस्याभावस्य धूमादावसत्त्वेऽपि नाव्याप्तिः व्यापकताघटकसंबंधेनाभावस्य विवक्षणे तु व्याप्यवृत्तित्वस्य किंचिद्व्यक्तिवृत्तित्वांशस्य भावेन न वाच्यम्। धूमवान्वह्नेरित्यादावयोगोलकान्यत्वाभावस्य व्याप्यवृत्तेः सजातीयोऽपि तद्वृत्तित्वाभावस्तस्य वह्न्यावसत्त्वादेवातिव्याप्तिरनवकाशात् ॥

रामः
५९

ननु कालिकसंबंधावच्छिन्नप्रतियोगिताकाकाशाभावस्याभावे साध्ये आत्मत्वादिहेतावव्याप्तिः उक्तसाध्याभावस्याकाशाभावस्य व्याप्यवृत्तेरधिकरणे आत्मत्वस्य वृत्तेरत आह प्रतियोगीति प्रतियोगितावच्छेदकत्वेन संबंधेन साध्यव्यापकतावच्छेदकीभूतयत्किंचित्प्रतियोगितावच्छेदकावच्छिन्नप्रतियोग्यनधिकरणवृत्तित्वविशिष्टत्वं चेह प्रतियोगिव्यधिकरणत्वम्। ज्ञानवानात्ममहाकालान्यतरत्वादित्यादौ वात्मत्वाद्यभावरूपस्य तादृशसाध्याभावस्य काले कालिकसंबंधेन प्रतियोगिसमानाधिकरणत्वात् प्रतियोग्यनधिकरणवृत्तित्वविशिष्टत्वदधिकरणमाकाशादेवं तद्वृत्तित्वाभावस्य हेतौ सत्त्वादव्याप्तिरतः प्रतियोगितावच्छेदकसंबंधेनेति वह्निमान्धूमादित्यादौ न धूमसंयोगस्य वह्निव्यापकतावच्छेदकत्वे धूमसंयोगाभावत्वावच्छिन्नप्रतियोगितावच्छेदकस्य गुणसामान्याभावत्वरूपयत्किंचित्प्रतियोगितावच्छेदकावच्छिन्नानधिकरणवृत्तित्वविशिष्टस्याधिकरणे धूमस्य वृत्तेरव्याप्तिरतः साध्यव्यापकतावच्छेदकीभूतेति गुणसामान्याभावत्वस्य वह्निव्यापकतावच्छेदकत्वाभावान्न तत्र दोषः सर्वस्यैवाभावस्य यत्किंचिदधिकरण-

प्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिव्यधिकरणत्वा तेन तत्र साध्यवत्केऽव्याप्यवृत्तेर्वा साध्यस्य चाभाववति हेतौ वृत्तावपि नाव्याप्तिः ॥

वृत्तित्वविशिष्टस्याभावपूर्वलक्षणे वृत्तित्वविशिष्टस्याभावात्मकतादृशप्रतियोग्यधिकरणवृत्तित्वतादृशाभावाप्रसिद्धिरतो यत्किंचिदिति केवलान्वयिसाध्यके सर्वस्यैव तादृशाभावस्य साध्यव्यापकतावच्छेदकप्रमेयत्वत्वाद्यवच्छिन्नसमानाधिकरणत्वात्प्रतियोगितावच्छेदकेति प्रतियोगिपदोपादानमप्येतदर्थमेव अन्यथा घटादिनिष्ठप्रतियोगितावच्छेदकवाच्यत्वत्वावच्छिन्नसमानाधिकरणत्वात्सर्वेषामभावानामप्रसिद्ध्यापत्तेः अत्र च यत्प्रतियोगिताव्यक्तेर्यदवच्छेदकं तदवच्छिन्नप्रतियोगिताश्रयानधिकरणवृत्तित्वं बोध्यम्। तेन समनियताभावैक्यमतेऽपि घटत्वेन घटाभावस्यापि घटत्वेन तत्त्वत्वाभावाभिन्नतया सर्वस्यैवाभावस्य तत्त्वत्वरूपतादृशप्रतियोगितावच्छेदकावच्छिन्नप्रतियोग्यत्वरूपप्रतियोगिसमानाधिकरणत्वात् केवलान्वयिसाध्यकेऽप्रसिद्धिः इत्थं च घटत्वावच्छिन्नघटाभावाधिकरणत्वे च कवतिलक्षणोक्तदिशा वसेयम्। न च तादृशप्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिसमानाधिकरणाभिन्नत्वं वाच्यम्

२२

त्रि·भ·चिं·
६०

एतादृशाभावभिन्नत्वं प्रमेयत्वादित्यत्रातिव्याप्तिः अभावमात्राधिकरणाकाशाभावस्यातिरिक्तस्यानवस्थाभयेनानङ्गीकारेण तत्र प्रमेयत्वादभावभेदाभावस्येतर
भावात्मकतया तादृशप्रतियोगितावच्छेदकावच्छिन्नसमानाधिकरणत्वनियमेन व्यधिकरणधर्मावच्छिन्नाभावस्यैव तादृशप्रतियोग्यसमानाधिक
रणतया सजातीयत्तद्वृत्तित्वाभावस्य प्रमेयत्वे सत्त्वादिति अस्मद्गुरुचरणास्तु तदभावभेदानधिकरणवृत्तित्वविशिष्टं तदभावभेदाभाववान्
तदभाव एव तद्वृत्तित्वाभावस्य प्रमेयत्वे सत्त्वान्नातिव्याप्तिरिति केचित्तु प्रतियोगितावच्छेदकसंबंधेन स्वप्रतियोगितावच्छेदकावच्छिन्न
भावरूपप्रतियोगिसमानाधिकरणोपधत्तत्तद्भिन्नत्वं वाच्यम् ज्ञानवानात्ममहाकालान्यतरत्वादित्यादावात्मत्वाद्यभावानां काले प्रतियो
गिसमानाधिकरणत्वाद्व्यक्तत्वप्रकारकप्रमाविशेष्यत्वकालत्वप्रकारकप्रमाविशेष्यत्वान्यतराभावस्य च तादृशसाध्याभावस्तद्वृत्तित्वा
भावस्य हेतौ सत्त्वाद्दतिव्याप्तिरतः प्रतियोगितावच्छेदकसंबंधेनेति समनियताभावैक्यमते गोत्वाभावादेरपि गोत्वत्वेन प्रमेयसामान्याभावस
मनियततया द्रव्यत्वाभावादेरपि गुणकर्मान्यत्वविशिष्टसत्ताभावसमनियततया ज्ञेयत्वेनाकाशाभावस्याप्याकाशत्वेन ज्ञेयत्वाभावस
मनियतत्वात् प्रतियोगिसमानाधिकरणत्वात्प्रतियोगिसमानाधिकरणभिन्नाभावाप्रसिद्धेरतः प्रतियोगितावच्छेदकावच्छिन्नेति सर्व
स्यैवाभावस्य स्वरूपेण वृत्तित्वविशिष्टस्वाभावात्मकस्वप्रतियोगिसमानाधिकरणत्वाद्वेति आकाशाभावत्वेन घटाभावस्यापि ज्ञेयत्वेन
घटाभावाभिन्नतया सर्वस्यैव व्यधिकरणधर्मावच्छिन्नाभावस्य ज्ञेयत्वावच्छिन्नाभावसमानाधिकरणत्वात्केवलान्वयिनि तादृशाभावाप्रसि
द्धिरतः प्रतियोगीति साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकरूपावच्छिन्नप्रतियोगिताकाभावोपि भावभिन्नो ग्राह्यः तेन वह्निमान्धूमादि
त्यादौ तत्तद्धूमसंयोगाभावाभावस्य तत्तद्धूमसंयोगस्य निरुक्तप्रतियोग्यधिकरणत्वशालिनोऽधिकरणवृत्तित्वाभावस्य धूमादावसत्त्वे
पि न क्षतिरित्याहुः तच्चिन्त्यम् कपिसंयोगाभावभिन्नं प्रमेयत्वादित्यादौ पूर्वोक्तरीत्या कपिसंयोगाभावभेदाभावस्य कपिसंयोगाभावात्मक

रामः
६०

तया तस्य च कपिसंयोगरूपतादृशप्रतियोगिसमानाधिकरणतया तद्भिन्नत्वाभावेनातिव्याप्तेर्वज्रलेपायितत्वात् आकाशाभावस्य का
लिकसंबंधेनाभावे साध्ये आत्मत्वादि हेतावव्याप्तिश्च तत्राकाशाभावात्मकस्य साध्याभावस्य निरुक्तप्रतियोगिव्यधिकरणत्वशालि
नोऽधिकरणे आत्मत्वादेर्वृत्तेरिति दिक् साध्याभावश्च साध्यतावच्छेदकसंबंधेन बोध्यः तेन वह्निमान्धूमादित्यादौ समवायेन वह्न्यभाव
वति धूमादेर्वृत्तावपि न क्षतिः इत्थं च साध्यतावच्छेदकावच्छिन्नव्यापकतापि तेनैव वाच्या तेन कालिकसंबंधेन वह्निव्यापकस्य घ
टस्य संयोगेनाभाववति धूमस्य वृत्तावपि न क्षतिः अत एवाप्रतियोगिव्यधिकरणत्वम् व्यापकतायां निवेश्य कपिसंयोगाभा
वादेरपि व्यापकतावच्छेदकरूपावच्छिन्नाभावत्वमुपपाद्य पुनस्तद्व्यावृत्त्यर्थं व्याप्यवृत्तीत्यादिविशेषणं प्रक्षालनाद्धीतिन्या
यमनुसरन्ती विदुषां प्रत्युक्तः प्रतियोगिव्यधिकरणत्वगर्भत्वं विना संयोगेन व्यापकत्वस्यैव दुर्वचत्वात्संयोगेन साध्यतापा
मव्याप्तेः केचित्तु व्यापकतावच्छेदकसंबंधेनाभावो वक्तव्यः एवं च संबंधविशेषणं व्यापकतानविशेषणीयेत्याहुः साध्याभावस्या
धिकरणता यादृशसंबंधभेदेन निवेशनीयः कालः कालपरिमाणकान्कालत्वादित्यादौ कालिकसंबंधावच्छिन्नप्रतियोगिता
काकाशाभावाभाववानात्मत्वादित्यादौ च हेत्वधिकरणस्य कालिकतया तादृशसाध्याभावात्मककालपरिमाणाभावाधिकर
णे आत्मनो दैशिकतया तादृशसाध्याभावात्मकाकाशाभावाधिकरणत्वेपि काले आत्मनि च तादृशाभाववद्वृत्तित्वस्य तादृश
प्रतियोग्यनधिकरणवृत्तित्वविशिष्टाभावात्तत्राव्याप्तिरित्यलमतिविस्तरेण साध्याभाववत्त्वरूपेणाभावप्रवेशे निवेशेन्द्रियवृत्तित्वा
भावस्य साध्याभाववद्वृत्तित्वं व्यापकप्रतियोगिताकत्वाभावात्समानाधिकरणधर्मावच्छिन्नाभावसजातीयस्य साध्याभा

ववच्छिन्नत्वं व्यापकप्रतियोगिताकाभावस्य यादृशमाभा
तादृशं ॥

तन्निष्ठेति तत्तत्साध्याभाववद्वृत्तित्वव्यापिका व्यासज्यवृत्तिधर्मानवच्छिन्ना च या प्रतियोगिता तादृशप्रतियोगिताकाः इत्यर्थः। व्यक्ति
विशेषेति धूमाभाववज्जलवृत्तित्वस्य वत्तत्तद्योगोलकावृत्तित्वावच्छिन्नप्रतियोगिताकस्य तत्तद्योगोलकमात्रवृत्तेः साध्या
भावस्य यदधिकरणं तद्वृत्तित्वाभावस्य वह्न्यादावसत्त्वादतिव्याप्तेरभावादाह पार्थिवत्वादीति पार्थिवत्वविशेषितं यन्निर्धूम
वृत्तित्वं तद्वह्नौ नास्ति वह्नेस्तेजस्त्वादिति भावः। व्यासज्यवृत्तिधर्मानवच्छिन्नेत्यस्य व्यावृत्तिमाह द्वित्वाद्यवच्छिन्नेति निर्धूमवृ
त्तित्वधूमवृत्तित्वोभयत्वावच्छिन्नविरहस्य तत्तत्साध्याभाववद्वृत्तित्वविषयकव्यापकप्रतियोगिताकस्य निर्धूमवह्न्यधिक
रणावृत्तित्वनिर्धूमवत्त्वधिकरणवृत्तित्वोभयाभावस्य च तत्तत्साध्याभाववद्वृत्तित्वसमनियतप्रतियोगिताकस्य वह्न्यादौ सत्त्वा
त् वह्न्यवृत्तित्वाभावस्तु तत्तत्साध्याभाववद्वृत्तित्वव्यापकव्यासज्यवृत्तिधर्मानवच्छिन्नप्रतियोगिताकोऽप्रसिद्धः साध्याभा
ववद्व्यक्तिविशेषवृत्तित्वस्य पार्थिवत्वादिविशेषितस्य द्वित्वाद्यवच्छिन्नस्य वा साध्याभाववद्वृत्तित्वस्याभावमादायेनाति
रित्यर्थः। तादृशवृत्तित्वाभावोऽपि व्याप्यवृत्तिर्बोध्यः तेन संयोगात्मकवृत्तित्वाभावस्याव्याप्यवृत्तेर्वृक्षत्वावृत्तित्वविशिष्टवृ प्रमेयवृ:
त्तित्वाभावस्य च व्यभिचारिणि वह्न्यादिमत्त्वादतिव्याप्तिरिति वाच्यम्। स्वन्यूनवृत्तिसमानाधिकरणधर्मेणानवच्छिन्ना या प्रति
योगिता तस्याः तत्तत्साध्याभाववद्वृत्तित्वव्यापकव्यासज्यवृत्तिधर्मानवच्छिन्नत्वविवक्षणात् तादृशी च प्रतियोगिता स्वान्यूनवृ
त्तिसमानाधिकरणधर्मावच्छिन्ना स्वव्यधिकरणधर्मावच्छिन्ना च भवतीति तेन तादृशाभावमादाय दोषः॥ ॥ ॥ ॥

३ + हेतोः सत्त्वेऽपि नातिव्याप्तिः न च वह्न्यादेर्वृत्तित्वेन निर्धूमवृत्तित्वसामान्याभावस्य तत्तत्साध्याभाववद्वृत्तित्वव्यापकप्रतियोगिताकस्य

वृत्तावपीति इदं च संबंधसामान्येन वृत्तित्वाभावविवक्षणे ऽव्याप्तिरभिहिता यदि च संबंधत्वं नैकमिति यत्किंचित्संबंधेनैव तादृशवृ
त्तित्वाभावो विवक्षणीय इत्युच्यते तदा व्यभिचारिण्यतिव्याप्तिरेव द्रष्टव्या इदं च हेतुतावच्छेदकसंबंधेन वृत्तित्वविवक्षणे व
र्तमानः व्याप्यवृत्तितया वर्तमानः तेन संयोगेन द्रव्यसामान्याभावस्य द्रव्यवृत्तेर्व्याप्यवृत्तितानिरूपकाधिकरणगुणादौ संयो
गेन वृत्तेरप्रसिद्धावपि न क्षतिः साध्यतावच्छेदकसंबंधेन व्यापकत्वस्याभावस्य च विवक्षणे वह्निमान् धूमादित्यादौ जातित्वा

अत्र च हेतुतावच्छेदकसंबंधेन साध्याभाववद्वृत्तित्वं बोध्यम् तेन वह्न्यभाववद्वृत्तिस्वावयवे धूमस्य वृत्तावपि न दोषः
इत्थं च साध्याभावोऽपि हेतुतावच्छेदकसंबंधेन कस्यचिदधिकरणे वर्तमानो ग्राह्यः तेन जातिमान् सत्त्वादित्यादौ हे
तुतावच्छेदकसंबंधेन साध्याभाववद्वृत्तित्वस्याप्रसिद्धावपि न क्षतिः॥

वच्छिन्नाभावो न लक्षणघटकः संयोगेन द्रव्यसामान्याभावस्य तथात्वे उत्पत्तिकालावच्छेदेन तस्य द्रव्यवृत्तितया व्याप्यवृत्तिता
निरूपकाधिकरणाप्रसिद्ध्यानुसंधाने नैव व्याप्तिनिश्चयः संभवतीति यद्युपेक्ष्याह जातिमानिति यद्यपि समवायेन साध्यतायामेवो
क्ताभावमादाय प्रसिद्धिस्तथापि साध्यतावच्छेदकावच्छिन्नसाध्याभावाधिकरणे हेतुतावच्छेदकसंबंधेन वृत्तेरप्रसिद्धिप्रति
पादनाय जातित्वरूपेण साध्योल्लेखः इत्थं च जातिमान् सत्त्वादित्यादौ व्यधिकरणधर्मावच्छिन्नाभावमादायैव लक्षणसंगतिर्
बोध्या ॥

ननु द्रव्यं गुणकर्मान्यत्वे सति सत्त्वादित्यादाव्याप्तिः विशिष्टस्यानतिरिक्ततया द्रव्यत्वावच्छिन्नप्रतियोगिताकद्रव्यत्वाभाववद्वृत्ति
त्वस्य सत्तायां सत्त्वेन तदभावासत्त्वात् नैवं गुणकर्मान्यत्वविशिष्टसत्ता गुणादौ नास्तीति प्रतीतिः स्यादिति वाच्यम् गुणकर्मान्यत्ववि
शिष्टसत्तात्वावच्छेदेन गुणादिवृत्तित्वस्य सत्तायामभावात् तादृशविशिष्टावच्छेदकत्वानवगाहिप्रत्ययस्य चेष्टत्वादत आह यद्वे
ति तादृशाः व्याप्यवृत्तयः प्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिव्यधिकरणा वा साध्याभावाः साध्याभावाः साध्यतावच्छेद
कावच्छिन्नव्यापकतावच्छेदकरूपावच्छिन्नप्रतियोगिताकाभावाः तेषामिति तस्य च तस्य च तस्य च तेषामिति सरूपैक
शेषेण तत्तदभावसजातीयत्वलाभः अत्रापि यावत्त्वं प्रत्येकत्वं तदानीं व्याप्यवृत्तित्वस्य हि वृत्तीयरीत्या साध्याभावस्य च प्रयो
जनं पूर्ववद्बोध्यं धूमत्वावच्छिन्नधूमाभावव्यापकस्य वह्नित्वेन घटाभावस्य प्रतियोगितावच्छेदकेन वह्नित्वावच्छिन्नं

यद्वा यावन्तः तादृशाः साध्याभावाः प्रत्येकं तेषां सजातीयस्य व्यापकीभूतस्य व्याप्यवृत्तेरभावस्य प्रतियोगितावच्छे
दकधर्मेण यद्रूपावच्छिन्नप्रतिव्यापकत्वमवच्छिन्नं तेन तद्रूपवत्त्वं तत्त्वम्॥

प्रतिव्यापकत्वादिति व्याप्तिरतः सत्त्वाच्चायमिति साध्याभावसजातीयस्य वह्न्यभावस्य प्रतियोगितावच्छेदकेन वह्नित्वेन व
ह्नित्वावच्छिन्नप्रतिव्यापकत्वादिति व्याप्तिरतो व्यापकीभूतस्येति व्यापकत्वं तु तदभावमात्रवृत्तिधर्मेण विशेषणविशेषणतया चर्चनीयम् तेन वह्न्यभाव
स्याभावत्वादिना धूमाभावव्यापकत्वेपि न क्षतिः न वा महाकालभिन्नकालत्वादिमत्कालत्वाभावस्य कालिकतया महाकालभेदाभावव्यापक
त्वेपि न क्षतिः ______ संयोगेन द्रव्यस्याव्याप्यत्वे तत्र मते धूमवान्वह्नेरित्यादौ वह्न्यभावस्यापि धूमाभावव्यापकत्वात्
पवान्कपिसंयोगादित्यादौ च कपिसंयोगाभावस्यापि रूपाभावव्याप्यत्वे तत्र मते धूमवान्वह्नेरित्यादौ वह्न्यभावस्यापि धूमाभावव्यापकत्वा

अत्र च तादृशाभावस्य हेतुतावच्छेदकसंबंधावच्छिन्नाया प्रतियोगितायाः तदवच्छेदकधर्मेण हेतुतावच्छेदकसंबंधेन हेतुतावच्छेदकावच्छिन्नं प्रतिव्यापकत्वं बो
ध्यम् तेन स्वरूपसंबंधावच्छिन्नद्रव्याभावस्य संयोगेन द्रव्यत्वाभावाभिन्नस्य केवलान्वयिनो धूमाभावव्यापकतयोः स्वरूपसंबंधावच्छिन्नप्रतियोगितावच्छे
दकीभूतवह्नित्वेन वह्नित्वावच्छिन्नं प्रति संयोगेन संयोगसंबंधावच्छिन्नप्रतियोगितावच्छेदकीभूतद्रव्यत्वेन वह्नित्वावच्छिन्नं प्रति समवायेन च
व्यापकत्वेपि न क्षतिः हेतोर्व्याप्यत्वापि हेतुतावच्छेदकसंबंधेनैवेरध्यातेनायमात्मा ज्ञानादित्यत्र विषयतासंबंधेन हेतुता यामात्मविषयकज्ञा
नत्वेन तादृशाभावप्रतियोगितावच्छेदकेन समवायसंबंधावच्छिन्नज्ञानं प्रति विषयतया व्यापकत्वेपि न क्षतिः केचित्तु यत्प्रतियोगितावच्छेदकी
भूतो यो धर्मस्तत्प्रतियोगितावच्छेदकसंबंधेन व्याप्यतावोध्या यत्तु दैशिकरणात्वरूपसंबंधेन वह्न्यभावस्य संयोगेन द्रव्यत्वाभावाभिन्नतया तत्प्र
तियोगितावच्छेदकीभूतसंयोगेन वह्नेर्वह्निव्यापकत्वेपि न क्षतिरित्याहुः तादृशेति तादृशसाध्याभावव्यापकीभूतसजातीयव्याप्यवृत्त्यभावप्रति

साधनं सत्तादृशाभावप्रतियोगित्वं तदवच्छेदकं च साधनतावच्छेदकस्येति तु न वाच्यम् द्रव्यं सत्त्वादित्यादौ सत्त्वादेस्तादृशाभावव्यापकगु
णकर्मान्यत्वविशिष्टसत्ताद्यवच्छिन्नप्रतियोगिताकतादृशाभावप्रतियोगित्वादिति व्याप्तेः तद्यमप्रमेयादित्यादौ प्रमेयत्वादेस्तादृशप्रति

॥योगितानवच्छेदकत्वादव्याप्तेः प्रमेयत्वव्यधिकरणप्रतियोगित्वस्याप्रसिद्धेः ॥

योगित्वमित्यर्थः तदवच्छेदकत्वमित्यत्र तदा च वह्नितोक्तप्रतियोगित्वपरामर्शः लक्षणयोः क्रमेण दोषमाह द्रव्यमित्यादिना तादृशाभावेति द्र
व्यत्वाभावव्यापकसजातीयव्याप्यवृत्त्यभावेत्यर्थः सामवृत्येन प्रमेयसामान्यस्य प्रमेयत्वमपि प्रतियोगितावच्छेदकमतस्तादृशेति मक्तसाध्याभा
वसजातीयाभावप्रतियोगितेत्यर्थः अत एव केवलान्वयिपर्याप्तानुभावेन तत्र व्यधिकरणधर्मावच्छिन्नस्यैव साध्याभावस्य संभवात्प्रमेयत्वव्यधिकरण
प्रतियोगित्वस्याप्रसिद्धा प्रमेयत्वस्य तथानवच्छेदकत्वादिति भावः न च कालिकसंबंधेन प्रमेयत्वस्यात्मादिवृत्तितयानत्वं धर्मप्रतियोगितावच्छेद
कतावच्छेदकीभूतप्रमेयत्वेनात्मनात्मेति प्रसपविषयीभूतमभावमादाय प्रमेयत्वस्यापि व्यधिकरणतयावच्छेदकत्वमिति वाच्यं हेतुतावच्छेदकसंबंधेन
छेदसंबंधेन प्रतियोगितावच्छेदकत्वस्याव श्यं वक्तव्यत्वात् अन्यथा धूमवान्वह्नेरित्यादौ विषयितया वह्निस्वविशिष्टज्ञानादेरभावस्य धूमाभाव

व्यापकस्य प्रतियोगितावच्छेदकमेव वृत्तित्वमिति व्याप्तिः प्रमेयादित्यत्र तु तादृशसंबंधो प्रमाविषयत्वीयस्वरूपसंबंधः न च तेन संबंधेन प्र मेयत्वं न तथेति भावः सजातीयादिपदापरित्यागेन लघुलक्षणमाह यद्वेति तादृशसाध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकरूपावच्छिन्नप्रतियो गिताकाः साध्याभावाः तत्स्वरूपकथनं अत्र च व्याप्यवृत्तित्वमपि त्याज्यम् निष्प्रयोजनकत्वात् व्यतिरेकसाध्यके यावत्साध्याभावीयप्रति योगितावच्छेदकस्याप्रसिद्धेराह प्रत्येकमिति अत्र च तादृशाभावस्य साध्यतावच्छेदकसंबंधावच्छिन्नप्रतियोगिता तदवच्छेदकधर्मेणाऽनेनैव संबंधेन हेतुतावच्छेदकावच्छिन्नं प्रति व्यापकत्वं बोध्यम् तेन कालत्वप्रकारकप्रमाविषयो द्रव्यत्वादित्यत्र कालिकसंबंधेन प्रमेयत्वाभावस्य स्वरूपसंबंधावच्छिन्नसाध्याभावसमनियततया तत्प्रतियोगितावच्छेदकीभूतप्रमेयत्वेन स्वरूपसंबंधेन द्रव्यत्वव्यापकत्वेपि न क्षतिः प्रमेय

यद्वा यावंतस्तादृशाः साध्याभावाः प्रत्येकं तत्तत्प्रतियोगितावच्छेदकेन धर्मेण यद्रूपावच्छिन्नं प्रति व्यापकत्वमवच्छिद्यंते तद्रूपवत्वं तत्त्वमित्याहुः ॥

त्वस्य साध्यतावच्छेदकीभूतस्वरूपसंबंधाच्छिन्नप्रतियोगितानवच्छेदकत्वात् नवायं घटः एतद्घटान्यतरत्वादित्यत्र तादृशप्रति योगितावच्छेदकीभूतघटत्वत्वादिना कालिकतया हेतुव्यापकत्वेप्यतिव्याप्तिः साध्यतावच्छेदकीभूतसमवायसंबंधेनाव्यापकत्वात् । र त्यं च तादृशसाध्याभावस्य तादृशसाध्यव्यापकत्वं च साध्यतावच्छेदकसंबंधेन बोध्यं तेन वह्निमान् धूमादित्यादौ समवायेन वह्न्यभावस्य सा ध्यतावच्छेदकसंबंधावच्छिन्नप्रतियोगिताप्रसिद्धावपि संयोगेन द्रव्यत्वाभावस्य प्रतियोगितावच्छेदकीभूतद्रव्यत्वत्वेन संयोगेनाव्याप कत्वेपि न क्षतिः केचित्तु स्वप्रतियोगितावच्छेदकसंबंधेन साध्यव्यापकत्वात्तेनैव संयोगे वह्न्यभावनिरासः यत्संबंधावच्छिन्नप्रतियो गितावच्छेदकं यत्तेन धर्मेण तेन संबंधेन हेतुं प्रति व्यापकता बोध्या तेन कालत्वप्रकारकप्रमाविषयो द्रव्यत्वादित्यादौ पूर्वोक्तरीत्यातिव्या प्तिरित्याहुः ॥

सार्वभौमलक्षणे समुदायपूर्वदानेन दोषाणामलग्नकत्वात् यद्येन समुदायपदानंतर्भावे दोषेलक्षणमाह यद्वेति साध्याभाववद्वृत्तित्वं हेतु तावच्छेदकसंबंधेन स्वपूर्वोक्तत्वात्तदनुक्ता वृत्तिमद्वृत्तित्वस्य व्याख्यानसंवलितं प्रयोजनमाह तेनेत्यादिना अत्र वृत्तिमत्पदादाने संभवो नास्ति तादात्म्यसंबंधेन विषयितावच्छेदकहेतुतायां व्यधिकरणधर्मावच्छिन्नतादृशसाध्याभाववद्वृत्तित्वव्यापकप्रतियोगिताकस्य व्यधिकरणधर्मावच्छि न्नप्रतियोगिताकाभावस्यैवासंभवात् तादात्म्यसंबंधेन विषयितया च सर्वस्यैव वृत्तिमत्त्वादिति ध्येयं तन्मात्रविवक्षणेन संबंधांतरेण वृत्तिमन्निष्ठत्वं तद भावस्य दर्शितं दूषयंतीति । साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकरूपावच्छिन्नप्रतियोगिताको व्याप्यवृत्तिः प्रथमरीतौ वह्निमान् धूमादि

॥ येन तु वृत्तिमद्वृत्तयो यावंतः साध्याभाववद्वृत्तित्वाभावास्तद्वत्वं व्याप्तिः येन संबंधेन हेतुता तेनैव संबंधेन वृत्तिमत्त्वम पि बोध्यं तेन व्यधिकरणधर्मावच्छिन्नप्रतियोगितकवह्न्यभाववति संयोगेन वृत्तिस्तदभावस्य तादात्म्यादौ वर्तमानस्य धूमा दावसत्वेपि न क्षतिरिति साध्याभावश्च पूर्ववद्बोध्यः ॥

त्यादौ सत्तावान् द्रव्यत्वादित्यादौ च तादृशनानाभिन्नत्वावच्छिन्नाभाववद्वृत्तित्वाभावस्य पृथ्वीवृत्तित्वविशिष्टसत्ताभाववद्वृत्तित्वाभावस्य च धूमेद्र व्ये च भावासंभवः स्यात् व्याप्यवृत्तित्वोपादानाच्च कपिसंयोगाभाववान् द्रव्यत्वादित्यादौ तादृशाभावात्मककपिसंयोगवद्वृत्तित्वाभा वस्य गुणत्वादिविशिष्टद्रव्यत्वादावसत्वेपि न क्षतिः साध्याभावश्च साध्यतावच्छेदकसंबंधेन साध्यव्यापकताघटकसंबंधेन चावबोध्यः तेन वह्निमान् पर्वतवृत्तिरूपादित्यत्र संयोगेन साध्यतायां समवायावच्छिन्नवह्न्यभाववत्त्वमवेतत्वाभावस्य वह्न्यवयवरूपादिनिष्ठस्य हेतावसत्वेपि न क्षतिः ॥

अत्र पूर्वोक्ततत्तत्साध्याभाववद्वृत्तित्वत्वव्यापकव्यासज्यवृत्तिधर्मावच्छिन्नप्रतियोगिताकत्वविवक्षणे आलोकाद्वृत्तित्वावच्छिन्नाभावस्य ता
दृशस्यापादकत्वं न स्याद् धूमे सत्त्वाद्व्याप्तिरिति तदुपेक्ष्य स्वव्यापकेति स्वप्रतियोगितातद्व्यापकत्वतत्तत्साध्याभाववद्वृत्तित्वत्वंतद्व्यापक
प्रतियोगिताकान्यत्वार्थः प्रतियोगिताव्यापकसाध्याभाववद्वृत्तित्वत्वव्यापकप्रतियोगिताकत्वविवक्षणे आलोकाद्वृत्तित्ववृत्तित्वावच्छि
न्नाभावस्य वह्नित्वावच्छिन्नवदभाववद्वृत्तित्वत्वव्यापकप्रतियोगिताकस्य निरुक्तसाध्याभाववद्वृत्तित्वत्वव्याप्यप्रतियोगिताकस्यालो
कवृत्तेर्धूमे भावाद्व्याप्तिर्नो व्यापकतावच्छेदके तत्तदिति तथा च तादृशाभावं शृङ्गग्राहिकयोपादाय तद्वृत्तित्वत्वस्य प्रतियोगिताव्या
पकत्वं वाच्यम् आलोकाद्वृत्तिवृत्तित्वाभावप्रतियोगिता व्यधिकरणधर्मावच्छिन्नवदभाववद्वृत्तित्वत्वव्याप्यान्तु तत्तद्व्यापिका समाना
धिकरणधर्मावच्छिन्नवदभाववद्वृत्तित्वत्वव्यापिका न तु व्याप्येति न तादृशाभावनिरासः धूमवान्वह्नेरित्यादौ साध्याभाववद्वृत्तित्वत्वव्या

तद्वृत्तित्वाभावोऽपि स्वव्यापकतत्तत्साध्याभाववद्वृत्तित्वत्वव्यापकप्रतियोगिताकस्तत्तत्साध्याभाववद्वृत्तित्वत्वातिरिक्ते
न समानाधिकरणेन वृत्तित्ववृत्तिना वा धर्मेणानवच्छिन्नप्रतियोगिताको बोध्यः ॥ ॥ ॥ ॥

पकप्रतियोगिताकस्य व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकाभावस्यैव वह्निमद्वृत्तेः सत्त्वादतिव्याप्तिः व्यधिकरणधर्मावच्छिन्नाभावस्या
पि साध्याभाववत्तया तत्त्वाधारणसाध्याभाववद्वृत्तित्वत्वं प्रतिनिर्दिष्टवृत्तित्वाभावप्रतियोगिताया अव्यापकत्वात्तो व्याप्यतावच्छेदकेऽपि त
न्नाद्वृत्तिर्वह्निमान्धूमादित्यादौ व्यधिकरणधर्मावच्छिन्नसाध्याभाववत्संयोगित्वत्वसमनियतप्रतियोगिताकस्य पर्वतसंयोगित्वतदन्य
संयोगित्वोभयत्वावच्छिन्नाभावस्यालोकवृत्तेः सत्तावान्द्रव्यत्वादित्यादौ व्यधिकरणधर्मावच्छिन्नसाध्याभाववत्समवेतत्वत्वसमनियतप्र
तियोगिताकस्य घटसमवेतत्वघटान्यसमवेतत्वोभयत्वावच्छिन्नाभावस्य घटत्वादिवृत्तेश्च हेतावभावात् ॥ ॥ ॥ ॥

एवं सत्तारूपवान्द्रव्यत्वादित्यादौ तादृशसाध्याभाववत्समवेतत्वत्वसमनियतप्रतियोगिताकस्य तल्लक्षणावच्छिन्नेति द्रव्यसमवेतत्वतदन्यक्ष
णावच्छिन्नसमवेतत्वोभयत्वावच्छिन्नाभावस्य रूपवत्त्वेऽहेतावभावाच्चासंभवः तादृशप्रतियोगिताया व्यासज्यवृत्तिधर्मानवच्छिन्नत्वविशेषणे
पि धूमनिष्ठवृत्तित्वत्वरूपेण वृत्तित्वसामान्याभावस्य व्यधिकरणधर्मावच्छिन्नसाध्याभाववद्वृत्तित्वत्वसमनियतप्रतियोगिताकस्यालोक
वृत्तेर्धूमाद्यवृत्तित्वादसंभवः इत्यत तत्तत्साध्याभाववद्वृत्तित्वेति धूमवान्वह्नेरित्यादौ समानाधिकरणधर्मानवच्छिन्नप्रतियोगिताकस्य व्य
धिकरणधर्मावच्छिन्नप्रतियोगिताकवृत्तित्वाभावस्य हेतौ सत्त्वादतिव्याप्तिरतो निरुक्तं तत्रापि साध्याभाववद्वृत्तित्वत्वातिरिक्तस
मानाधिकरणधर्मानवच्छिन्नप्रतियोगिताकस्य व्यधिकरणधर्मावच्छिन्नाभावस्यैव संभवात्तथैवा- तिव्याप्तिरतस्तन्नदिति केव
लान्वयिसाध्यके व्यधिकरणधर्मावच्छिन्नसाध्याभाववद्वृत्तित्वातिरिक्तधर्मानवच्छिन्नप्रतियोगिताकस्याभावस्याप्रसिद्धिः तादृशसा
ध्याभाववद्वृत्तित्वत्वस्य गुरुतया तदपेक्षया वृत्तित्वस्यैव लघुतयावच्छेदकत्वादतः समानाधिकरणेनेति अत एव साध्याभाववद्वृ
त्तित्वावच्छिन्नप्रतियोगिताकेत्यपि न कृतं नचैवं वृत्तिमद्वृत्तिपदं व्यर्थम् अत्र कल्पद्रुष्टत्वात् केचित्तु तादात्म्येन विषयित्वया च हे
तुतायां व्यधिकरणधर्मावच्छिन्नसाध्याभाववत्तादात्म्यत्वस्य केवलान्वयितया तदवच्छिन्नप्रतियोगिताकस्याभावस्याप्रसिद्धिरतो गुरु
धर्मस्यानतिरिक्तत्वया महानसवृत्तित्वादिकमपि न साध्याभाववद्वृत्तित्वत्वातिरिक्तं अतस्तदवच्छिन्नाभावमादाय तथैवासंभवः अ
तः स्वाविषयकत्वे निर्विषयत्वे तत्तत्साध्याभाववद्वृत्तित्वत्वकत्वेन तत्साध्याभाववद्वृत्तित्वत्वातिरिक्तत्वं निर्वाच्यमतो वृत्तित्वमपि न ता
दृशसाध्याभाववद्वृत्तित्वत्वातिरिक्तं वृत्तित्वत्वाविषयकप्रतीत्या तादृशसाध्याभाववद्वृत्तित्वत्वस्याविषयीकरणात् एवं च वृत्तित्व
त्वावच्छिन्नवृत्तित्वाभावमादाय पूर्वोक्ताव्याप्तिवारणाय तत्कल्पेऽपि वृत्तिमद्वृत्तिपदं सार्थकम् अत्र च तत्तत्साध्याभावप्रतियोगि

सि॰ वि॰ भ॰
६५

वच्छेदकाद्यविशेषितं तत्र व्याप्तिर्नैनोपारायत ह्रदवृत्तित्वस्य स्वाविषयकप्रतीतिविषयत्वं आसमते नालोकवृत्तेरभावस्य वह्नित्वाव
च्छिन्नव्यापकतावच्छेदकरूपावच्छिन्नप्रतियोगिताकतया ऽऽलोकावृत्तित्वाद्यवच्छिन्नप्रतियोगिताक तद्वृत्तित्वस्यालोकावृत्तिविषय
कप्रतीत्यविषयत्वेपि आलोकावृत्तित्वावच्छिन्नाभावमादाय तत्र व्याप्तिः तादृशवृत्तित्वाभावप्रतियोगितासमानाधिकरणात्यायद्वा
पालाद्यवादाहवृत्तिनीवेत्रिता दात्म्येन विषयित्वया चहेतुतायाः केवलान्वयिनि विरुद्ध घटत्वपटत्वाभ्यां प्रवृत्तादृशवृत्तित्वाभावः
सुलभः साध्याभाववद्वृत्तित्वव्यतिरिक्तवृत्तित्ववृत्तिधर्मानवच्छिन्नप्रतियोगिताकस्य धूमत्वाद्यभावस्य धूमादावभावाद्व्याप्तेर्वा
रणाय तद्वृत्तित्वाभावत्वेनेन तद्वृत्तित्वप्रतियोगिताकत्वमभावविशेषणं ननु धूमत्वाभावधूमनिष्ठवृत्तित्वाभावयोः समने
यत्याद्भूम त्वाभावोपि वृत्तित्वप्रतियोगिताक एवेत्यव्याप्तिः न चैवं तत्र साध्याभाववद्वृत्तित्वव्यतिरिक्तेन वृत्तित्ववृत्तिना धूमनिष्ठ
वृत्तित्वत्वेनावच्छिन्नप्रतियोगिताकत्वान्नायमभावो लक्षणघटक इति वाच्यम् तथा सति केवलान्वयिन्यप्रसिद्ध्यापत्तेः
धूमत्वेन तादृशवृत्तित्वाभावस्यापि वृत्तित्वत्वेन घटाभावाभिन्नत्वात् न च तत्र साध्याभाववद्वृत्तित्वव्यतिरिक्तवृत्तित्ववृत्तिध
र्मानवच्छिन्नापि घटत्वेनावच्छिन्नाप्रतियोगितास्तीति वाच्यम् प्रकृतेपि तुल्यत्वात् धूमनिष्ठवृत्तित्वाभावेपि साध्याभाववद्वृत्ति
त्वव्यतिरिक्तवृत्तित्ववृत्तिधर्मानवच्छिन्नधूमत्वत्वावच्छिन्नप्रतियोगितायाः सत्त्वादिति चेत्र साध्याभाववद्वृत्तित्वव्यतिरिक्त
वृत्तित्ववृत्तिधर्मरणावच्छिन्नवृत्तित्वनिष्ठप्रतियोगिताकाभावस्य विवक्षितत्वात् धूमत्वाभावस्तु धूमनिष्ठवृत्तित्वत्वरूपतादृशध
र्मावच्छिन्नवृत्तित्वनिष्ठप्रतियोगिताक इति तमादायाव्याप्तिः न च धूमत्वत्वेन धूमत्ववन्निवृत्तित्वान्यतराभावस्य तादृशस्य धूमा
वृत्तितया ऽव्याप्तिरिति वाच्यम् तत्र एकवृत्तिरीत्या धूमत्वत्वविशिष्टतादृगन्यतरस्यैव प्रतियोगितावच्छेदकत्वेन तस्य तत्र साध्या

राम॰
६५

भाववद्वृत्तित्वव्यतिरिक्ततादृशवृत्तित्वनित्यत्वरूपतद्वृत्तिसमानाधिकरणधर्मानवच्छिन्नत्वेन प्रतियोगितायाविशेषणाद्वा स्वव्यापके त्यस्य फलमा
ह आलोकाद्यवृत्तित्वेनेति निर्वह्निवृत्तित्वं तु घटादिसाधारण्यात् आलोकाद्यवृत्त्यभावप्रतियोगितायान व्यापकमिति भावः तादृशवृत्तित्वत्वव्या
पकप्रतियोगिताकेत्यस्य फलमाह यश्चेति वह्नित्वावच्छिन्नव्यापकतावच्छेदकरूपावच्छिन्नाभावत्वदर्शनाय धूमेनेति साध्यतावच्छेदकसंबं
धावच्छिन्नत्वप्रदर्शनाय पूर्वसंभावेत्युक्तमहानसवृत्तित्वाभावस्य यवतीयधूमादौ सत्त्वेपि धूमत्वावच्छेदेनासत्त्वात् अन्यथानिरुक्तमहानसवृत्तित्वाभाव
स्याप्रर्धनवद्वेहोसत्त्वादिति व्याप्तिस्तथाचासंभव इति भावः महानसादि तिहेतुस्थलेमहानसवृत्तित्वाभावस्य सत्वात् तमादायासंभवस्य
स्फुटत्वात् साधारणशब्दं नाह स्वनिष्ठेति स्वनिष्ठं यत्साध्याभाववद्वृत्तित्वं तद्विरहस्येत्यर्थः प्रमेयहेतुक
स्थलेपि एकप्रमेयनिष्ठतादृशवृत्तित्वस्य प्रमेयान्तरे योऽभावस्तस्य तत्प्रमेये ऽसत्त्वादसंभव इत्यतस्तत्त्वचनायाह हेतुतावच्छेदकेति हे
तेनालोकाद्यवृत्तित्वेन रूपेणायोवह्निसामान्याभाववद्वृत्तित्वस्य यश्चेंधनत्वाद्यवच्छिन्नकत्वभावाधिकरणीभूतमहानसवृत्ति
त्वादेरभावस्तस्य धूमादौ स्वनिष्ठसाध्याभाववद्वृत्तित्वविरहस्य च हेतुतत्त्वरवृत्तेः स्वस्मिन्नसत्त्वेपि न क्षतिरित्याहुः ऽऽ ऽऽ
तु तावच्छेदकसंबंधेन वृत्तिमद्वृत्तित्वप्रदर्शनाय हेतुत्वं तद्वृत्तेरिति तु केचित् क्षतिरव्याप्तिरसंभवश्च यत्तत्साध्यसमानाधिकरणत्वं हेतो
विशेषणं तेन जात्यभाववान्सत्त्वादित्यादौ जात्यभाववत्समवेतत्वस्य तादृशाभावो व्यधिकरणधर्मावच्छिन्नाभाव एवं तस्य च सत्त्वादौ समने
नात्यव्याप्तिरिति तत्र घटादिवृत्तित्वादेरपि जात्यभावव्यापकतावच्छेदकतया तदवच्छिन्नाभाववत्समवेतत्वस्योपरत्वादिवृत्तेः सत्तायामभावा
देवाव्याप्त्यनवकाशात् परंत्त्ववृत्तिसाध्यके वृत्तिहेतुके वा निव्याप्तिवारणाय साध्यसमानाधिकरणत्वं हेतो साध्ये हेतौ वा तादृशवृत्तिम
त्त्वविशेषणमिति तत्तप् अत्रापि महाकालान्यत्वादिसाध्यके कालिकसंबंधेन हेतौ वक्ष्यमाणातिव्याप्तिर्बोध्या कालिकसंबंधेन वृत्तिमद्वृत्ते
र्महाकालान्यत्वाभाववद्वृत्तित्वाभावस्य व्यधिकरणधर्मावच्छिन्नाभावस्यैवसंभवात् परं तु तदतिरिक्ते दोषाणामत्रसंभवइति हेतुत्वपरं

अन्ये त्विति प्रमेयं घटत्वादित्यादौ साध्याभावसमुदायाधिकरणसमवेतत्वत्वसमनियतप्रतियोगिताकस्य समवेतत्वत्वावच्छिन्नप्रतियोगिताकसमवेतत्वाभावस्याभावादिहेतोर्हेत्तावभावादव्याप्तिरतो वृत्तिमद्व्यन्तयद्दत्युक्तं तदर्थश्च पूर्ववद्बोध्यः व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकस्य साध्याभावसमुदायाधिकरणवृत्तित्वाभावस्य व्यभिचारिणि सत्त्वादतिव्याप्तिरत उक्तं यावत्तद्वृत्तिसाध्याभाववद्वृत्तित्वत्वव्यापकप्र[illegible]तियोगिताकत्वविवक्षणे एव समुदायपदव्यावृत्तिरिदानीं संगच्छत इत्याशयेन प्रथमन एव तादृशवृत्तित्वाभावं व्याचष्टे तादृशेति स्वव्यापकेति स्वप्रतियोगितातद्व्यापकं यत्साध्याभावसमुदायाधिकरणवृत्तित्व

अन्ये तु वृत्तिमद्व्यत्ययोपादानतः साध्याभावसमुदायाधिकरणावृत्तित्वाभावास्त इत्यम् तादृशवृत्तित्वाभावश्च स्वव्यापकतादृशवृत्तित्वत्वव्यापकप्रतियोगिताको बोध्यः प्रयोजनं च प्रोक्तप्रायम् ॥ ॥ ॥ ॥ ॥

त्वं तद्व्यापकप्रतियोगिताकइत्यर्थः उक्तन्यायमिति वह्निमान्धूमादित्यत्रालोकावृत्तित्वावच्छिन्नप्रतियोगिताकस्य वह्न्यभावसमुदायाधिकरणावृत्तित्वाभावस्य धूमे सत्त्वात् स्वव्यापकतादृशवृत्तित्वत्वेति तादृशवृत्तित्वत्वव्यापकप्रतियोगितेत्यस्य व्यावृत्तिस्तु न वह्निमान्धूमादित्यादौ तत्र महानसादेः साध्याभावसमुदायाधिकरणत्वाभावात् किन्तु प्रमेयं घटत्वादित्यत्र साध्याभावसमुदायाधिकरणीभूतघटसमवेतत्वाभावस्य तादृशस्य घटत्वे सत्त्वात् तादृशवृत्तित्वत्वव्यापकत्वं प्रतियोगितायामिति ॥ ॥

व्यधिकरणधर्मावच्छिन्नाभावस्यैवेति निरुक्तवृत्तित्वाभावप्रतियोगितानसाध्याभाववद्वृत्तित्वत्वव्यापिका साध्याभावत्वेन साध्याभावस्यैकैवल्लान्वयितया तद्वृत्तत्वस्य धूमादिनिष्ठवृत्तित्वपि सत्त्वादतस्तादृशवृत्तित्वत्वाभावो व्यधिकरणधर्मावच्छिन्नप्रतियोगिताक एव वृत्तिमद्वृत्तिः संभवतीति भावः प्रतियोगिताव्यापकतादृशवृत्तित्वत्वस्यात्र समुदायपदव्यावृत्तिस्त्वालोकावृत्तिवृत्तित्वं नास्तीत्यभावस्य धूमादावव्यापकत्वेनाव्याप्तिवारणाय पूर्ववदिति ध्येयम् न च व्याप्यदले समुदायपदादाने धूमवान्वह्नेरित्यादौ नातिव्याप्तिः गगनवृत्तित्वाभावप्रतियोगितायाः साध्याभावकूटाधिकरणवृत्तित्वत्वाव्याप्यत्वात् निरुक्तवृत्तित्वाभावस्य प्रतियोगितायाः

साध्याभावाधिकरणवृत्तित्वत्वव्यापकप्रतियोगिताकस्य व्यधिकरणधर्मावच्छिन्नस्यैवाभावस्य वृत्तिमद्वृत्तितादात्म्यभिचारिण्यतिव्याप्तिरतः समुदायेति ॥

साध्याभाववद्वृत्तित्वत्वाव्यापकत्वाच्च तादृशाभावाप्रसिद्धेः किन्तु वह्निमान्धूमादित्यत्राव्याप्तिरुक्तक्रमेणेति वाच्यम् व्याप्यदले हि समुदायपदादाने आलोकावृत्त्यभावस्य साध्याभाववद्वृत्तित्वत्वव्यापकप्रतियोगिकत्वाभावान्तमादायाव्याप्तेरसंभवेन स्वव्यापकेत्यादि पूर्वदलमेव न देयम् तथा च वह्निमान्धूमादित्यादौ व्यधिकरणधर्मावच्छिन्नाभावमादायैव लक्षणगमनात् किं तत्तिव्याप्तिरेव अत एव पूर्वदलपरित्यागे साध्याभाववद्वृत्तित्वत्वव्यापकप्रतियोगिताकस्येति केवलमुक्तं यथाश्रुते समुदायपदस्य चालोकावृत्त्यभावोपि तादृशसमुदायाधिकरणवृत्तित्वत्वव्यापकप्रतियोगिताक इति तमादायाव्याप्तिभियेन पूर्वदलं सप्रयोजनमिति भावः

धूम इत्यादिसद्धेतौ तत्र यं नातिव्याप्तिरेवमेव नान्वयिन्यपि तथात्वे साध्यत्वेन तु समवायेन वह्निमति धूमस्य वह्न्यवयवे तत्रस्य च संयोगेन सत्त्वेऽपि
तस्य वृत्त्यनियामकत्वात् तादृशसाध्यके धूमो वह्न्यवयवकत्वं च विरुद्धं तच्च साध्यसामानाधिकरण्यविशेषणेनैव वारणीयम् आका
शादिसाध्यकविरुद्धादिवारणाय तद्विशेषणस्यावश्यकत्वात् अत आह पर्वतवह्न्यवयवसंयोगे चेति समवायेन संयोगेन च वह्नेः
साध्यत्वेऽपि पर्वतवह्न्यवयवे च संयोगो व्यभिचारी इदमुपलक्षणम् कालभिन्नमात्मत्वादित्यत्र दैशिकसंबन्धावच्छिन्नकालभेदा

साध्याभावश्च साध्यतावच्छेदकसंबन्धेन बोध्यः तेन समवायेन वह्नेः साध्यत्वे धूमे संयोगेन च तथात्वे वह्न्यवयवत्वे पर्व
त वह्न्यवयवसंयोगे च पर्वतेऽस्य वह्न्यवयवस्य च संबन्धद्वयावच्छिन्नवह्न्यभाववद्वृत्त्यनधिकरणत्वेऽपि नातिव्याप्तिः ॥

भाव कालिकसंबन्धेनावच्छिन्नकालभेदाभाववद्वृत्त्यधिकरणाप्रसिद्ध्या प्रमेयमात्मत्वादित्यत्र कालिकसंबन्धावच्छिन्नप्रमेय
त्वाभावघटितकूटाधिकरणं कालभिन्नमेव तद्वृत्तित्वाभावस्यात्मत्वेऽसत्त्वात् व्याप्तिरक्षतैव्या संबन्धद्वयेति पर्वतस्य सं
योगावच्छिन्नवह्न्यभावानधिकरणत्वं वह्न्यवयवस्य समवायावच्छिन्नवह्न्यभावानधिकरणत्वमित्यर्थः ॥ ॥

यद्यप्युत्पत्तिकालावच्छेदेनोभयोरभावद्वयाधिकरणत्वमेव तथापि संयोगिसत्त्वादित्यत्रातिव्याप्तिवारणाय विवक्षणीयस्य तदभा
ववव्याप्यवृत्तित्वानिरूपकाधिकरणत्वस्य पर्वते वह्न्यवयवे चासंभव इत्यभिप्रायेणेदम् वस्तुतस्तु तत्तदधिकरणे साध्यतावच्छेदक
संबन्धेन स्वप्रतियोगितावच्छेदकविशिष्टसाध्यवत्ताग्रहविरोधित्वाघटकसंबन्धेनैव साध्याभावाधिकरणता वाच्या न तु संबन्धसामा
न्येन दैशिकसंबन्धेन वा द्रव्यं गुणादित्यादौ कालिकसंबन्धेन साध्याभावकूटाधिकरणे कालेऽगुणस्य वृत्तेः कालिकसंबन्धावच्छिन्न
प्रतियोगिताके आकाशत्वाभावस्याभावे साध्ये तदभावस्याकाशत्वाभावस्य दैशिकतयाधिकरणे आत्मनि आत्मत्वादेर्वृत्तेश्च
व्याप्तेः तथा च संयोगिसत्त्वादित्यत्रापि नातिव्याप्तिः संयोगाभावस्य द्रव्यवृत्तित्वे तत्र संयोगवत्ताग्रहाविरोधित्वेऽपि गुणादिनिष्ठा
यां विरोधित्वात् तद्गोचरस्तत्रायाः सत्त्वात् केवलान्वयिनि च तादृशप्रतियोगितावच्छेदकविशिष्टसाध्यवत्ताज्ञानं भ्रमरूपमेवप्र
सिद्धम् भवति हि घटत्वेन वाच्यत्वं नास्तीत्यभाववत्ताज्ञाने नियमतो घटत्वविशिष्टवाच्यत्ववत्ताधीः प्रतिबन्धः तथा च व्याप्यवृत्ति
त्वेन तदनुरोधेन स्यात् तत्र आणविशेषणानदेयं अत एवाह पर्वतस्य वह्न्यवयवस्य च संबन्धद्वयावच्छिन्नाभावद्वयानाधिकरणत्वेऽपीति
ध्येयम् किंतु कपिसंयोगाभाववानेतत्वादित्यादौ कपिसंयोगघटितादृशसाध्याभावकूटस्य स्वप्रतियोगितावच्छेदकविशि
ष्टसाध्यवत्ताग्रहविरोधिग्रहविषयसंबन्धाप्रसिद्ध्याऽव्याप्तेः व्याप्यवृत्तित्वमन्वयरति अत्र संप्रदायमते इति मतभेदप्रभावविशे
षणादेयम् तेनाकाशाभावसाध्यके नाव्याप्तिः वस्तुतस्तु व्याप्यवृत्तित्वविशेषणेनैव वृत्तिनिरूपाभावो वारित इति ध्येयम् अत्रे
दं बोध्यं द्वितीयदीत्या साध्याभावेन केनापि विपक्षके माघशरा वाव्याप्तिः तत्र द्विपक्षाशत्वावच्छिन्नाभावकूटाधिकरणाप्र
सिद्धेः तेनान्यथा साध्याभावनिर्वक्ति तथेति स्वप्रतियोगितानवच्छेदकीभूतं यत्साध्यतावच्छेदकं तद्व्यापिकायद्भावप्रतियो

गितान्ताद्दृशाभाववद्वृत्त्यर्थः स्वव्यापकेत्यस्य व्यावृत्तिमाह पृथ्वीत्वाभावादाविति वह्निमान्धूमादित्यादौ संयोगावच्छिन्नतन्तद्वह्न्य
ऽवृत्तित्वावच्छिन्नप्रतियोगिताकाभावकूटाधिकरणं गुणाद्येव प्रसिद्धम् अतस्तत्कूटाधिकरणाप्रसिद्ध्या नाव्याप्तिः किन्तु कू
टाधिकरणे हेतुतावच्छेदकसंबन्धेन वृत्तेरप्रसिद्ध्या तादृशाव्याप्तिस्तु निरुक्तसाध्याभावविवक्षेऽपि सत्त्वावान्जातेरित्यादौ भविष्यतीति
यत्रोदाहृत पृथिवीत्वाभावस्य विपक्षः पृथिवीतरवृत्तित्वावच्छिन्नाभावस्य यावत्पृथिवीवृत्तित्वात्कूटाधिकरणस्यैनाप्रसिद्धिरत

तथा स्वव्यापकीभूतसाध्यतावच्छेदकव्यापकप्रतियोगिताकोपि तेनुपत्र पृथिवीत्वाभावादौ साध्ये तद्विपक्षावृत्तित्वाद्य
वच्छिन्नप्रतियोगिताकाभावकूटाधिकरणमप्रसिद्धम् तत्र सद्धेतौ पृथिवीत्वादौ च सप्रमेयजातित्वाद्यवच्छिन्नाभावव
त्सामान्याद्यावर्तमाने द्रव्यत्वप्रकारकप्रमाविषयत्वादौ नाव्याप्तिरतिव्याप्तिर्वा ॥ ॥ ॥ ॥

स्वन्नदिति तत्र सद्धेतौ नाव्याप्तिरित्यनेनान्वयः यावतां मेकाधिकरण्यं संभवतीति विवक्षायामथुक्ताव्याप्तिरुद्धर्तुं शंकयन्न
इत्यत्र आह पृथ्वीत्वादाविति जातित्वावच्छिन्नाभावस्य साधनसमानाधिकरणत्वेन साध्याभावविशेषितेपि वारणासंभवादा
ह आदीति तथा च जलादिवृत्तित्वावच्छिन्नाभावस्यैतत्तोऽष्टवृत्तित्वावच्छिन्नाभावस्य च तादृशस्य कूटाधिकरणे जात्यादावप्रसिद्धेरति
व्याप्तिरिष्ट्या समवायेन हेतुतायां तादृशसाध्याभावकूटाधिकरणे जात्यादौ समवायेन वृत्तेरप्रसिद्धाविव्याप्तिविरहाद्द्रव्यत्वमु
पेक्ष्याह द्रव्यत्वप्रकारकेति सर्वं द्रव्यमिति भ्रमविषयत्वजात्यादावपि सत्त्वादाह प्रमेति ॥ श्रीः ॥ ॥

साध्याभावस्य साधनसमानाधिकरणत्वविशेषणेपि प्रतियोगितायाः साध्यतावच्छेदकव्यापकत्वविवक्षणप्रयोजनमाह नाप्यभावत्वा
दिनेति आदिपदेन प्रमेयत्वेन प्रमेयादेः साध्यतालाभः एवं चात्र व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकाभावस्यैव लक्षणघटकत्व
वापि ध्येयम् तत्तत्साध्येति घटत्वाभावाभावस्य घटत्वस्य पटत्वाभावाभावस्य पटत्वस्य चैकाधिकरणाभावेन तद्वृत्तिकूटाधिक
रणस्य प्रसिद्धेरिति भावः यावतां मेकाधिकरण्यं संभवतीति विवक्षायामपि व्यधिकरणधर्मावच्छिन्नाभावसमूहेन घटत्वस्यैका
धिकरण्यसंभवान्न वृत्तिकूटाधिकरणाद्यवृत्तित्वाभावस्य हेतावभावादव्याप्तिरेव अत एव भूतत्वमूर्त्तत्वान्यतराभाववान् स्पर्श

नाप्यभावत्वादिनाऽभावादौ साध्ये तत्साध्याभावकूटाधिकरणाप्रसिद्ध्याव्याप्तिरित्याहुस्तत्र द्रव्यत्वपृथ्वीत्वोभयवा
न्द्रव्यत्वादित्यादौ तदुभयान्यतरत्वावच्छिन्नाभाववति गुणादौ द्रव्यत्वादेरवृत्तेरतिव्याप्तेः ॥ ॥ ॥

वह्न्यत्वादित्यादावतिव्याप्तिवारणाय यादृशसाध्याभावकूटाधिकरणं साधनाधिकरणं तादृशकूटवृत्तित्वाभाववद्धेतुकत्वमप्यव्या
प्तिरेवेति ध्येयम् न च प्रमेयसाध्यके घटत्वाभावत्वेन प्रमेयसामान्याभावस्य साध्यतावच्छेदकसमनियतप्रतियोगिताकस्य तादृशव्यधिक
रणधर्मावच्छिन्नाभावेन समं संभवदैकाधिकरण्यस्याधिकरणे घटादौ प्रमेयत्वादिहेतोर्वृत्तेरव्याप्तिरिति वाच्यम् । स्वन्यूनवृत्तिस
मानाधिकरणधर्मानवच्छिन्नप्रतियोगितायाः साध्यतावच्छेदकसमनियतत्वविवक्षणात् यावत्प्रमेयवृत्तिष्ठप्रतियोगितायान्यूनवृ
त्तिसमानाधिकरणमिव घटत्वाभावत्वादीति तदवच्छिन्नप्रमेयसामान्याभावस्य लक्षणाघटकत्वात् ॥ ॥ ॥

त्रि·चिं·भ
६९

अत्र च तदभावनिरूपितप्रतियोगिताव्यक्तेः समनैयत्यं वाच्यम् तेन वह्निमान् धूमादित्यादौ वह्नित्वावच्छिन्नव-
ह्न्यभावप्रतियोगितायाः वह्निध्वंसप्रागभावनिष्ठाया घटादित्वेन वह्न्यभावस्यापि वह्नित्वेन घटाभावाभिन्नतया घटादिनि-
ष्ठायाः स्वीयविशिष्टाभावादिनिष्ठाया व्यधिकरणधर्मावच्छिन्नाभावप्रतियोगिताया वा अव्यापकत्वेपि वह्नित्वस्य न क्षतिः
इदं तु प्रतियोगिभेदेपि प्रतियोगितावच्छेदकैक्येन प्रतियोगितैक्यमिति मतेनोक्तम् प्रतियोगिभेदेन प्रतियोगिताभे-
दे तु यत्किंचिदवच्छेदकावच्छिन्नप्रतियोगितात्वेन साध्यतावच्छेदकसमनैयत्यं वाच्यम् तेन नानाव्यक्तिक
संग्रहः न च प्रमेयं वाच्यत्वादित्यादौ घटत्वेन प्रमेयत्वाभावस्यापि घटत्वेन वाच्यत्वाभावाभिन्नतया घटत्वावच्छिन्नप्र-
तियोगितात्वेनापि न प्रमेयत्वत्वसमनैयत्यमिति वाच्यम् प्रमेयत्वभिन्नत्वेन प्रमेयत्वं नास्तीति धीबलात् प्रमेयत्वभे-
दस्यापि तादृशाभावप्रतियोगितावच्छेदकतया तदवच्छिन्नतादृशाभावप्रतियोगितायाः प्रमेयत्वमात्रनिष्ठतया प्र-
मेयत्वत्वसमनियतत्वात् एवं च वह्निभिन्नत्वेन वह्निर्नास्तीति धीबलात् तादृशप्रतियोगितावच्छेदकावच्छिन्नप्रति-
योगितायां वह्नित्वसमनियतत्वात् तदभावोपि लक्षणघटको भवतीति बोध्यम् पृथ्वीसमवेतत्वान्यप्रमेयत्वादित्यत्र पृथ्वी-
समवेतत्वस्य गुरुतया प्रतियोगितानवच्छेदकत्वेपि पृथ्वीसमवेतभिन्नत्वविशिष्टत्वावच्छिन्नप्रतियोगिताकः पृथ्वी-
व्यवच्छिन्नप्रतियोगिताको वाभावः साध्यतावच्छेदकसमनियतप्रतियोगिताकः तेन न तत्राव्याप्तिरिति केचित्

रामः
६९

ननु स्वव्यापकसाध्यतावच्छेदके तत्तत्तावच्छेदकसमानवृत्तिकस्वव्यापकीभूतसाध्यतावच्छेदके इत्यर्थः तथा चनेदं दूषणं साध्यतावच्छेदकीभूतोभयत्व-
स्य व्यासज्यवृत्तितया प्रत्येकपर्यवसितवृत्तिकतादृशप्रतियोगितावच्छेदकान्यतरत्वासमानवृत्तिकत्वादत आह अपि चेति द्रव्यत्वत्वादीनामिव
रात्मत्वादिविशिष्टद्रव्यत्वत्वादीनामवच्छेदकानां संग्रहः ननु सावयवे मते विशिष्टमतिरिक्तमेवेति द्रव्यत्वत्वावच्छिन्नाभावेनोक्तसाध्यतावच्छेद-
कसमनियतप्रतियोगिताकः अनतिरेके तु परपरम्परा पृथिव्यन्यत्वद्रव्यत्वसंबन्धस्यैव तत्र साध्यत्वान्नोक्तदोष इत्यत आह किंत्विति भौम
वि तु विशिष्टपृथ्वीविशिष्टाभावप्रतियोगितया च समनैयत्यं समनियतत्वावच्छेदकत्वम् द्रव्यत्वाभावप्रतियोगिता च पृथिव्यवच्छेदेनापि
द्रव्यत्वे वर्तते न तु तदवच्छेदेन तत्र पृथिव्यन्यत्वविशिष्टद्रव्यत्वत्वमिति द्रव्यत्वाभावेनोक्तसाध्यतावच्छेदकसमनियतावच्छेदकप्रतियोगि-
ताकत्वम् किन्त्वितीत्याहुः परे तु प्रतियोगितावच्छेदकावच्छिन्नसाध्यतावच्छेदकावच्छिन्नयोः समनैयत्यं वाच्यम् तेन द्रव्यत्वत्वावच्छिन्नाभा-
वनिरासः द्रव्यत्वत्वावच्छिन्ने पृथिव्यन्यद्रव्यत्वत्वावच्छिन्नयोः समनैयत्याभावादिति वह्निमान् धूमादित्यत्र वह्निघटाभावं वह्नित्वावच्छिन्न-
वह्न्यभावं चादाय लक्षणसमन्वयः प्रमेयवान् अभिधेयत्वादित्यादौ स्वरूपसंबन्धेन समवायेन साध्यतायां वाच्यत्वत्वादिना सत्तात्वादिना व्या-
अपि चेदं पृथिव्यन्यत्वविशिष्टद्रव्यत्वद्रव्यत्वादित्यादौ द्रव्यत्वत्वाद्यवच्छिन्नाभावकूटाधिकरणगुणादिवृत्तित्वस्य द्रव्यत्वे सत्त्वात् तदव्याप्तेः
द्रव्यत्वत्वाद्यवच्छिन्नप्रतियोगितायाः पृथिव्यन्यत्वविशिष्टद्रव्यत्वत्वसमव्याप्यत्वात् किंचेरूपाभावसाध्यकसद्धेतौ साध्याभावस्याप्रसि-
घटाभावमादाय लक्षणसमन्वयः तथा च स्वव्यापकसाध्यतावच्छेदकेत्याद्यस्य स्वाव॥ यन्निविष्टसकलरूपव्यापकाधिकरणाप्रसिद्धिः ॥ ॥
च्छेदकावच्छिन्नव्यापकतावच्छेदकसाध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकरूपावच्छिन्नप्रतियोगिताकेत्यर्थः अत एव विशिष्टाभावो निरस्तो न च
वाच्यत्वन्यूनत्वादिनेदं प्रमेयमित्यादौ तत्र प्रमेयवान् अभिधेयात् इत्यादौ तदात्मना साध्यतायां तादृशसमनियतप्रतियोगिताकाभावाप्रसिद्धेरिति अप्रसिद्धेरि
तिकालस्य सकलरूपाधिकरणतापि साध्यवत्तादृहविरोधिसंबन्धेनानधिकरणत्वादिति पूर्वोक्तयुक्तेन स्पावद्यवाच्यत्वादिनिषेधम् संयोगाभाव-
साध्यके संयोगरूपसाध्याभावे यत्किंचिदधिकरणाव्याप्यवृत्तित्वाभावात्तादृशसाध्याभावाव्यधिकरणधर्मावच्छिन्नाभाव एव तत्कूटाधिकरण-
स्याप्रसिद्ध्याप्यनुसरणम् रूपस्याव्याप्यवृत्तित्वापत्त्यादि परमाणुरूपाणां व्याप्यवृत्तित्वात् तत्कूटाधिकरणस्याप्रसिद्धिर्बोध्या ॥ ॥

यावत्त्वमिति तथाच व्यधिकरणधर्मावच्छिन्नाभावमादायैव संभवे रेकाधिकरण्यस्यात्र तद्रूपस्याधिकरणाप्रसिद्ध्या संभवान्नाव्याप्तिः पृथिवीति पृथिवी पदमेतत् पृथिवीपरम् अन्यथा घटवायुद्वित्वपरवायुद्वित्वयोः संभवद्वैयाधिकरण्ययोरधिकरणस्य वायोरेव संभवात् द्वित्वाभावस्य द्वैताव सत्वा दतिव्याप्तेरभावात् नन्विदं पृथिवी वृत्तिगुणशून्यं वायुत्वादित्यत्र सद्धेतुरेव जन्यैवायावुत्पत्तिकालावच्छेदेन नित्ये च महाप्रलयावच्छेदेन पृथिवी वृत्तिगुणसामान्याभावसत्वादत आह सत्तान्येति समवेतत्वावच्छिन्नाभावेसाधनाति व्याप्तिसंभावनासंभवेदेकाधिकरण्यसमवेतत्क ्रस्याधिकरणोवायोर्हेतोर्वृत्तेः पृथिवीसमवेतप्रतियोगिकाभावत्वेन साध्यतायां सद्धेतुत्वम् पृथिवीसमवेतत्वावच्छिन्नाभावस्याप्रसिद्धत्वान्न सामान्याघवेन तदभावप्रतियोगितायाः समवेतत्वमात्रावच्छेद्यत्वात् पृथिव्यवच्छिन्नाभावेऽपि समवेताभावसमनियततया समवेतमात्रस्ये

यावतामभावानामेकाधिकरण्यं तावतां समुदाये विवक्षितेऽपीदं पृथिवीवृत्तिगुणशून्यं सत्ताम पृथिवीसमवेतत्वशून्यं वा वायुत्वाद्रूपवद न्यत्वाद्वेत्यादावतिव्याप्तेः तत्र तादृशसाध्याभावस्तोमस्य नियमतो रूपादिघटित तत्वेन तद्वति हेतोरवृत्तेः वस्तुतस्तु निखिलानामेव रूपादीनां तादृशाभावसंहस्य समानाधिकरणत्वात्समानाधिकरण्याव दभावाधिकरणाप्रसिद्धिर्दुर्वारैव ॥ ॥ ॥

वतदाभावत्त्वात्तद्वृत्तिन्त्वकूटाधिकरणत्वस्य वायोसंभवादतः पृथिवीति सत्तान्येति च अत्रापि पृथिवीपदमेतत् पृथिवीपरम् पृथिवी वृत्तिपदं वा पृथिवीपर्याप्तवृत्तिकपरमतेन पूर्वोक्तरीत्या वायावपि तादृशाभावकूटाधिकरणत्वे निधेयं वायुत्वस्य वित्तद्वत्तया साध्यसामानाधिकरण्य विशेषणेनैव वारणादाह रूपवदन्यत्वादिति रूपाभावस्यात्पत्तिकाले पृथिव्यामभिसत्वादाह असत्वादिति एतस्य हेतोर्गुणादौ प्रकृतस्या प्यसामानाधिकरण्यमिति मतम् ननु सत्तान्यपृथिवीसमवेताभावस्य सतान्यद्रव्यसमवेताभावाभिन्नतया सत्तस्य द्रव्यसमवेतमात्रस्यैव तदभावतया संभवदेकाधिकरण्यापन्नवायुमात्रसमवेततदभावकूटाधिकरणोवायोर्हेतोर्वृत्तेर्नातिव्याप्तिरित्यस्वरसादाह वस्तुतस्त्विति तादृशाभावो व्यधिकरणधर्मावच्छिन्नप्रतियोगिताको घटत्वादिना रूपसामान्याभावाः तथाच सर्वाण्येव रूपाणि तादृशाभावसहस्रेणासं

ननु पादृशाभावस्तोमेन समानाधिकरणपादृशसाध्याभावस्तादृशकूटवद्वृत्तित्वाभावायावन्तस्तदत्वं विवक्षितमप्रकृते च तत्र तद्रूपस्य व्यधिकरण धर्मावच्छिन्नाभावस्तोमसमानाधिकरणस्याधिकरणं तत्र द्रूपाधिकरणमेव प्रसिद्धं तद्वृत्तित्वाभावस्य वायुत्वे सत्वादेव नाव्याप्तिरतः किञ्चेति यत्र साध्यतावच्छेदकसमनियतप्रतियोगितात्वव्यापकं यदधिकरणवृत्त्यभावप्रतियोगितात्वं तदेव निरुक्तसमुदायाधिकरणं वाच्यम् प्रकृते च रूपसा मान्याभावनिष्ठायायावद्रूपावच्छिन्नपितायाः प्रतियोगितायाव्यापकत्वात् तद्रूपाधिकरणनिष्ठाभावप्रतियोगितात्वं तादृशप्रतियोगितात्वव्यापक मेवेति तत्र द्रूपाधिकरणमेव तादृशकूटाधिकरणं प्रसिद्धमतः किञ्चेति तत्र प्रथमतस्तवतया विवक्षासंभूतत्वमूर्तत्वान्यतराभाववान्स्पर्शवदन्य त्वादित्यत्रैवस्यमारणातिव्याप्तेरलग्नकतायत्तेः तत्रापि तादृशान्यतराभावनिष्ठायाः प्रतियोगितायाव्यापकत्वान्मनोनिष्ठाभावप्रतियोगितात्वस्य

किञ्च हेतुतावच्छेदकसंबंधेन या साध्याभाववति वृत्तिस्तदभावो वक्तव्यः अन्यथा धूमादावव्याप्तिः साध्यतावच्छेदकसंबंधेन साध्याभा ववति कालादौ वृत्तित्वन्मात्रस्यैव वृत्तेर्व्यभिचारित्वापत्तिप्रसंगो वा तथाच सत्तादिसाध्यके समवायेन संयोगेन वा हेतावव्याप्तिः साध्या भाववतित्तेन संबंधेन वृत्तेरप्रसिद्धेः ॥

तादृशप्रतियोगितात्वव्यापकत्वान्मनसोऽपि निरुक्तकूटाधिकरणत्वेनातिव्याप्तेरसत्वात्साध्याभावसमुदायाधिकरणवृत्तित्वस्य समेव तत्तवृत्त्यादिनाः भावः संबंधित्वेन वा आद्ये धूमादाविति तादृशसाध्याभावकूटवत्सम वेतत्वाभावस्य संयोगेन वृत्तिमत्त्विप्रमानस्य धूमस्याभा वादित्यर्थः अन्त्ये साध्यतावच्छेदके त्यादिकालस्य वृत्तिमन्मात्राधिकरणत्वात्साध्याभावएव तत्र कमथतः साध्यतावच्छेदकसंबंधेनेति तथाच का लिकसंबंधेन साध्यसत्वेऽपि साध्यतावच्छेदकसंबंधेन तदभावानविरुद्धात्लक्षणे च तेन संबंधेनाभावस्य वानिवेशादित्यभावः कालादावि त्यादिना दैशिकतया विशेषितयाच सर्वाधिकरणीभूतदिक् सर्वविषकत्तानादिसंग्रहः व्यभिचारिणि धूमवान्वन्हेरित्यादावनुचरमध्वं सानन्नमाकाशाभावादित्यादौ तत्र तादृशसाध्याभावकूटवच्चरमध्वंससंबंधित्वाभावस्य घटादिप्रागभावात्मकत्वेनिमहत्वेहेतावभा

साधनसमानाधिकरणत्वेनेति इत्थं च सर्वत्र सद्धेतोर्व्यधिकरणधर्मावच्छिन्नाभावस्यैव तादृशस्य साधनसमानाधिकरणत्वात्तमादा
येव लक्षणसमन्वयः। व्यभिचारिणस्तु व्यभिचारनिरूपकाधिकरणवृत्तिसमानाधिकरणधर्मावच्छिन्नाभावस्यापि तादृशत्वात्तमादा
येवनातिव्याप्तिः इत्थं च यथा साध्यतावच्छेदकसमनियतप्रतियोगिताकत्वस्य व्याहतिस्तथा पूर्वमावेदितं न चैवमपि सत्तावान्
नेरित्यादौ गुणान्यत्वविशिष्टसत्ताभावस्य केवलान्यत्वविशिष्टसत्ताभावस्य च तादृशत्वात्तद्घटितकूटाधिकरणसामान्यादौ समवा
येन द्रव्ये प्रसिद्ध्या व्याप्तिरिति वाच्यं विशिष्टस्यातिरिक्तत्वेन गुणान्यत्वविशिष्टसत्तात्वस्य गुरुतया लाघवेन गुणान्य
त्वविशिष्टत्वस्यैवावच्छेदकतया गुणान्यत्वविशिष्टत्वस्य द्रव्यत्वादावपि सत्त्वेन च तादृशाभावप्रतियोगितायाः सत्तात्वस
मनियतत्वाभावात् न नु मूर्त्तत्वं विहिरिन्द्रियग्राह्यजातीयविशेषगुणवत्त्वं मूर्त्तत्वं परिच्छिन्नपरिमाणवत्त्वं तच्च तादृशविशेष

साधनसमानाधिकरणत्वेन साध्याभावाविशेषणीया इति चेन्न विशेष्यत्वात्तथापि भूतत्वमूर्त्तत्वयोरन्यतरत्वेनाभावस्य साध्यस्पर्शवदन्यत्वादावतिव्याप्तिस्तादृशसाध्याभावसमुदायवति पृथिव्यादौ तस्यावृत्तेः ॥ ॥ ॥

गुणपरिमाणपर्यवसन्नं तथा च स्पर्शवदन्यत्वसमानाधिकरणं यद्भूतत्वं मूर्त्तत्वं च शब्दं मनःपरिमाणरूपम् तत्र च पृथिव्यादावविच्छेक
थमतिव्याप्तिरत आह आद्योरिति भूतभेदमूर्त्तभेदान्यतरत्वावच्छिन्नाभाववान् भूतमूर्त्तान्यतरत्वादित्युभयत्रादिपदार्थः भूतत्वमूर्त्तत्वोभयाभा
वे साध्ये स्पर्शवदन्यत्वादिकं सद्धेतुरेवैतेनोन्यतरत्वेनेति स्पर्शसामान्याभावस्यापि नित्यकालावच्छेदेन पृथिव्यादावपि वृत्तेरन्यतरत्वेनेति तादृश
साध्याभावसमुदायवति भूतत्वमूर्त्तत्वघटकसाधनसमानाधिकरणसाध्यतावच्छेदकसमनियतप्रतियोगिताकाभावसमुदायवति न
नु मावत्त्वं फलतस्तादृशप्रतियोगिताकत्वविशेषणम् तथा च साधनाधिकरणे स्वाश्रयद्वारकसंबंधेन संबद्धमावत्साध्यतावच्छेदकस
मनियतप्रतियोगिताकत्वं स्वाश्रयद्वारकसंबंधेन यत्तदधिकरणं तद्वृत्तित्वाभावोर्थः भूतत्वमूर्त्तत्वोभयनिष्ठं च तादृशान्यतराभावत्वाव

त्वमत्वव्यधिकरणधर्मावच्छिन्नप्रतियोगिताकत्वं स्पर्शवदन्यत्वसमानाधिकरणं स्वाश्रयद्वारकसंबंधेन तदधिकरणं मनस्तद्वृत्तित्वाभावस्य स्प
र्शवदन्यत्वे सत्त्वादेवानतिप्रसंगः यद्वा साधनसमानाधिकरणाभावनिरूपिता या वृत्तिः साध्यतावच्छेदकसमानियतप्रतियोगिता प्रत्येकं
तन्निरूपकाभावाधिकरणं यत्तदेव तादृशकूटाधिकरणं भवतीति हि तादृशान्यतराभावत्वावच्छिन्नप्रतियोगितानिरूपकमूर्त्तत्वात्मको
भावघटितकूटाधिकरणमनोपीति नातिप्रसंगः इत्थं च पृथिवीद्रव्यत्वप्रकारकप्रमाविषयत्वाद्भाववान्मेयत्वादित्यादौ चातिव्याप्त्य
व्याप्ती वीरणप्रतियोगिनां साध्यतावच्छेदकव्याप्यव्यापकत्वविलक्षणमपि संगच्छते न चैवमपि विशिष्टस्यानतिरिक्तत्वम
तेषु पृथिव्यन्यत्वविशिष्टद्रव्यत्वं च द्रव्यत्वादित्यादावतिव्याप्तिः जलान्यत्वविशिष्टद्रव्यत्वाभावपृथिव्यन्यत्वविशिष्टद्रव्यत्वाभ
वयोरपि साधनसमानाधिकरणतादृशाभावतया तद्घटितकूटाधिकरणत्वस्य गुणएव संभवादिति वाच्यम् साध्यतावच्छे
दकविशिष्टसाध्यवद्वृत्तित्वसाध्यतावच्छेदकव्यापकीभूतस्वसमानाधिकरणधर्मावच्छिन्नप्रतियोगिताकत्वोभयाभाववत्
स्वरूपप्रतियोगिव्यधिकरणत्वेनाभावस्य विशेषणात् पृथिव्यन्यत्वविशिष्टद्रव्यत्ववति द्रव्यत्वादित्यत्र पृथिव्यन्यत्ववि
शिष्टद्रव्यत्वाभावस्य द्रव्यत्वरूपसाध्यवद्वृत्तित्वसाध्यतावच्छेदकव्यापकीभूतस्वसमानाधिकरणधर्मावच्छिन्नप्रतियोगिताकत्वो
भयवत्त्वान्नोक्तप्रतियोगिव्यधिकरणत्वं तथा च साधनसमानाधिकरणतादृशप्रतियोगिव्यधिकरणाभावो व्यधिकरणध
र्मावच्छिन्नाभावयवतद्वृत्तित्वाभावस्य व्यधिकरणधर्मावच्छिन्नाभावस्य वह्नित्वमद्वृत्तित्वादतिव्याप्तिरतः साध्यतावच्छेदकवि
शिष्टेति सद्धेतौ साधनसमानाधिकरणाभावमात्रस्यैव साध्यवद्वृत्तेर्व्यधिकरणधर्मावच्छिन्नानित्यतादृशाभावाप्रसिद्धिरतः प्र
तियोगिताकत्वं तत्र प्रमेयसाध्यके साध्यतावच्छेदकविशिष्टसाध्यवद्भावस्याकाशात्मकसाध्यवृत्तयाकाशत्वावच्छिन्नप्रतियो
गिताकत्वात्तादृशाभावाप्रसिद्धिरतो व्यापकीभूतेति प्रमेयत्वव्यापकीभूतधर्मावच्छिन्नप्रतियोगिताकत्वं तु समवायसं

शि·विं·भं·
१२

बंधेन प्रमेयसामान्याभावप्रसिद्धेश्च वह्निमान् धूमादित्यादौ घटत्वेन वह्न्यभावस्यापि वह्नित्वेन घटाभावाभिन्नतया तादृशाभावाप्रसिद्धिरतः
स्वसमानाधिकरणाभिन्नत्वे चैवमपि वृत्तित्वाभावस्याव्याप्यवृत्तित्वानंगीकारे संयोगी सत्वादित्यत्राति व्याप्तिः तत्र संयोगसामान्याभावे संयोग
वद्वृत्तित्वसंयोगत्वव्यापकस्वसमानाधिकरणधर्मावच्छिन्नप्रतियोगिताकत्वोभयसत्वे न निरुक्तप्रतियोगिव्यधिकरणत्वस्य व्यधिक
रणधर्मावच्छिन्नाभावस्य वसंभवादितिवाच्यम् तादृशसाध्यवद्वृत्तित्वस्य किंचिदनवच्छिन्नस्य विवक्षितत्वात् तस्य च संयोगाभावेऽ
भावात् संयोगाभावस्य द्रव्यवृत्तित्वायामुत्पत्तिकालादेरवच्छेदकत्वात् न चैवमपि कपिसंयोगाभाववान्नपत्वादित्यादौ संयोगस्यापि
निरुक्तप्रतियोगिवैयधिकरण्यादव्याप्तिरिति वाच्यम् तादृशप्रतियोगिवैयधिकरण्यविशिष्टः सन् यो हेत्वधिकरणेऽनवच्छि
न्नवृत्तिमान् तादृशाभावस्य साधनसमानाधिकरणाभावत्वेन विवक्षितत्वात् संयोगरूपाभावस्य हेत्वधिकरणे किंचिदनवच्छिन्नवृत्ति
मत्वाभावादेव नातिव्याप्तिः संयोगाभावस्य गुणत्वावच्छिन्नवृत्तिकत्वा द्रव्येऽवच्छिन्नवृत्तिकत्वाच्च संयोगसत्वात् द्रव्यादिहेत्वा
दौ नाऽव्याप्तिरव्याप्तिर्वा इत्थं च साध्याभावस्याधिकरणता साध्यवत्ताग्रहविरोधिता संबंधेनापि न विवक्षणीया कालिकसंबं
धावच्छिन्नप्रतियोगिताके आकाशत्वाभावस्याभावसाध्यके तदभावस्याकाशत्वाभावरूपस्याप्यनिरुक्तप्रतियोगिवैयधिकर
ण्यविशिष्टत्वाभावादेवाव्याप्तेरभावात् तदयं निर्गलितलक्षणार्थः निरुक्तप्रतियोगिवैयधिकरण्यविशिष्टानवच्छिन्नवृत्तिकहेत्वधि
करणवृत्त्यभावनिरूपिता यावती साध्यतावच्छेदकसमनियतप्रतियोगितानत्येकं तत्तन्निरूपकाभावस्यानवच्छिन्नवृत्त्यधिकरणं यत्त
द्वृत्तित्वाभावो यावत्तो वृत्तिमद्वृत्तित्वमिति कृत्त्व पृथिव्यन्यत्वविशिष्टद्रव्यत्ववत् व्यद्रूत्वादित्यादौ जलान्यत्वविशिष्टद्रव्यत्वाभावमादा राम·
यातिव्याप्तिः संयोगाभाववान् आत्मत्वादित्यादौ संयोगरूपाभावं साजात्यावज्ञानेरित्यादौ च सत्तात्वावच्छिन्नाभावं चादायाव्याप्तेर्वारणा १२
य योगिव्यधिकरणो हेत्वधिकरणेऽनवच्छि विशिष्टं तं वृत्तिकान्तं वृत्त्यंतं चाभावविशेषणं संयोगी सत्वादित्यादौ तादृशप्रक्रप्रति

न्नवृत्तित्वयेः कपिसंयोगाभावस्तन्निरूपितप्रतियोगितानिरूपकस्याभावस्याधिकरणं जगदेवन्नवृत्तित्वत्वसमनियतप्रतियोगिताकाभा
वाव्यधिकरणधर्मावच्छिन्नाभाववृत्तिमद्वृत्तित्वं त्वितिव्याप्तिरतोऽनवच्छिन्नवृत्ती तत्तादृशवृत्तित्वाभावश्च तादृशवृत्तित्वव्यापकव्यास
ज्यवृत्तिधर्मानवच्छिन्नप्रतियोगिताको ग्राह्यः प्रमेयं सत्वादित्यत्र घटसमवेतत्व घटान्यसमवेतत्वोभयाभावस्य तादृशवृत्तित्वव्यापकप्र
तियोगिताकस्य घटत्वादिवृत्तेः सत्तादावभावात् नवीकारीत्याऽसंभववारणाय अनवच्छिन्नांतं साधनसमानाधिकरणतादृशाभावकूटव
द्वृत्तित्वव्यापकत्वस्यालोकात्तेरभावस्य प्रतियोगितायामसंभवात् तादृशवृत्तित्वत्वमेवाप्यत्वमतियोगितायां न देयमेव तिशेषं दर्शितदि
शा वस्तुम्यमित्यत आह किंचेति केचित्तु स्वनिष्ठसाधनसमानाधिकरणतादृशसाध्याभावकूटाधिकरणसाधनाधिकरणवृत्तित्वाद
शायावदभाववत्वं निरुक्तसमुदायाधिकरणत्वं मूर्तत्वमूर्तत्वान्यतरार्भवगतस्पर्शवदन्यत्वादित्यादौ च तादृशं समनोपपत्ति त्त
द्वृत्तौ स्यवदन्यत्वेनातिप्रसंगः अत्र च साधनसमानाधिकरणपदादानेनिर्वह्नि निष्ठसाध्याभावकूटस्पर्शवदन्यत्वादित्यादौ
च तादृशं समनोपपत्ति तद्वृत्तौ स्यवदन्यत्वेनातिप्रसंगः अत्र च साधनसमानाधिकरणपदादानेनिर्वह्नि निष्ठसाध्याभावकू
टस्य वह्नित्वावच्छिन्नवह्न्यभावघटितस्याधिकरणे साधनाधिकरणत्वाभावात् स्वनिष्ठसाध्याभावकूटाधिकरणसाधनाधिकर
णवृत्तियावत्साध्याभाववाद्वह्निमत्त्वन्न वृत्तित्वाभावस्य धूमादावभावाद् अव्याप्तिः स्यात् अतः साधनसमानाधिकरणान्तं साध्य
नाधिकरणपदादानेरूपाभाववान् द्रव्यत्वादित्यादौ सत्ताभाववान् जातेरित्यादौ च स्वनिष्ठसाधनसमानाधिकरणसाध्याभावकूटा
धिकरणवृत्तेर्यावद्रूपसत्ताद्यभावघटितस्य यावत्साध्याभावस्य यदधिकरणं तस्य हेतुतावच्छेदकसंबंधेन तद्वृत्तित्वस्य चाप्रसि
द्धिः सद्धेतौ तादृशं स्वं जगदेव व्यभिचारिणि वियन्न एव यत्तु वेगादित्यादौ अमूर्त्तनिष्ठं यद् धवत्व मूर्त्तत्वोभयाभावमूर्तत्व पृथिव्य
न्यत्वोभयाभावादि घटितं तत्तादृशसाध्याभावकूटवत्तत्स्य हेत्वधिकरणेऽसत्वात् स्वनिष्ठसाधनसमानाधिकरणसाध्यता

शि॰ चिं॰ भ॰ ७३

च्छेदकव्यापकप्रतियोगिताकाभावकूटाधिकरणसाधनाधिकरणवृत्तिसाध्याभावकूटाधिकरणं मूर्त्तमेव तद्वृत्तित्वाभावस्य हेतावभावाद्व्याप्तेर्मू
र्त्तत्वाभावमूर्त्तत्वाभावान्यतरवान् स्पर्शवदन्यत्वादित्यत्र पृथिव्यादिभिन्नमेव तद्वृत्तित्वाभावस्य हेतावभावाद्व्याप्तेश्च वारणाय साध्यतावच्छेदकव्याप्य
त्वव्यापकत्वे प्रतियोगिताविशेषणे मूर्त्तमनस्त्वादित्यादौ पृथिव्यादौ च निष्ठसाधनसमानाधिकरणसाध्यतावच्छेदकसमनियतप्रतियोगिताकाभा
वकूटाधिकरणसाधनाधिकरणवृत्तिमूर्त्तमनोऽन्यत्वोभयाभावादिघटितसाध्यतावच्छेदकव्यापकप्रतियोगिताकाभावकूटाधिकरणत्वेन तादृ
शं स्वं पृथिव्यादिभिन्नमेव तद्वृत्तित्वाभावस्य हेतावसत्त्वाद्व्याप्तेः मूर्त्तत्वाभावमूर्त्तत्वाभावान्यतरवान् स्पर्शवदन्यत्वादित्यादावव्याप्तेः स्वनिष्ठ
साधनसमानाधिकरणतादृशसाध्याभावकूटाधिकरणसाधनाधिकरणवृत्तिमूर्त्तत्वादिघटितसाध्यतावच्छेदकव्याप्यप्रतियोगिताकाभाव
कूटकत्वं तादृशं च स्वं मूर्त्तादीकरणसाधनाधिकरणवृत्तिमूर्त्तत्वादिघटितसाध्यतावच्छेदकव्या[प्य]प्रतियोगिताकाभावकूटकत्वमेव तद्वृ
त्तित्वाभावस्य हेतावसत्त्वाद्व्याप्तेश्च वारणाय द्वितीयदले प्रतियोगितायां साध्यतावच्छेदकव्याप्यत्वव्यापकत्वविशेषणे एवं च तादृशधर्मत्वाव
च्छिन्नविशेष्यकधीविशेष्यावृत्तित्वसमनियतप्रतियोगिकत्वं वाच्यं तेन वह्निमान् धूमादित्यादौ पर्वतादिरूपं तादृशं स्वं तद्वृत्तित्वसमनियतप्रतियोगि
काभावे सत्त्वेऽपि न क्षतिः न च संयोगी सत्त्वादित्यादावव्याप्तिरिति वाच्यम् साध्याभावकूटाधिकरणतायाः यत्किंचिदनवच्छिन्नवृत्तितानि
रूपितायाः विवक्षितत्वात् एतादृशी चाधिकरणता न द्रव्य न चैवं संयोगाभाववान् मेयत्वादित्यादौ संयोगघटितस्यानवच्छिन्नाधिकरणताया
अप्रसिद्धेरव्याप्तिरिति वाच्यम् साधनसमानाधिकरणसाध्याभावस्य प्रतियोगिव्यधिकरणत्वेन विशेषत्वात् साध्यतावच्छेदकसंबंधेन परमा
त्मप्रतियोग्याधेयताया हेत्वधिकरणीभूतयत्किंचिद्व्यक्तिनिरूपितत्वपरमावप्रतियोगितावच्छेदकावच्छिन्नत्वोभयाभावस्य तादृशाभावस्य वाभावा
तार्थः प्रमेयं घटादित्यादौ प्रमत्वापित्वसाधनसमानाधिकरणसाध्याभावकूटाधिकरणमेवेतत्त्वोभयाभावस्य घटत्वादिघटितेऽघटे घटः भावाद्वृत्ति
त्वव्याप्यत्वं प्रतियोगितायाविशेषणमित्यस्वरसादाह किंचिदित्याहुः तन्न समवेतवान् द्रव्यप्रकारकप्रमाविषयत्वादित्यादावव्याप्तेः अ

सिन्त३

रामः ७३

समवायिनात्यादित्यत्र घटमात्रसमवेतत्वघटवृत्तित्वसमवेतत्वोभयाभावघटान्यमात्रसमवेतघटसमवेतत्वोभयाभावादिघटितसाध्यता
वच्छेदकसमनियतप्रतियोगिकाभावकूटवत्त्वस्य हेत्वधिकरणेऽसत्त्वात् तादृशं स्वं साध्यवद्वृत्तित्वाभावस्य जातित्वप्रका
रकप्रमाविषयत्वरूपे हेतावभावात् एवं वह्निमान् धूमादित्यत्राप्यव्याप्तिः निर्वह्निनिष्ठवृत्तितद्भिन्नवत्त्वोभयाभावघटितकूट
वत्त्वस्य हेत्वधिकरणेऽवृत्तेस्तादृशधूमजनकवह्निमत्त्वं महानसादीनां वह्न्यवयवमादाय विवह्निद्वयवत्त्वादेकमात्रे
वह्निमतो धूमाधिकरणस्याप्रसिद्धेस्तादृशं स्वं वह्निमद्वृत्तित्वाभावस्य धूमेऽसत्त्वात् किंच तावद्वह्निविशेषकधीविशेष्यवृत्ति
त्वसमनियते तत्र तावन्मात्रविशेष्यकधीविशेष्यत्वं तावद्विशेष्यकधीविशेष्यत्वं वा वाच्यम् आद्येऽसंभवः सद्धेतोर्गगन
एव तादृशत्वेन मात्रपदव्यावृत्त्यप्रसिद्धेः अन्त्ये व्यभिचारिण्यतिव्याप्तिः तादृशविषयतात्मकस्वविशेषकसर्वप्रमितिधीविशेष्य
त्वस्य केवलान्वयित्वात् तद्वृत्तित्वव्यापकप्रतियोगिताकस्वव्यधिकरणधर्मावच्छिन्नाभावस्येव वृत्तिमत्त्वसंभवादिति ए
वं प्रमेयसत्त्वादित्यत्राव्याप्तिः घटसमवेतत्वघटान्यसमवेतत्वोभयत्वावच्छिन्नाभावस्य तादृशवृत्तित्वसमनियतप्रतियो
गिताकस्य घटत्वादिहीनेः सत्त्वादावभावादित्यत आह सदापहेया यत्तु स्वनिष्ठसाध्याभावकूटाधिकरणसाधनाधिकरणवृ
त्तिसाध्याभावकूटाधिकरणवृत्तित्वाभावाः साधनाधिकरणवृत्तिमद्वृत्तेर्या यावत्तत्त्वं हेतुत्वम् द्रव्यत्वप्रकारकप्रमाविषयः
सत्त्वादित्यत्र स्वनिष्ठसाध्यतावच्छेदकव्यापकप्रतियोगिताकगुणवृत्तिद्रव्यत्वाभावोभयाभावके मीवृत्तिद्रव्यत्वाभावोभयाभाव
घटितकूटाधिकरणं यत्साधनाधिकरणं तद्वृत्तेरभावकूटस्याधिकरणं द्रव्यमेव एवं स्वनिष्ठगुणवृत्त्यभावघटितसाध्याभावकूट
स्याधिकरणं यत्साधनाधिकरणं तद्वृत्तेरभावकूटस्याधिकरणं स्वं गुण एव एवं स्वनिष्ठकर्मवृत्त्यभावघटितसाध्याभावकूटस्या
धिकरणं यत्साधनाधिकरणं तद्वृत्तेरभावकूटस्याधिकरणं स्वं कर्मैव तथा च तादृशं स्वं सत्तावन्मात्रमेव तद्वृत्तित्वं च समान

यत्प्रतियोगिताकस्य साधनाधिकरणवृत्तिमद्‌वृत्तेर्व्यधिकरणधर्मावच्छिन्नाभावस्यैव संभवादतिव्याप्तेर्मूर्त्तत्वमूर्त्तत्वोभयवान्मूर्त्तमूर्त्ता
न्यतरत्वादित्यत्र स्वनिष्ठसाध्यतावच्छेदकव्याप्यप्रतियोगिताकघटान्यत्वविशिष्टमूर्त्तत्वाभावघटितकूटस्याधिकरणं तद्‌व्रजेऽभावकूटस्याधिक
रणं स्वंपटो घटवत्तथा च तादृशस्य मूर्तमात्रमूर्तमात्रवृत्तित्वाधिकरणवृत्तिमद्‌वृत्तेस्तादृशस्य वृत्तित्वाभावस्य व्यधिकरणधर्मावच्छिन्नाभावस्यैव
संभवादतिव्याप्तिश्चवारणाय साध्यतावच्छेदकव्याप्यत्वव्यापकत्वप्रतियोगितायां विशेषणे पृथिवीद्रव्यत्वप्रकारकप्रमाविषयत्वादित्यत्र स्वनि
ष्ठतादृशाभावाधिकरणसाधनाधिकरणवृत्तिसाध्यतावच्छेदकव्यापकत्वाभावस्य हेतोः सत्त्वादतिव्याप्तिवारणाय चरमदले साध्यतावच्छे
दकव्याप्यत्वे प्रतियोगितायां विशेषणं अत्र च साध्यतावच्छेदकव्यापकत्वं निपात्यम् अभाववान्‌ऽपत्वादित्यादौ घटत्वपटत्वाद्यात्मकसा
ध्यतावच्छेदकव्याप्यप्रतियोगिताकस्य च स्वमाराप्रतियोगिव्यधिकरणताभावाखामप्रसिद्धिसंपादकत्वाभावादित्तिध्येयम् द्रव्यं गुणादित्यत्र
स्वनिष्ठसाध्याभावकूटाधिकरणसाधनाधिकरणवृत्तिसाध्याभावकूटाधिकरणं द्रव्यमेव गुणादिनिष्ठसाध्याभावकूटस्य द्रव्यत्वत्वाव
च्छिन्नाभावघटितस्य साधनाधिकरणधर्मावच्छिन्नप्रतियोगिताकस्य पृथिव्यन्यत्वविशिष्टद्रव्यत्ववद्‌व्यक्त्वादित्यत्र स्वनिष्ठसाध्याभावकूटा
धिकरणसाध्यनाधिकरणवृत्तिसाध्याभावकूटाधिकरणं स्वं सर्वमेव द्रव्यम् स्वनिष्ठपृथिवीवृत्तित्वविशिष्टद्रव्यत्वाभावघटितकूटाधिक
रणसाधनाधिकरणवृत्तिसाध्याभावाधिकरणं स्वं पृथिव्यन्यद्रव्यमेव स्वनिष्ठपृथिव्यन्यत्वविशिष्टद्रव्यत्वाभावघटितसाध्याभावकू
टाधिकरणवृत्तिसाधनाधिकरणवृत्तिसाध्याभावकूटाधिकरणं स्वं पृथिव्यपि एवञ्च द्रव्यवृत्तिवृत्तितादृशकूटाधिकरणीभूतद्रव्य
वृत्तित्वाभावो व्यधिकरणधर्मावच्छिन्नाभाव एवेत्यतिव्याप्तिरतः प्रथमदले प्रतियोगिव्यधिकरणेति तदर्थश्च स्वविशिष्टहेत्वधिकरणाव
च्छेदेन पाप्ता साध्यतावच्छेदकाश्रयधर्माश्रयवृत्तित्वं यत्र साध्यवृत्तिधर्मावच्छिन्नप्रतियोगिताकत्वं तदुभयाश्रयान्यत्वम् एवञ्च घटाद्य राम·
न्यत्वविशिष्टद्रव्यत्ववद्‌द्रव्यत्वादित्यादौ व्यधिकरणधर्मावच्छिन्नाभावस्यैव निष्ठस्य तादृशाभावत्वात्साधनाधिकरणनानाविपक्षस्य

ऽस्वनिष्ठतादृशसाध्याभावकूटाधिकरणसाधनाधिकरणतत्त्वद्विपक्षान्यवृत्तित्वविशिष्टद्रव्यत्वे सत्त्वान्नातिव्याप्तिः साध्यतावच्छेदकसमनि
यत्प्रतियोगिताकत्वविशेषणस्य फलाभावपरमवद्‌घटाभाववद्घटकं हेत्वधिकरणावच्छेदेनेति तथा च पृथिवीत्वविशिष्टद्रव्यत्वाभावादि
रपि न हेत्वधिकरणावच्छेदेन साध्यवद्‌वृत्तिरतः स्वविशिष्टेति॥ द्रव्यं गुणादित्यादौ स्वनिष्ठतादृशसाध्याभावकूटाधिकरणसाधनाधिकर
णवृत्तिसाध्याभावकूटत्वं न कुत्रापि घटनिष्ठतादृशसाध्याभावकूटाधिकरणसाधनाधिकरणयन्निष्ठपटान्यवृत्तित्वविशिष्टद्रव्यत्वाभा
वघटितकूटस्य घटेऽवृत्तेः पटनिष्ठतादृशसाध्याभावकूटाधिकरणसाधनाधिकरणघटवृत्तिघटान्यवृत्तित्वविशिष्टद्रव्यत्वाभावघ
टितकूटस्य पटेऽवृत्तेरित्यतिव्याप्तिवारणाय चरमदलेऽपि प्रतियोगिव्यधिकरणत्वमभावविशेषणं तदर्थस्तु साध्यतावच्छेदकविशिष्टसा
ध्यवद्‌वृत्तित्वसाध्यवृत्तिधर्मावच्छिन्नप्रतियोगिताकत्वोभयाभाववत्त्वं पटान्यत्वविशिष्टद्रव्यत्वाभावस्य गुणादावेव तादृशप्रतियोगि
व्यधिकरणत्वेऽपि न हि विशिष्टस्य तादृशसाधनाधिकरणे वृत्तित्वं भावान्नाव्याप्तिः पृथिव्यन्यद्रव्यत्ववद्‌व्यक्त्वादित्यत्र पृथिव्यन्यत्व
विशिष्टद्रव्यत्वाद्यभावस्य साध्यद्रव्यत्ववद्‌वृत्तित्वद्रव्यत्ववृत्तिधर्मावच्छिन्नप्रतियोगिताकत्वोभयवत्त्वान्नोक्तप्रतियोगिव्यधिकरणप
र तथा च स्वनिष्ठतादृशसाध्याभावकूटाधिकरणसाधनाधिकरणघटादिवृत्तेरुक्तप्रतियोगिव्यधिकरणस्याप्रसिद्धत्वाद्व्यधिकरणधर्माव
च्छिन्नप्रतियोगिताकयावदभाववत्साधिकरणस्य द्रव्यमात्रं तद्वृत्तिस्तादृशवृत्तित्वाभावो व्यधिकरणधर्मावच्छिन्नप्रतियोगिताक
एव तस्य च द्रव्यत्वे सत्त्वादतिव्याप्तिर्वारणाय साध्यतावच्छेदकविशिष्टेति तादृशकूटाधिकरणवृत्तित्वाभावश्च तादृशकूटाधिकरण
वृत्तित्वव्यापकव्यासज्यवृत्तिधर्मानवच्छिन्नप्रतियोगिताको बोध्यः तेन वा चं द्रव्यत्वादित्यादौ तादृशकूटाधिकरणवृत्तित्वत्वसमनिय
तप्रतियोगिताकस्य घटवृत्तित्वघटान्यवृत्तित्वोभयाभावस्य सत्त्वादित्यनन्तातिव्याप्तिः तत्र संयोगाभाववद्वितीयदले निरुक्तप्रतियोगिव्यधिक
रणत्वाभावेन व्यधिकरणधर्मावच्छिन्नाभावस्यैव तादृशत्वेन तत्कूटाधिकरणवृत्तित्वाभावस्य वृत्तिमद्‌वृत्तेर्व्यधिकरणधर्माव

च्छिन्नाभावस्यैव संभवात्तादृशवृत्तित्वस्य व्यधिकरणधर्मावच्छिन्नाभाव
वृत्तित्वप्रमेयत्वादिकं तादृशात्वा॥

किञ्च तादृशंयघत्वं तावन्मात्रविशेष्यकताधीविशेष्यवृत्तित्वाभावस्तावद्विशेष्यकधीविशेष्यवृत्तित्वाभावो वाक्यः तथा च तावन्मात्रवि
शेष्यकोक्तोपमेयं वा घटत्वादित्यत्राप्रसिद्धिः गगनत्वेन तादृशत्वेन मात्रपदव्यवच्छेद्याप्रसिद्धिः गात्रपदानन्तर्भावे व्यभिचारिण्यतिव्या
प्तिः तत्र गगनस्य विषयतात्मकतादृशस्वविशेष्यकमितिधीविशेष्यत्वाद्गगनवृत्तित्वे तत्व्यापकप्रतियोगिताकाभावस्यव्यधिकरणधर्मा

किञ्च महाकालान्यत्वादिसाध्यके व्यभिचारिणि कालिकविशेषणतावच्छेदेन हेतावतिव्याप्तिः तादृ
शसाध्याभावसमुदायवत्ति महाकाले तेन संबंधेन वृत्तिमन्मात्रस्यैव वृत्तेः ॥ ॥ ॥ ॥

वच्छिन्नाभावस्यैव वृत्तिमद्वृत्तित्वादित्यादिकं कालान्यत्वे साध्ये कालिकसंबंधेन हेतुर्विरुद्ध एव तत्र द्वारत्वाञ्च साध्यसमानाधि
करणत्वेनैवांतो महेति तेन संबंधेन कालिकविशेषणताविशेषणास्वभिन्नमत्तद्रूपाभिन्नगुणत्वात्ज्ञानात्वृत्त्यादौ समवायेन
विषयतापाभाहेतावतिव्याप्तिः तादृशकूटाधिकरणे तद्रूपाभिन्नसमवेतत्वसमनियतप्रतियोगिताकस्यैतद्रूपभिन्नविषयत्वत्वस
मनियतप्रतियोगिताकस्यव्यधिकरणधर्मावच्छिन्नाभावस्यैव वृत्तिमद्वृत्तित्वादिति ॥ ॥ ॥ ॥ ॥

वृत्तित्वाभावस्याव्याप्यवृत्तित्वमेतेन हेतुतावच्छेदकसंबन्धेन हेत्वधिकरणावच्छेदेन वृत्तिमद्वृत्तितादृशवत्तित्वाभावसमुदायवत्त्वं वाच्यम् एवं च महा
कालान्योघटादेतद्रूपाभिन्नगुणत्वादित्यत्र खण्डकालावच्छेदेन घटादिवृत्तेस्तादृशकूटाधिकरणमहाकालवृत्तित्वाभावस्यैतद्रूपावच्छेदेन गुणत्वा
दिवृत्तेस्तादृशकूटाधिकरणे तद्रूपभिन्नसमवेतत्वाभावस्य हेत्वधिकरणमहाकालानवच्छेद्यत्वाद्धेत्वधिकरणे तद्रूपभिन्नानवच्छेद्यत्वाच्च ना
तिव्याप्तिः वृत्तिमद्वृत्तित्वं च हेतुतावच्छेदकसंबंधेन पक्षे पदधिकरणं तदवच्छेदेन तद्यत्किञ्चिद्वृत्तित्वं तेन वह्निमान्धूमादित्यादौ द्रव्यगुणादित्यादौ च म
हाकालादेर्हेतुतावच्छेदकीभूतवृत्तिनियामकसंयोगेन समवायेन वा घटाद्यनधिकरणत्वेन महाकालाद्यवच्छेदेन घटादिनिष्ठस्य साध्याभा
वकूटाधिकरणसंयुक्तत्वसमवेतत्वत्वव्यापकव्यासज्यवृत्तिधर्मानवच्छिन्नप्रतियोगिताकस्य तादृशसंयुक्तत्वत्वावच्छिन्नप्रतियोगिता
काभावस्य समवेतत्वत्वावच्छिन्नप्रतियोगिताकस्य चाभावस्य हेत्वधिकरणावच्छेदेनासत्वे विनक्षतिः वृत्तित्वाभावस्य व्याप्यवृत्तित्वे पि
तादृशसाध्याभावकूटाधिकरणवृत्तित्वस्यावच्छेदकतासंबंधेन योभावो हेतुतावच्छेदकसंबंधेन यत्किञ्चित्पदार्थाधिकरणवृत्तिस्तादृशयाव
दभाववत्त्वं यद्धेत्वधित्वधिकरणावच्छेदेन तत्त्वं व्याप्तिरिति महाकालान्यो घटादित्यत्र तादृशसाध्याभावकूटाधिकरणीभूतमहाका
लवृत्तित्वस्यावच्छेदकतासंबंधेनाभावाः खण्डकाले सत्त्वेन तु महाकाल इति हेत्वधिकरणावच्छेदेनासत्त्वान्नातिव्याप्तिः इत्थं च प्रमे
यं घटत्वादित्यत्र साध्याभावकूटाधिकरणीभूतगगनसमवेतत्वस्यावच्छेदकतासंबंधेनाभावेज्ञात्वादौ तस्य च घटरूपहेत्वधिक
रणावच्छेदेनासत्वादव्याप्तिरतो हेतुतावच्छेदकसंबंधेन यत्किञ्चित्पदार्थाधिकरणवृत्तीति लक्षणस्य वृत्तिमद्वृत्तिपदस्यापि समस्वा
र्थः शेषं पूर्ववत्क्ष दिशा वसेयम् एतेनेत्यादि एतेन महाकालान्यत्वादिसाध्यके कालिकविशेषणताविशेषेण हेतावतिव्यापकत्वे
न एवमीश्वरत्वान्यभिन्नं घटादित्यत्रापि विषयिताया हेतावतिव्याप्तिर्वोध्या एतद्रूपभिन्नं गुणत्वाज्ज्ञानत्वादौ तु साध्यवत्प

कतावच्छेदकतत्तद्व्यक्तित्वावच्छिन्नप्रतियोगिताकाभावकूटाधिकरणस्याप्रसिद्धेर्यादृशसाध्याभावस्तोमाधिकरणं साधनाधि
करणं तादृशस्तोमवद्वृत्तित्वाभावस्यैकैकत्र तादृशस्तोमवद्वृत्तित्वस्य गुणत्वे सत्त्वान्नातिव्याप्तिः अत एव पृथिव्यन्यद्रव्यत्ववद्
व्यत्वादित्यादौ घटान्यत्वविशिष्टद्रव्यत्वाभाववपन्यत्वविशिष्टद्रव्यत्वाभावानामपि साधनसमानाधिकरणत्तादृशाभाववत्तया
तादृशकूटाधिकरणगुणादिवृत्तित्वाभावस्य द्रव्यत्वे सत्त्वेऽपि नातिव्याप्तिः तत्र घटान्यत्वविशिष्टद्रव्यत्वाभावघटितस्तोमा
धिकरणं साधनाधिकरणं घटाद्यवृत्तिवृत्तित्वाभावस्य द्रव्यत्वे सत्त्वात् सत्तावान् जातेरित्यादौ च विशिष्टसत्ताभावादीनां हेतुसमा

एतेन साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकरूपावच्छिन्नप्रतियोगिताकव्याप्यवृत्तिस्वस
नाधिकरणयावदभावाधिकरणवृत्तित्वाभावो यावन्तो वृत्तिमद्वृत्तयस्तद्वृत्तं व्याप्तिः ॥ ॥

नाधिकरणानां साध्यव्यापकतावच्छेदकतावच्छेदकरूपावच्छिन्नप्रतियोगिताकत्वाभावो सत्त्वे नाव्याप्तिः अभावः साध्यतावच्छे
दकसंबंधेन बोध्यः तेन समवायेन वह्न्यभाववति धूमस्य वृत्तावपि न दोषः इत्थं च साध्यव्यापकतापि तेनैव संबंधेन वाच्या तेन
कालिकसंबंधेन वह्निव्यापकस्य घटादेः संयोगेनाभाववति धूमस्य वृत्तावपि न क्षतिः इत्थं च व्याप्यवृत्तित्वं किंचिदवच्छिन्नाया
वृत्तिमत्त्वं तेन धूमवान् वह्नेरित्यादौ धूमाभावस्याव्ययगोलकेनावच्छिन्नवृत्तिकत्वाद्व्याप्यवृत्तित्वं तद्विशिष्टस्य साधनसमानाधिक
रणत्वे तद्विशिष्टतादृशसाध्याभाववद्वृत्तित्वाभावश्च बोध्यः तेन संयोगिघटादिमत्त्वसाधनसमानाधिकरणसंयोगाभावघ

टितस्य कूटस्याव्याप्यवृत्तित्वविशिष्टस्याधिकरणं गुणाग
वत्त्रहेतुतावच्छेदकीभूत ॥

७६

संयोगसंबंधेन वृत्तेरप्रसिद्ध्याव्याप्तिः न वा संयोगेन धूमाभावस्य केवलान्वयितया तद्वृत्तित्वव्यापकप्रतियोगिताकस्याव्य
धिकरणधूमावच्छिन्नाभावस्यैव वृत्तिमद्वृत्तित्वाद्धूमवान् वह्नेरित्यादावतिव्याप्तिः पृथिवी द्रव्यत्वप्रकारकप्रमाविषयत्वादित्यादौ
तत्ताद्वृत्त्यभावत्तेनोद्वृत्त्यभावघटितस्य साध्यव्यापकतावच्छेदकरूपावच्छिन्नप्रतियोगिताकस्य साधनसमानाधिकरण
स्य साध्यतावच्छेदकसंबंधावच्छिन्नप्रतियोगिताकाभावकूटस्याधिकरणे जात्यादौ हेतोरवृत्तेर्नातिव्याप्तिरतः कूटान्तापत्तस्य

केवलान्वयिनः संयोगाद्यभावस्याभावसंयोगादयो न व्याप्यवृत्तयः ॥ ॥ ॥

साधनसमानाधिकरणत्वं वाच्यम् तदर्थश्च यादृशसाध्याभावस्तोमाधिकरणं साधनाधिकरणं साधनाधिकरणं तादृश
स्तोमवद्वृत्तित्वाभावः इत्थं च तत्ताद्वृत्त्यभावघटितस्तोमाधिकरणं साधनाधिकरणं न मेव तद्वृत्तित्वाभावस्य द्रव्यत्व
प्रकारकप्रमाविषयो सत्त्वादेव नातिव्याप्तिः वह्निमान् धूमादित्यादौ तत्तत्संयोगाभावत्वरूपसाध्यकतावच्छेदकरूपावच्छिन्न
प्रतियोगिताकस्य तत्तत्संयोगात्मकाभावस्य साध्यतावच्छेदकसंबंधावच्छिन्नत्वाभावान्नाव्याप्तिर्घटत्वादिना तदुपेक्ष्य संयो
गाभाववान् इत्यादित्यत्राव्याप्तिवारणाय व्याप्यवृत्तिपदमिति दर्शयति केवलान्वयिन इति ॥ ॥ ॥ ॥

त्रि·चिं·म·
७०

व्याप्यवृत्तित्वविशिष्टतादृशाभावविवक्षाया फलं दर्शयितुं यत्किंचिदधिकरणे व्याप्यवृत्ति साध्याभावमादायाप्रसक्त्यपवि
षेधयन्नाह स्वं साध्यमित्यादि गुणसामान्याभावस्य गुणादौ व्याप्यवृत्तित्वेपि तद्विशिष्टस्य द्रव्यत्वाधिकरणे वृत्तेर्गुणवद्द्रव्यत्वा
दित्यादौ नाव्याप्तिरित्यर्थः केचित्तु व्याप्यवृत्तित्वं किंचिदवच्छिन्नवृत्तिकभिन्नत्वं दैशिककालिकाव्याप्यवृत्तिभेदेन द्वा
हरणद्वयम् संयोगाभाववान्मेयत्वाद्गुणवद्द्रव्यत्वादिति अभावः साध्यव्यापकताघटकसंबंधेन वाच्यः तेन कालत्वप्रका
रकप्रमाविषयः कालत्वादित्यादौ साध्यस्य कालिकसंबंधेन व्यापकं भावत्वाभावत्वसत्तकर्मत्वगुणत्वादि तेषां च दैशिकसंबं

एवं साध्यस्य गुणसामान्यस्याभावो द्रव्यत्वाधिकरणोत्पत्तिकालावच्छेदेन वर्तमानोपि नव्याप्यवृत्तिः॥

यदवच्छिन्नप्रतियोगिताकाभावानां साधनसमानाधिकरणानां कूटाधिकरणस्याप्रसिद्धावपि नाव्याप्तिः इत्थं च धूमवान्वह्नेः
पृथिवी द्रव्यत्वप्रकारकप्रमाविषयत्वादित्यादौ वा नानाविपक्षके व्यभिचारिणि विशेषणानां विशिष्टेषणानां तद्विपक्षावृत्तित्वात्
कसाध्यव्यापकतावच्छेदकरूपावच्छिन्नप्रतियोगिताकाभावकूटस्य साधनसमानाधिकरणस्याधिकरणाप्रसिद्धावना
तिव्याप्तिरित्याहुः नवविवक्षाद्वये पि कालिकसंबंधावच्छिन्नप्रतियोगिताके आत्मत्वाभावे साध्ये आत्मत्वादित्यत्राव्याप्तिः
तत्र आत्मत्वेघटितताद्दृशाभावकूटवदात्मवृत्तित्वाभावस्यात्मत्वेऽभावादिति वाच्यम् साध्याभावत्वावच्छेदकसंबंधावच्छे
नसाधनाधिकरणवृत्तित्वस्याभावे विवक्षणात् आत्मत्वाभावस्याभावत्वावच्छेदकश्चोत्पत्तिकालिकसंबंधस्तस्यात्मन्य

॥ [vertical margin text, illegible]

राम
७१

अप्रसिद्धीतिरूपाभाववान्वायुत्वादित्यादौ कूटाधिकरणाप्रसिद्धिः सत्तावान्जातेरित्यादौ च सत्तात्वावच्छिन्नाभावस्याधिकरणेनात्मादौ
हेतुतावच्छेदकसंबंधेन वृत्तेरप्रसिद्धेः आदिना सत्तान्यपृथिवीसमवेतत्वान्यरूपवदन्यत्वादित्यादौ पृथिवीमात्रसमवेततादृशाभावमादाय पृथिव्यादौ वकू
टाधिकरणत्वेन महतित्वाभावस्य हेतौ सत्त्वादतिव्याप्तिरित्यस्य परिग्रहः तादृशकूटाधिकरणवृत्तित्वाभावे मत्वतादृशकूटाधिकरणावृत्तित्वस्य हेतुतावच्छेदक
संबंधेन संबंधित्वविवक्षणाद्वह्निमद्वृत्तिपदस्यावृत्तिः संगच्छते अन्यथा तादात्म्यादिसाधारणवृत्तित्वव्यापकप्रतियोगिताकस्याधिकरणाधर्मावच्छि
न्नप्रतियोगिताकस्यैवाभावस्यावृत्तिमात्रवृत्तित्वाभावादप्यानिरभावाद्युक्तस्तदेव प्रथमतादृशो यति। तादृशसमुदायाधिकरणवृत्तित्वेति। तादृशवृत्तित्वाभाववृत्त
तित्वव्यापकव्याप्त्यवृत्तित्वधर्मानवच्छिन्नप्रतियोगिताकोग्राह्यः तेन प्रमेयं द्रव्यत्वादित्यादौ साध्याभाववद्वृत्तित्वसमनियतप्रतियोगिताकस्याप्रा
सज्यवृत्तिधर्मावच्छिन्नप्रतियोगिताकस्य घटवृत्तित्वघटान्यवृत्तित्वोभयत्वावच्छिन्नप्रतियोगिताकस्य वह्निमान्धूमादित्यत्र पर्वतसंयुक्तत्वपर्वता

उक्तरूपावच्छिन्नप्रतियोगिताकाः कचिदप्रसिद्ध्यादिसंपादकाः पुनरभावान हेतुसमानाधिकरणा उक्तसमुदायाधिकरणावृत्ति
त्वतदभाववृत्तिमात्वानिष्टवक्तिरीत्या मन्येत व्यानीत्यादिकमयास्तम् १४

यत्संयुक्तत्वोभयत्वावच्छिन्नाभावस्यैव तत्र पर्वतान्यत्व साधित्यादौ चैतल्लक्षणावच्छिन्नेतरवद्वृत्तित्वमेतदन्यलक्षणावच्छिन्नवृत्तित्वोभयाभावस्य तत्र हेतावसत्वे
पि नासंभवः धूमनिष्ठवृत्तित्वत्वेन वृत्तित्वसामान्याभावस्वीकारेतु स्वन्यवृत्तित्वसमानाधिकरणयधर्मानवच्छिन्नत्वमपि प्रतियोगितायां विशेषणं। यत्तु ता
दृशकूटाधिकरणवृत्तित्वोत्वातिरिक्तवृत्तित्ववृत्तिधर्मानवच्छिन्नवृत्तित्ववृत्ति प्रतियोगिताकोऽभावो बोध्यः वह्निमान्धूमादित्यादौ तादृशवृत्तित्व
वृत्तिधर्मेणानवच्छिन्नप्रतियोगिताकस्य धूमत्वाद्यभावस्य धूमादावभावाद्वृत्तित्वावृत्तिप्रतियोगितेति तत्र धूमवान्वह्नेरित्यादावतिव्याप्तिः तत्र नि
र्धूमवृत्तित्वत्वापेक्षया तादृशकूटाधिकरणावृत्तित्वत्वस्य गौरवेणानवच्छेदकत्वात्। व्यधिकरणधर्मावच्छिन्नाभावस्यैव तादृशत्वेन तस्य
च वस्त्वादावपि सत्वात्। अत्र केचित्तु पर्युक्तवृत्तित्वाभावे हेतुतावच्छेदकसंबंधेन यत्किंचित्पदार्थानधिकरणावृत्तित्वप्रतियोगिताकत्व
प्रक्षिप्यते तदानीमयोदोषः महाकालवृत्तित्वाभावे हेतुतावच्छेदकसंबंधेन यत्किंचित्पदार्थानधिकरणवृत्तित्वप्रतियोगिताकत्वाभावादिति
महत्त्वातेन नवाहतिमदवृत्तित्वसाध्यवद्वृत्तित्वं प्रतियोगित

मपानधिकरणत्वं विवक्षितं महाकालवृत्तित्वावच्छिन्नप्रतियोगिताकमहाकालवृत्तित्वाभावस्य साध्यवद्वृत्तित्वप्रतियोगिताकत्वविरहाद्भ
यानधिकरणत्वं तस्य वक्तव्यमत्वे तावसतां महान्नातिप्रसंगः इति तन्न साधीयः महाकालवृत्तित्वापेक्षया वृत्तित्वस्यैव लघुतया तादृशाभावप्रतियोगि
तावच्छेदकत्वेन साध्यवद्वृत्तित्वप्रतियोगिताकत्वस्यापि महाकालवृत्तित्वाभावे सत्वेन व्यधिकरणधर्मावच्छिन्नाभावे स्वेच्छया दृष्टत्वेन तस्य चेह
नैसत्वादिति। तस्मात् स्वार्थविवक्षयैवातिव्याप्त्युद्धारः। केचित्तु साधनसमानाधिकरणाव्याप्यवृत्तिसाध्याभावकूटे साध्यसमानाधिकरणत्व
मपि विशेषणमव्यभिचारिणि साध्यतावच्छेदकावच्छेदकावच्छिन्नसाध्याभावघटितसाध्याभावकूटे साध्यसमानाधिकरणत्वाप्रसिद्धेरेव व
नातिव्याप्तिरिति प्राहुः। ननु प्रतियोगितावच्छेदकविशिष्टज्ञानेनाभावप्रत्यक्षे हेतुः इदंत्वादिना प्रत्यक्षे व्यभिचारात् तत्तावदभावविशेषप्रत्य

तद्विशिष्टेति विशेषणतावच्छेदकविशिष्टज्ञानस्य विशिष्टवैशिष्ट्यप्रत्यये हेतुत्वादभावप्रत्यये मोहि घटत्वादिविशिष्टस्य घटादेः प्रतियोगि

तद्विशिष्टज्ञानस्याभावज्ञानकारणत्वात् अन्यथा निर्विकल्पकादपि घटो नास्तीति प्रतीत्यापत्तेः गविशशशृंगं नास्तीति

शृंगाभावप्रतीतेरसिद्धेः शशशृंगं नास्तीति शशीयशृंगाभावइत्यर्थः॥

नैवमवगाहमानो विशेषणस्यापि घटत्वादेस्तदवच्छेदकत्वमवगाहतेन तु स्वातन्त्र्येणायमेनास्तीत्येवप्रतीतेः॥ ॥ ॥

समानाभावादन्तत्राहाविशेषणतावच्छेदकविशिष्टेति। विशेष्यविशेषणभिन्नत्यापन्नघटाभावप्रत्यक्षमननुभूवातविवेचितं च रमालोकसा
रमञ्जूष्यां मस्याभिमनुभ्रमहंप्रतादृशज्ञानेनासंभवितादृशभ्रमाभावदशायां तादृशाभावप्रतीतिरप्रसिद्धेवेत्यत आह। अभावप्रत्ययो
हीति। विशिष्टस्यापि विशेषणातरूपविषयतावच्छिन्नस्यापि तदवच्छेदकत्वं प्रतियोगितावच्छेदकत्वं ननु स्वातन्त्र्येणेति प्रतियोगिवि
षयतानवच्छेदकेनेत्यर्थः। तदेव स्पष्टयति घटो नास्तीत्येवेति। दंडी पुरुषइत्यत्र दंडत्वविशिष्टवैशिष्ट्येनानुरूपांशे विशेषणतावच्छेद
कदंडत्वस्य यादृशी प्रकारता घटो नास्तीत्यत्राथभावांशे विशेषणतावच्छेदकघटत्वस्य तादृशी प्रकारतानन्नु घटस्यैव घटत्वस्याप्य
भावांशे साक्षात्प्रकारतात्तथा सति घटीयोऽभावो घटत्वीयइत्याकारकप्रत्ययः स्यादिति भावः। एकोवरेणाघटत्वेन घटो नास्तीति स्यात् तत्त्व

तस्यापि व्यधिकरणधर्मस्यापि भ्रमसत्वेतिप्रतियोगिनि वैशिष्ट्यानवगाहित्वानेनावच्छेदकत्वं नावगाह्यते इत्युक्तिर्भेगपावावच्छेदकंत
प्रतियोगिवैशिष्ट्यघटितमित्युक्तं तस्य च प्रकृते भावाभ्रमइत्यर्थः ननु तत्र घटो नास्तीत्येवमतीतेस्तथैवास्तु अत्र तु सामञ्जस्यावच्छे
दकत्वावगाहनादवच्छेदकं तत्र प्रतियोगि वैशिष्ट्यघटितं घटत्वेन घटो नास्तीत्यनुभवस्य दुरपह्नवत्वादित्यत आह यदि पुनरिति।

तदिहाभावप्रत्ययोऽयं यदि व्यधिकरणधर्मेण विशिष्टं प्रतियोगिनं नावगाहते एवं तदा तस्यापि प्रतियोगितावच्छेद
कत्वं अथावगाहते तर्हि भ्रम एव न तत्त्वार्थसिद्धिरिति भावः यदि पुनरानुभाविकोलौकानां स्वरसवाही घट
त्वेन पटो नास्तीति प्रत्ययस्तदा तादृशाभावनिवारणं गीर्वाणगुरुणाप्यशक्यमिति निमंतव्यम्॥ ॥

आहार्यप्रत्ययस्य वृत्तत्वसाधकत्वादाहास्वरसवाहीलौकिकानामिति। तादृशानुभवोपपत्त्यानुभाविकोऽनुभवसिद्ध इत्यन्वयः किंचि
तु पटत्वेन पटो नास्तीति पाठः समानाधिकरणधर्मावच्छिन्नाभावप्रत्ययोगियदिप्रतियोगिनएव प्रतियोगितावच्छेदकस्याप्य
भावांशे वैशिष्ट्यावगाहीदित्यर्थः तादृशाभावनिवारणं। ननु स्वव्यधिकरणधर्मावच्छिन्नाभावनिवारणमित्यर्थइति व्याच
कुः इतिरवंत्वेन रहस्यं नन्वसामानाधिकरण्यं न तदनधिकरणवृत्तित्वं केवलान्वयिन्यव्याप्तेः॥ ॥ ॥

केवलान्वयितीत्यादिग्रन्थविरोधाच्च नापि तदधिकरणावृत्तित्वं साधिकरणपदवैयर्थ्यापत्तेः द्रव्यं सत्त्वादित्यादावतिव्याप्तेश्चात्रैः सा
ध्यत्वादिके केवलान्वयिनि साध्यवदवृत्तिगगनादेरधिकरणाप्रसिद्ध्यानधिकरणत्वस्याप्रसिद्धेराह। तदभाववत्त्वमिति। ननु वह्निमा
न्धूमादित्यादावव्याप्तिः साध्यवदवृत्तिधूमत्वादेरभावस्य धूमादावसत्त्वादत आह तदवच्छिन्नेति। अवच्छिन्नेत्यस्य कुत्रालाभ
इत्यतमतीति। नन्ववच्छेदकत्वमननिरूपितवृत्तिकत्वं तथा चातिव्याप्तिः धूमवान्वह्नेरित्यादौ धूम वदवृत्तिसकलपदार्थ विरहक्र

साध्येति। साध्यसामानाधिकरण्यं पुनस्तेषामनधिकरणत्वं तदभाववत्त्वमिति यावत्तत्स्मिन्सति साधिकरणत्वं तद्दर्वं
अथ साध्यासामानाधिकरण्यानधिकरणत्वे सति साधिकरणत्वं व्याप्तिः केवलान्वयिनि साध्यासामानाधिकरण्यं नि
रधिकरणे आकाशादौ प्रसिद्धमिति चेत्॥ ॥
त्वाधिकरणत्वाकत्वं सति सप्तम्या अवच्छेदकत्वलाभात्। तच्चेहान्यूनवृत्तित्वात् एवं च साध्यवदवृत्तिसकलपदार्थाभाववत्त्वं परधि
करणतापा अन्यूनवृत्तित्वमिति फलितोर्थः॥ ॥
दस्य वस्त्वधिकरणतानतिरिक्तवृत्तित्वाद्वह्निमान्धूमादित्यादौ वह्निमदवृत्तिसकलपदार्थमध्यनिविष्टह्रदत्वाद्यभावस्य धूमाधिकर
णतातिरिक्तवृत्तितावत्त्वान्निर्वृत्त्यत आह। अन्यूनवृत्तित्वमिति। धूमवान्वह्नेरित्यादौ धूमवदवृत्तिह्रदत्वाभावस्य वह्न्यधिकरणतानन्यूनवृ
त्तितादतिव्याप्तिरत आह। साध्यवदवृत्तिसकलपदार्थेति तत्र तादृशायोगोलकत्वाभावस्य वह्न्यधिकरणतान्यूनवृत्तित्वाभा
वान्नातिव्याप्तिरिति साध्यवदवृत्तित्वस्य संबन्धभेदेन भिन्नत्वात्सामान्याभावो न घटत इति भावः॥ ॥ ॥ ॥ श्रीः

ननु तादृशसकलपदार्थाभाववत्त्वं यदन्यूनवृत्तितत्त्वमित्यस्यैव सम्यक्त्वे यदधिकरणतेत्यत्राधिकरणतापदं व्यर्थमत आह यथेति
तथा च नातिप्रयोजनकत्वादाह हेतुतावच्छेदकेति तत अधिकरणत्वम् संयोगेन साध्यवदवृत्तेरयोगोलकत्वादेः संयोगेनाभाव
स्य वह्न्यधिकरणतान्यूनवृत्तित्वादतिव्याप्तिरतो येन येनेति वीप्सायस्तेन येन येनेत्यादि विवक्षणेन साध्यवत्समवेतस्य आ
काशाभाववदित्तस्य केवलान्वयित्वादि तिभावः सकलतंत्वन्यूनेति संबन्धसामान्येन तच्छून्येत्यर्थः तदभावः साध्य
यथासन्निवेशाधिकरणत्वस्य नैवैयर्थ्यम् हेतुतावच्छेदकसंबन्धेनाधिकरणतालाभाय वा तत येन येन संबन्धेनान्वयोयः
साध्यवदवृत्तिस्तेन तेन संबन्धेन तत्तदभावो बोध्यः एतेन साध्यवदवृत्तित्वं यदि साध्यतावच्छेदकसंबन्धेन विवक्षितम्
तदा समवायेन साध्यतायां साध्यवत्समवेतस्य सार्वत्रिकत्वात्तत्कलत तच्छून्याप्रसिद्धिः अथ तदभावोपि तादृशेने
व संबन्धेन वाच्यस्तदा जातिमन्मेयत्वादित्यादावतिव्याप्तिः जातिमत्समवेतानां समवायेनाभावस्य केवलान्वयित्वा
त अत एव न संयोगेन समवायेन वा इदं न जातिमज्जातित्वादित्यादौ साध्यवत्समवेताप्रसिद्धेश्च ॥ ॥
वदवृत्तेरभावः तादृशेन साध्यतावच्छेदकेन ज्ञानातिमदिति जातिमत्समवेतसमवेतमेव तस्य च समवायेनाभावः केवलान्वयीति
भावः अत एव जातिमन्मेयत्वादित्यादावतिव्याप्तेरवद्यत्वात् तदाह इदं मज्जातिमदिति साध्यतावच्छेदकसंबन्धेनावृत्तित्वविवक्षा
यां तु प्रकृते स्वरूपसंबन्धस्यैव तथात्वात्तेन संबन्धेन साध्यवदवृत्तेर्जात्यभावप्रकारकप्रमाविषयत्वाभावस्याप्रसिद्धत्वात् तदभावस्य हे
त्वधिकरणतान्यूनवृत्तित्वान्नाव्याप्तिः संभावतीति संयोगत्वसमवायत्वादिनैव तादृशविवक्षणे व्याप्तिरुक्ता॥

रूपभिन्नंगुणत्वादित्यादौ रूपभिन्ने समवायेनासंबद्धं रूपत्वादि तदभावस्य गुणत्वान्यूनवृत्तित्वाभावान्नातिव्याप्तिः संभवतीत्यु
तविति समवेतमात्रस्यैवैतद्रूपभिन्नसमवेतत्वादेतद्रूपभिन्नासमवेतमसमवेतमेव समवायेन तदभावः केवलान्वयीति भावः

नापिसाधनतावच्छेदकसंबंधेन इदमेतद्रूपभिन्नंगुणत्वादित्यादावतिव्याप्तिः नापिविषयतयाघटभिन्नंमेय
त्वादित्यत्राप्यतिव्याप्तिः सविषयकमात्रस्यैव घटभिन्नविषयकत्वात् घटनिर्विकल्पकेपिघटत्वादिभाना
न्नापिसंबंधमात्रेणद्रव्यंसत्वादित्यादावतिव्याप्तिः वृत्तिमन्मात्रस्यैवस्वरूपसंबंधेनमहाकालवृत्तेर
वृत्तेरभावस्यकेवलान्वयित्वादितिमतुक्तम्॥

एतद्घटभिन्नंसत्वादित्यादौ तेतद्घटभिन्नासमवेतैतद्घटरूपादेः संभवात्तन्नातिव्याप्तिः संभवतीतितन्नोक्तम् घट
भिन्नमिति घटभिन्नाविषयकं निर्विषयकमेवतस्यच विषयतयाभावः केवलान्वयीति भावः इत्यत्रापीत्यपिनाएत
द्रूपभिन्नंगुणत्वादित्यस्यसंग्रहः द्रव्यंसत्वादित्यादिवित्यादिनाएतद्रूपभिन्नंगुणत्वात् घटभिन्नंमेयत्वादिपरिग्रहः
स्वरूपसंबंधेनकालिकपिशेषणतयोदैशिकविशेषणतया

यत्ततत्वाननुगमात्साध्यवदसमवेतस्यसमवायेनाभावः साध्यवदसंयुक्तस्यसंयोगेनाभावइत्येवंक्रमेणनिवेशनेतिगौरवम्
तत्रचविशेषणताविशेषेणसाध्यवद्वृत्तेरभावस्यनिवेशनेनैवसामंजस्येशेषवैयर्थ्यमित्याशयेनाह विशेषणतेति विशेषण
तोचतत्तद्व्यक्तित्वस्याभावप्रमाविषयत्वस्यघाव्याप्यासर्वत्रैवेति एवंकिपावद्यभिचारिणीत्यर्थः तेनकेवलान्वयिनित
द्व्यक्तित्वइतितत्तद्व्यक्तित्वंतन्मात्रवृत्तिस्साधारणोधर्मेद्रव्यादिः सचसमवायादिनैववर्ततेनविशेष+ तादेसाध्यवद्वृ
त्तित्वस्याप्रसिद्धावपिनक्षतिः तत्रतत्तद्व्यक्तित्वंतत्तद्व्यक्तिस्वरूपंतच्चाखिलस्वरूपविशेषणतासंबंधनस्वास्मन्नपिवर्ततइत्याश
येनाह तत्तद्व्यक्ति+ ताद्येसतआहतत्तदन्यान्यत्वइतितदन्यान्यत्वमपितत्तद्व्यक्तित्वमेवतदुक्तम् नहिघटभिन्नमे
विशेषणताविशेषणपासाध्यवद्वृत्तित्वकव्यम सर्वचैवतत्तद्व्यक्तित्वेनतदन्यान्यत्वेनतत्प्रकारकप्रमाविषय
त्वेपातत्सुलभं तेनैवसंबंधेनसततरवोच्छिन्नसामान्याभावोवाच्यइति॥ ॥

दोघटत्वाद्वृत्तिरित्येतदिति तथाचसएवदोषइत्यतआह तत्प्रकारकेति तथाचेतद्रूपभिन्नंगुणत्वादित्यादावेतद्रूपत्वप्रका
रकप्रमाविषयत्वंविशेषणताविशेषेणसाध्यवद्वृत्तितेनसंबंधेनतदभावस्यगुणत्वान्यूनवृत्तित्वाभावान्नातिव्याप्तिरिति
भावः तत् साध्यवद्वृत्तित्वंएवंचसामान्याभावनिवेशोपिसम्यगित्याशयेनाह तेनैवेति तदवच्छिन्नेति साध्यवद्वृत्तित्वा
वच्छिन्नेत्यर्थः॥

केचित्तिति साध्यविरोधित्वं साध्याभावव्याप्यत्वं तच्चैकवत्तान्वयिन्यप्रसिद्धमत आह साध्यासमानाधिकरणानीति ननु सा
ध्यासमानाधिकरणानां गगनादीनां हेत्वसामानाधिकरण्याद्व्यभिचारिण्येव निर्व्याप्तिरत आह साध्यसामानाधिकरण्याभाववति
आर्द्रेन्धनप्रभववह्निसामानाधिकरण्यस्य केवलस्य धूमसामानाधिकरण्याभावव्यापकत्वाद्व्यभिचारिण्यतिव्याप्तिरतः
सामान्येति हेतुतावच्छेदकावच्छिन्नहेतुसामानाधिकरण्यत्वावच्छिन्नप्रतियोगिताकाभावत्वेन व्यापकत्वस्फोरकम् ते
नायोगोलकीयवह्निसामानाधिकरण्यस्यापि वह्नित्वादिना भावस्य धूमसामानाधिकरण्याभावव्यापकत्वेऽपि न क्षतिः नवा

केचित्तु नन्वव्याप्तसेनासाध्यानि साध्यविरोधीनि साध्यासमानाधिकरणानीत्यावत् तानि सामानाधिकरण्या
नधिकरणानि यस्य तत्त्वं साध्यसामानाधिकरण्याभावव्यापकाभावप्रतियोगि सामानाधिकरण्यसामान्यक
त्वमिति तु निष्कर्षः अत्र च साध्यसामानाधिकरण्यं साध्यतावच्छेदकसंबंधेन साध्यवति हेतुतावच्छेदकसंबंधेन
वृत्तिः परन्तु सामानाधिकरण्यं हेतुतावच्छेदकसंबंधेन हेतुमति तेनैव वृत्तिः ॥

द्रव्यं गुणकर्मान्यत्वविशिष्टसत्त्वादित्यादावव्याप्तिरिति साध्यवति साध्यतावच्छेदकावच्छिन्नसाध्यवतीति तेन गुणान्यत्व
विशिष्टसत्तावान्नातेरित्यादौ नातिव्याप्तिः परं च सामानाधिकरण्यं हेतुसामानाधिकरण्यं हेतुमति हेतुतावच्छेदकवि
शिष्टहेतुमति तेन द्रव्यं गुणकर्मान्यत्वविशिष्टसत्तादित्यादौ नाव्याप्तिः तेनैव हेतुतावच्छेदकसंबंधेनैव ॥ ॥

क्रमेण संबंधभेदविवक्षायाः फलमाह तेनेत्यादि नाशपृथिवीत्ववति कालिकसंबंधेनावर्तमानस्य चरमध्वंसादेर्हेत्वधिकरणे का
लेऽवृत्तेर्नातिप्रसङ्गः अत एव नाशपृथिवीत्वं विहायोपद्व्यत्वे तु क्रमसत्त्वहेतौ हेतुसामानाधिकरण्याभावस्य साध्यसामानाधि
करण्याभावव्यापकत्वं न तत्त्वस्मिन्गुणत्वेन तु स्वस्मिन्नेव न दितिमदुदाहरणम् परं सामानाधिकरण्ये हेतुतावच्छेदकसंबंधेनेत्यस्य फ
लमाह नवा संयोगेनेति वह्निमान्चतरूपादित्यादौ वह्निमति समवायेनावर्तमानं कालपरिमाणं संस्त्वं च तच्च कालिकतया
द्रूपाधिकरणे कालेऽस्त्येव समवायेनवर्तेत इत्यव्याप्तिर्नेत्यर्थः संदृष्टान्तरिति । हेतावपि तत्रानुपपन्ने तेनैवेत्यस्य फलमाह समवा

येनेति समवायेन पृथिवीत्वादेः साध्यतायां व्यभिचारिणा कालिकसंबंधेन हेतौ द्रव्यत्वादेश्च समवायेन साध्यतायां समवा
येन हेतौ सत्तागुणत्वादौ नातिप्रसङ्गः न वा संयोगेन वह्न्यादौ साध्ये समवायेन तद्व्याप्यस्वरूपविशेषादेः कालिकसं
बंधेनाधिकरणे कालपरिमाणस्येत्यादिः समवायेन तदधिकरणे घटादेः संयोगेन हेतावपि चाप्रसंगः संबंधविशे
षेण व्याप्यत्वलाभोपस्थाधिकरणत्वमित्याद्यूह्यं चिन्त्यम् ॥

येनेति तदधिकरणे तद्रूपाधिकरणे पर्वतादौ संबंधविशेषेण हेतुसामानाधिकरण्ये हेतौ प्रविष्टेन आकाशसामानाधिक
रण्याभावस्याप्रसिद्ध्या तद्भिन्नात्वलक्षणस्य तत्राति व्याप्त्यभावादिति भावः तच्चिन्त्यमिति एतद्रूपभिन्नं गुणत्वाज्ज्ञानादौ सत्त्वादौ महाका
लान्यो घटादित्यत्र च कालिकसंबंधेन हेतौ चातिव्याप्तिः स्यात् तस्मात् साध्यतावच्छेदके संबंधेन साध्यवति यो विषयतावि
षयत्वं तत्त्वाभावव्यापको हेतुतावच्छेदकसंबंधेन हेतुमति तेनैव संबंधेन वृत्तित्वाभाव इत्युक्तौ च नायं दोष इति स्मर्तव्यम् ॥

ननु स्वोक्तविवक्षायां मूलोक्तदोषासंगतिरत आह यथाश्रुतमिति ननु साध्यासामानाधिकरण्यपदस्य साध्याधिकरणवृत्तित्व
मिव लक्षणाकर्तुर्विवक्षाविषयः अत एव केवलान्वयिनि प्रसिद्धिर्निरधिकरणे दर्शिता तथा च साध्यानधिकरणाधिकरणत

यथाश्रुतं यथासंभवं विकल्प्य दूषयति नेत्यादि ॥ ॥

न साध्यासामानाधिकरण्यं हि न साध्यानधिकरणाधिकरणत्वं साध्याधिकरणानधि
करणत्वं वा केवलान्वयिनि यत्किंचित्साध्याधिकरणानधिकरणे धूमे चाव्याप्तेः ॥

स्वदूषणासंगतमत आह यथासंभवमिति यावन्तोर्थाः संभवन्ति तावतां दूषणस्य सांप्रदायिकत्वादिति भावः ॥ ॥

प्रतियोगिविरोधित्वं यदि प्रतियोग्यभावव्याप्यत्वं प्रतियोग्यनधिकरणवृत्तित्वं वा व्याप्यवृत्तित्वं च यद्यनवच्छिन्नाया वृत्तेः स्वहेतुम
स्वाधिकरणीभूतयत्किंचिद्व्यक्तिवृत्त्यत्यन्ताभावाप्रतियोगित्वं वा तदा नातिव्याप्तिरत आह प्रतियोगिविरोधित्वमिति तदधि
करणेति प्रतियोग्यधिकरणे त्वर्थः न सिद्ध्योरिति अधिकरणानामनन्तत्वात्तत्रास्तीति प्रतीतिर्यामकानन्तकल्पने गौरवा

नन्विह प्रतियोगिपदेन प्रतियोगितानवच्छेदकावच्छिन्नं कर्तव्यमत आह द्रव्यत्वादेरिति प्रतियोगिविरोधित्वेत

नपि स्वसमानाधिकरणात्यन्ताभावाप्रतियोगिसाध्यसामानाधिकरण्यमव्याप्तिः पर्वतीयवह्नेर्महानसीयधूम
समानाधिकरणात्यन्ताभावप्रतियोगित्वात् द्रव्यत्वादेर्व्याप्यवृत्त्यव्याप्यतायतेश्च न च प्रतियोगिविरोधित्वं व्या
प्यवृत्तित्वं स्वाभावे विशेषणं संयोगादौ साध्ये सत्त्वादेरनैकान्तिकत्वाभावप्रसंगात् न हि प्रयोगिविरोधी संयो
गादेरपरोत्यन्ताभावोस्ति अधिकरणभेदेनाभावभेदाभावात् ॥

दधिकरणवृत्तीति तदव्याप्यवृत्तित्वं च स्वसमानाधिकरणात्यन्ताभावाप्रतियोगित्वं अधिकरणेति तथा सत्यभावयुक्त
दातिरिक्तोऽभावः कस्याप्तनत्वे चाभावसिद्धौ बीजं तच्चाधिकरणभेदेनाभावभेदाभ्युपगमेन संभवतीति भावः ॥ ॥ ॥

ननु संयोगात्यंताभावो गुणे प्रतियोग्यसमानाधिकरणोऽव्याप्यवृत्तिश्च द्रव्ये प्रतियोगिसमानाधिकरणोऽव्याप्यवृत्तिश्चेति प्रतियोगिसामानाधिकरण्यासामानाधिकरण्ययोर्व्याप्यवृत्तित्वाव्याप्यवृत्तित्वलक्षणविरुद्धधर्मसंसर्गित्वं संयोगाभावभेदकं स्यादत आह संयोगाद्यत्यंताभावस्येति द्रव्य इति अव्याप्यवृत्तित्वं चेत्तत्राप्यनुपपन्नं तेन गुण इति व्याप्यवृत्तित्वं चेत्तत्राप्यनुपपन्नं तेन अविरोधा

संयोगात्यंताभावस्य च द्रव्ये प्रतियोगिसामानाधिकरण्यमव्याप्यवृत्तित्वं च प्रतियोग्यधिकरणीभूतद्रव्यवृत्तित्वं स्वाधिकरणीभूतद्रव्यनिष्ठात्यंताभावप्रतियोगित्वं गुणे च प्रतियोग्यसामानाधिकरण्यं व्याप्यवृत्तित्वं च प्रतियोग्यनधिकरणीभूतगुणवृत्तित्वं स्वाधिकरणीभूतगुणनिष्ठात्यंताभावाप्रतियोगित्वं एतानि च न भेदकान्यविरोधात् सामान्यतश्चाव्याप्यवृत्तेः प्रतियोगिसमानाधिकरणं च न तथात्वव्यतिरेक इति भावः ॥ ॥

दृति संयोगाधिकरणद्रव्यवृत्तित्वसंयोगानधिकरणगुणवृत्तित्वयोरेकाश्रयाभावादेदशनादिति भावः सामान्यतो न तथात्वव्यतिरेक इत्यन्वयः तथा च स्वसमानाधिकरणसंताभावप्रतियोगिभिन्नास्वसमानाधिकरणात्यंताभावप्रतियोगित्वाभावो न वा प्रतियोग्यधिकरणवृत्तेः प्रतियोग्यधिकरणवृत्तित्वाभाव इत्यर्थः ॥

साध्यवतीति ननु साध्य इति भावः संचेति तथा च साध्यवान्यस्य स साध्यवान् यदधिकरणमित्यर्थः ननु यथा चैत्रस्य पुत्रवानयं देश इत्यत्र चैत्रसंबंधित्वं पुत्रेऽन्वेति ननु पुत्रवति तथा चैतत्संबंधिकपदत्वात्साध्यवान्यस्येत्यत्रापि यत्संबंधित्वं साध्य एवान्वेति ननु साध्यवान्यस्येति साध्यवति संबंधोऽन्वेष्यः स चाधिकरणत्वं साध्यसाधनयोरपि सामानाधिकरण्यमेव सतो हि नापि साधनवन्निष्ठान्योन्याभावाप्रतियोगिसाध्यवत्कत्वं व्याप्तिः मूले वृक्षः कपिसंयोगी नाग्र इत्यबाधितप्रतीतेस्तत्रान्योन्याभावस्यापि सत्त्वात् न चैवं भेदाभेदः अवच्छेदकभेदेन तत्त्वाभ्युपगमात् साधनवन्निष्ठान्योन्याभावाप्रतियोगिसाध्यवद्यस्येति षष्ठ्यर्थव्याप्यव्यापकभावानिरूपणात् साध्यसाधनयोर्व्याप्तिनिरूप्यत्वाच्च।
द्विम पर्वतस्य धूमवन्महानसनिष्ठान्योन्याभावप्रतियोगित्वाच्च ॥
घणांतरमाह साध्येति साध्यत्वसाधनत्वे व्याप्तिप्रतियोगित्वानुयोगित्वे यतश्च्याभेवव्याप्तिर्निर्वक्तव्येत्यत आह वह्निमदिति तच्च व्याप्तिनिरूपकत्वमित्यत आह साध्यसाधनयोरपीति सामानाधिकरण्यमेव साध्यवान्यस्येत्यत्र षष्ठ्यर्थः संबंध इत्यन्वयः साध्यसाधनयोर्धर्मिणोर्न व्याप्तिनिरूप्यत्वमत आह साध्यत्वेतियत इत्यामेवेत्येवकारेण साध्यसाधनव्यवच्छेदः तथा च पक्षसमानाधिकरणान्योन्याभावाप्रतियोगिवृत्तित्वेन सम्यग्निर्णीतो भावो व्याप्तिरित्यर्थः ॥

नचधूमसमानाधिकरणेभूतत्वादिपदार्थप्रसिद्धिस्वविशिष्टवह्नेरेवमतद्वह्नित्वादिनाधूमसमानाधिकरणाभावप्रतियोगितावच्छेदकइत्ययुक्तमेतत् तथापियद्रूपावच्छिन्नप्रतियोगितावच्छेदकंतत्स्वरूपावच्छिन्नसामानाधिकरण्यमित्यर्थतात्पर्यमेतद्वन्हित्वादिनाप्रतियोगितावच्छे

ननुपक्षसमानाधिकरणान्योन्याभावप्रतियोगितावच्छेदकंयद्रूपावच्छिन्नत्वंन्नभवतितद्रूपावच्छिन्नेनसमंतस्यसामानाधिकरण्यंव्याप्तिरित्यर्थे नचधूमसमानाधिकरणान्योन्याभावेप्रतियोगितावच्छेदकोवन्हित्वावच्छिन्नोवह्निःधूमवान्

विशेषाभावकूटादेवाभावव्यवहारोपपत्तावतिरिक्तसामान्याभावे
मानाभावात् श्रीमद्गुरुचरणकमलेभ्योनमोनमः ॥ श्री

ह्निमान्निसप्रतीतेरित्यतआह विशेषेति यत्एवप्रत्येकंवह्निमभेदाधूमसमानाधिकरणास्तत्एवैकाधिकरणइति
त्वावच्छिन्नांवह्निस्यत्सामान्यभेदबुद्धिमुत्पादयंतितत्प्रतियोगितावच्छेदकोवह्नित्वावच्छिन्नोवह्निरितिभवत्येवाव्या
प्तकमितिक्तांतरमंगीकृत्येदमुक्तमित्यन्येवह्निसमानाधिकरणविशेषाभावकूटप्रतियोगितावच्छेदकतयाधूमवत्त्वस्यधूम
वत्त्वस्यधूमवान्वह्नेरित्यत्रनातिव्याप्तिरित्यव्याप्तिपरतयाव्याचष्टे यत्एवेति प्रत्येकं मातिस्विकरूपेणतत्तद्भेदत्वादिनाधूमस
मानाधिकरणाः आपन्नमोनमः ॥

प्रमेयत्वादेरितिमूलमनुरुध्याहवैयधिकरण्यमिति पृथ्वीवीति द्रव्यत्वानधिकरणवृत्तित्वस्यपृथिवीत्वे संत्वादितिभावःधूमवान्वह्ने
रित्यत्रयोगोलकीयवह्न्यनधिकरणवृत्तित्वंधूमेवर्त्ततइत्यत्वहेत्वनुसरणंसाधनाधिकरणेयेनसंबंधेनधर्मस्यवृत्तित्वंतेनसंबंधेनतद
नधिकरणंसाध्यतावच्छेदकसंबंधेनतद्वृत्तित्वंचानतादृशवैयधिकरण्यंतेनसंबंधभेदमादायनदोषःधूमादेरपीति समवायेन

साधनेति वैयधिकरण्यंतदनधिकरणवृत्तित्वंनचकेवलान्वयिनःसाधनस्याप्रसिद्धप्रतिप्रसंजकस्वपृथिवीद्र
व्यत्वादित्याद्यतःसमानाधिकरणपदोपादानम् धूमादेरपिनवह्न्यादिसमानाधिकरणद्रव्यत्वाद्यनधिकरणवृत्तित्व

नापिसाधनसमानाधिकरणयावद्धर्मनिरूपितवैयधिकर
णानधिकरणसाध्यसामानाधिकरण्यंव्याप्तिः ॥ ॥

मतोयावदिति यद्यपिपृथिवीत्वादिसमानाधिकरणघटत्वपटत्वाद्यनधिकरणवृत्तित्वंद्रव्यत्वादेस्तदनधिकरणवृ
धूमस्यसाध्यतायांव्यभिचारिणिवह्नावतिव्याप्तिवोध्यासंयोगेनसाध्यतायांद्रव्यत्वानधिकरणेगुणादौसंयोगेनवृत्तित्वस्याप्रसिद्धे
र्द्रव्यत्वमादायमातिव्याप्तिःसंगच्छते।द्रव्यत्वादेरिति तथाचद्रव्यंपृथिवीत्वादित्यादावव्याप्तिःतदनधिकरणेति साध
नसमानाधिकरणघटत्वाद्यनधिकरणेत्यर्थःतथाचमात्रपदेदत्तेपिरूपवान्पृथिवीत्वादित्यत्राव्याप्तिरितिभावः ॥

ताद्दशेति साधनसमानाधिकरणेत्यर्थः नद्वीतिनी रूपपृथिव्यभावादिरिति भावः धूमत्वादिकं त्विति तथा च व्यभिचारिणि नातिव्याप्तिः
नन्वन्यूनवृत्तित्वरूपमवच्छेदकत्वं मेयत्वादावपीति तद्दृत्साध्यकाव्याप्तिरत आह तदवच्छेदकत्वमिति धर्मस्य इतिमतं तत्प्रयोजनमाह

तथापि ताद्दशधर्मानधिकरणमात्रवृत्तितानवच्छेदकं साध्यतावच्छेदकं बोध्यम् नहि पृथिवीत्वादिसमानाधिक
रणस्ताद्दशः कश्चिदेको धर्मो यदनधिकरणमात्रे वृत्तितावच्छेदकं रूपत्वादि धूमत्वादिकं तु वह्न्यादिसमाना
धिकरणायोगोलकत्वाद्यनधिकरणमात्रवृत्तितावच्छेदकत्वं च तदनतिरिक्तवृत्तित्वं न च तच्छून्यधर्मवृत्तित्वं
तेन मेयत्वसमानाधिकरणगुणत्वाद्यनधिकरणमात्रवृत्तित्वानधिकरणगगनादिवृत्तित्वेऽपि द्रव्यत्वस्य द्रव्य
साध्यकमेयत्वेनातिप्रसङ्गः ॥

तेनेत्यादिना द्रव्यवान्मेयत्वादित्यत्र समवायेन द्रव्यस्य साध्यतायां मेयत्वसमानाधिकरणगुणत्वानधिकरणमात्रसमवेतत्वशू
न्यगगनादिवृत्तित्वेऽपि तच्छून्यानि यानि तानि वृत्तिमन्ति सत्तादीनि तद्वृत्तित्वस्य द्रव्यत्वे सत्त्वान्नातिव्याप्तिरिति ॥ ॥

ननु धर्मत्वं साध्यतावच्छेदकसंबंधेन संबंधित्वं वाच्यम् अन्यथा गगनादेरपि संयोगेन संबंधित्वेनोक्तदोषापरीहारात् एवमभावद्रव्यान्यतरत्वेन
समवायेन साध्यतायां मेयत्वादिहेतौ व्यभिचारिणि ताद्दशगुणत्वानधिकरणमात्रसमवेतत्वशून्येऽभावे वृत्तिमत्तिताद्दशान्यतरत्वस्य सत्त्वात्तदनव
च्छेदकत्वं स्यात् तथा च संयोगेन द्रव्यस्य साध्यतायां मेयत्वादावतिव्याप्तिः ताद्दशगुणत्वाद्यनधिकरणमात्रसंयुक्तत्वशून्यस्य संयोगेन वृ
त्तिमतोऽप्रसिद्धा द्रव्यत्वस्यावच्छेदकत्वाभावात् एवं तच्छून्यधर्मवृत्तित्वमित्यत्रापि वृत्तित्वं साध्यतावच्छेदकताघटकसंबंधेन वाच्यम् अन्यथा
वह्निसमानाधिकरणायोगोलकत्वाद्यनधिकरणमात्रवृत्तिताशून्यायोगोलकीयवह्नौ धूमत्वस्यापि कालिकसंबंधेन वृत्तित्वादनवच्छे

वस्तुतस्तु ताद्दशधर्मानधिकरणमात्रवृत्तित्वावच्छिन्नाधिकरणताकत्वं तदवच्छेदकत्वं वाच्यम् तेन सत्ताद्रव्यत्वोभयवान्गुणान्यत्व
विशिष्टसत्तावान्वा जातिमत्त्वादित्यादौ नातिप्रसङ्गः सत्तायां गुणत्वाभाववन्मात्रवृत्तित्वविरहेऽपि उभयत्वाद्यवच्छिन्नाधिकरणता
या गुणत्वाभाववन्मात्रवृत्तित्वात् ॥

दकत्वापातात् द्रव्यं च समवायेन द्रव्यस्य साध्यतायां मेयत्वादिहेतौ ताद्दशगुणत्वानधिकरणमात्रवृत्तिताशून्ये धर्मे सत्तादौ साध्यतावच्छे
दकताघटकसमवायेन वृत्तित्वस्याप्रसिद्ध्यावच्छेदकत्वस्याव्याप्तिः न च ताद्दशधर्मानधिकरणमात्रवृत्तित्वाभाववृत्तिमत्त्वोभयाभाव
वत्त्वाश्रयकत्वं वाच्यम् अभावीयविशेषणतया वृत्तिमत्त्वीयसंबंधविशेषणाच्चोभयाभावस्योभयवृत्त्यपि सत्त्वात् अन्यतर
संबंधेनाभावस्य चानभ्युपगमात् एवं सत्ताद्रव्यत्वोभयवान् जातिमत्त्वादित्यादौ वक्ष्यमाणरीत्यातिप्रसङ्गोऽत्यस्वरसादाह वस्तुत
स्त्विति ॥ ॥

तादृशधर्मेति साधनसमानाधिकरणधर्मेत्यर्थः समवच्छेदकत्वेनाभिमतम् तथा च संयोगेन द्रव्यस्य साध्यतायां सत्तादिहेतौ संयोगेन द्रव्यत्वावच्छिन्नाधिकरणतायास्तादृशगुणत्वानधिकरणमात्रवृत्तित्वाद् द्रव्यत्वस्य नावच्छेदकत्वक्षतिः तादृशधर्मानधिकरणमात्रवृत्तित्वावच्छिन्नकत्वमित्युक्तौ गुणान्यत्वविशिष्टसत्तावान् जातिमत्त्वादित्यादौ गुणान्यत्वविशिष्टसत्तात्वावच्छिन्नस्य गुणत्वानधिकरणमात्रवृत्तित्वाभावादतिप्रसंगः तदधिकरणान्तर्पर्यनुधावनं तादृशधर्मानधिकरणमात्रवृत्तित्वं च तादृशधर्माधिकरणावृत्तित्वम् इतरांशस्य वैयर्थ्यात् न च स्वावच्छिन्नाधिकरणता साध्यतावच्छेदकसंबंधेन वाच्याऽन्यथा धूमवान् वह्नेरित्यादौ कालिकसंबंधेन धूमत्वावच्छिन्नाधिकरणताया अयोगोलकत्वाधिकरणावृत्तित्वेन धूमत्वस्यानवच्छेदकत्वापातात् तथा च कालो घटवान् कालपरिमाणादित्यत्र स्थानं घटवन्नित्यत्वात् त्वादित्यादौ कालिकसंबंधेन विषयितासंबंधेन च साध्यतायां तादृशावच्छेदकाप्रसिद्धेरव्याप्तिरिति वाच्यम् येन येन संबंधेन स्वावच्छिन्नाधिकरणता तादृशी तेन तेन संबंधेन स्वावच्छिन्नप्रकारकज्ञानभिन्नं साध्यतावच्छेदकसंबंधेन यत्साध्यतावच्छेदकावच्छिन्नप्रकारकज्ञानं तदवच्छिन्नसाध्यसामानाधिकरण्यस्य विवक्षितत्वात् विवेचयिष्यते चेदमुपरिष्टात् महाकालान्यत्वविशिष्टघटत्वस्य स्वरज्ञानान्यत्वविशिष्टघटत्वस्य तत्रावच्छेदकत्वमित्यपि ध्वनित तच्छून्यधर्मावृत्तित्वमित्यत्र तच्छून्यधर्मापर्याप्तवृत्तिकत्वं वाच्यम् सत्ताद्रव्यत्वोभयत्वं वत्सत्तापर्याप्तवृत्तिकमतस्त्वाह गुणत्वेति ॥

व्यतिरेकित्वं अन्योन्याभावप्रतियोगितावच्छेदकत्वम् तद्वता काशाभावे साधनसमानाधिकरणव्यतिरेकिधर्माप्रसिद्ध्या तदनधिकरणमप्रसिद्धं प्रातिस्विकरूपेण धर्मस्योपादाने घावच्छेदकस्यैव तथोपादानमुचितम् किं व्यतिरेकित्वविशेषणेनेत्याह वस्तुतस्त्विति तथा च यावत्पदं तत्तद्धर्मवैयधिकरण्यावच्छेदकघटितम् भेदकूटस्य बोधनाय ननु धूमसमानाधिकरणपर्वतत्वादिवैयधिकरण्यावच्छेदकमहानसीयवह्नित्वाद्यभिन्नतया वह्नित्वादेरेन तादृशावच्छेदकभेदकूटवत्त्वमत हयावत्तादृशेति तादृशावच्छेदकत्वस्य महानसीयत्ववि

प्रमेयत्वादेरिति ननु व्यतिरेकित्वेन धर्मो विशेषणीयः वस्तुतस्तु यावत्संतादृशस्य कस्यापि न वैयधिकरण्यावच्छेदकं साध्यतावच्छेदकमेतावन्मात्रस्फोरणाय तथा च साधनसमानाधिकरणधर्मनिरूपितवैयधिकरण्यावच्छेदकघटितभिन्नधर्मवत्ता यावत्तादृशावच्छेदकत्वसूचकधर्मवत्तावा समं सामानाधिकरण्यमिति पर्यवसन्नो दोषान्तरमाह महानसादाविति तथा चेत्तदनधिकरणत्वेन दभा
साधनसमानाधिकरणस्य प्रमेयत्वादेर्वैयधिकरण्याप्रसिद्धेः महानसादौ समवायित्तया वह्नेर्वृत्तिमत्तोवा तन्नाभावान्न्यो
न्याधिकरणत्वं तद्वृत्तिभिन्नत्वं वा तद्रूपमपि दुष्टमित्यर्थः एतेन तदधिकरणावृत्तित्वमत्र ।।भावसत्ताद्भूमादावयुक्तलक्षणाभावाच्च ॥
वैयधिकरण्यमितिपरास्तम् समवायित्या महानसवृत्तित्ववह्नौ नास्तीत्यादिप्रतीतेर्वह्न्यादेरपि तादृशवैयधिकरण्याधिकरणत्वात्
विशिष्टवह्नित्वपर्याप्तत्वेपि शुद्धवह्नित्वेन तदभावः प्रतीतिबलादभ्युपेय इति भावः पूर्व ।।संबंधविशेषेणा वैयधिकरण्यविवक्षायां न्यो
न्यावच्छेदकत्वस्य व्यासज्यवृत्तित्वेत दवच्छिन्नभेदोपि शुद्धवह्नित्वे संभवतीव एकोन द्वाविति वत् तथापि तदनभ्युपगमेनेदं तथा चेति
इत्थं च साधनसमानाधिकरणो धर्मो वह्निरेवेति ध्येयम् मूलस्य न्यूनतापरिहारेतु तदधिकरणावृत्तित्वरूपमपि वैयधिकरण्यं दुष्पति
रेतेनेति एवं च विशेषणेति एतच्च प्रागेव निरूपितम् ॥ ॥

आत्माश्रयेति साध्यनिरूपितव्याप्तेः साध्यादिनिष्ठायाः प्रवेशादात्माश्रयः आत्माश्रयादीति धूमवान्वह्नेरित्यादौ धूमनिरूपितधूमनिष्ठव्याप्तेरपि लक्षणतया धूमनिष्ठव्याप्तिनिरूपकत्वस्य धूमनिष्ठस्यापि प्रवेशादात्माश्रयः धूमसामग्र्यादिनिष्ठस्य

उपाधिपदस्य साध्यसमव्याप्तवचनत्वयाऽऽत्माश्रयमसंगत्याह साध्यव्यापकत्वइत्यादि व्याप्तिनिरूपक

अथानौपाधिकसंबंधो व्याप्तिः उपाधिश्च साध्यव्यापकत्वे सति साधनाव्यापकः
व्यापकत्वं तु तद्वन्निष्ठात्यंताभावाप्रतियोगित्वम् व्यभिचारे चावश्यमुपाधिः ॥

त्वं व्यापकत्वमात्माश्रयादिग्रस्तमत आह तद्वन्निष्ठेति ॥ ॥ ॥ ॥ ॥ ॥

धूमव्याप्तिनिरूपकत्वस्यापि धूमसामग्रीव्यापकत्वघटितोपाधिघटितत्वात् तत्र च धूमनिष्ठस्य धूमसामग्रीनिष्ठव्याप्ति निरूपकत्वस्यापि घटकत्वात् ॥

(अनौपाधिक इत्यादि। उपाधेरागतस्यौपाधिकोऽनौपाधि (को नौपाधिकः व्यभिचारिणि संबंधउपाधिनाऽबाधितेव्यभिचारिता संबंधावच्छिन्नप्रतियोगिताकोपाध्यभावविशिष्टसाध्यसामानाधिकरण्यमिति तु निर्गलितोऽर्थः। अत्रोत्तरदलविरहितोपाधिशरीरस्य तत्संबंधावच्छिन्नाभावविशिष्टनिरूपक संबंधस्य लक्षणत्वेन वक्ष्यमाणदोषासंस्पर्शेऽपि गौरवमेव दोषइति ध्येयं।) धूमवान्वह्नेरित्यत्र सामग्रीनिरूपितधूमनिष्ठव्याप्तिलक्षणे धूमनिरूपितसामग्रीव्याप्तिः प्रविष्टा तल्लक्षणे सामग्रीनिरूपिता व्याप्तिः।) प्रविष्टेत्यन्योन्याश्रयोद्रष्टव्यः। भवानं घा तुघटकत्वादित्यंनतरधूमसामग्रीनिष्ठत्वेन धूमनिष्ठव्याप्तिनिरूपकत्वेन घटि

ननु यत्रोपाधिरव्याप्यवृत्तिर्नानाव्यक्तिको वा तत्रोपाधिलक्षणासत्त्वात्सोपाधिकत्वलक्षणातिव्याप्तिरत आह यत्रेति इदमत्र हृदयं तत्त्ववह्न्यभावादिमत्त्वेन तत्कपिसंयोगोऽव्याप्यवृत्तिरुपाधिः धूमवान्वह्नेरित्यादौ चार्द्रेन्धनादिर्नानाव्यक्तिकउपाधिः अतस्तइति व्यभिचारनिरूपकाधिकरणात तत्तद्व्यक्तिभिन्नत्वस्य वा स्वउस्य सर्वत्रासंभवादिति भावः तद्वद्भिन्नेति तत्त्वे दृष्टेनाव्याप्यवृत्तिर्नानाव्यक्तिकउपाधिः संगृह्यते तत्र तत्र तत्कपिसंयोगवद्भिन्नत्वप्रकारकप्रमाविशेष्यत्वाभाव आर्द्रेन्धनवद्भिन्नत्वप्रकारकप्रमाविशेष्यत्वाभावश्चाखंडोव्याप्यवृत्ति रुपाधिरित्यर्थः तद्वद्भिन्नत्वाभावस्य तद्भिन्नत्वात्तत्प्रकारकप्रमाविशेष्यत्वस्य च विशेष्यभेदेन भिन्नत्वाद्गुरुतरानुसरणं

योगिनासमं सामानाधिकरण्यात् एकाधिकरणमात्रवृत्तिगुणादिरूपाभावस्यापि पूर्वक्षणवृत्तित्वविशिष्टद्रव्यत्वानतिरेकात् ॥
शिष्टस्वाभावेन प्रतियोगिनासमं सामानाधिकरण्यात् प्रतियोगिव्यधिकरणाभावाप्रसिद्ध्या कथमतिव्याप्तिरिति चेत् अत्र केचित्
अतिव्याप्तिपदस्यासंभवपरामिति वस्तुतो गगनाद्यभावस्यैव वक्ष्यमाणस्वरूपः प्रसिद्ध्या प्रतियोग्यसमानाधिकरणः नित्यत्वविशि
गगनाद्यभावस्य योऽभावः तदभावो नित्यमेव गगनाभावः तस्यातिप्रसक्तत्वादिति नचैवं नित्यत्वविशिष्टद्रव्यत्वाभावस्याभावोपि
नित्यत्वमेवस्यादिति वाच्यम् नित्यत्वस्य गुणादौ द्रव्यत्वस्यानित्यद्रव्येति प्रसक्तत्वेन नित्यत्वविशिष्टद्रव्यत्वस्यैव तदभावाभाव

कपीत्यस्याचं मते संयोगसामान्याभावस्य द्रव्येऽभावाद्विशेषानुसरणं द्रव्यत्वाभाववान् सत्त्वादित्यादौ तु द्रव्यत्वाभावत्वरूपयत्किंचित्प्रतियो
गितावच्छेदकावच्छिन्नानधिकरणत्वं द्रव्यस्य संभवतीति नातिव्याप्तिसंभवतीति भावः गुणसामान्याभावस्योत्पत्तिकालावच्छेदेन घ
टादौ संभवात् घटत्वादिकमुपेक्ष्यात्मत्वहेत्वनुसरणं न च समवायेन मेयसामान्याभावस्य च प्रतियोगिनोऽनधिकरणत्वस्य घ
टादौ संभवात् घटत्वादिकमिति तु पेक्षितमिति वाच्यं समवायेन मेयसामान्याभावाभावः सत्ते वद्र्व्यमात्रसमवेताभावस्याभावो
द्रव्यत्वमेव ताद्यवादिति कपिसंयोगस्वरूपसाध्याभावसत्पोः प्रतियोगित्वादिति गुणानामिति गुणसामान्याभावत्वस
तत्प्रतियोगितावच्छेदकत्वमाविष्कर्तुं तृतीयपक्षानुसारेण परिहरति यादृशेत्यादि यस्याः प्रतियोगितायाः अवच्छेदकावच्छिन्नानधिक
रणत्वं हेत्वधिकरणस्य तादृश्याः प्रतियोगितायाः अनवच्छेदकत्वमित्यर्थः कपिसंयोगाभाववानात्मत्वादित्यादौ तु गुणसामान्या
तृतीये कपिसंयोगाभाववान् आत्मत्वादित्यादावव्याप्तेः साध्याभावानां कपिसंयोगानां गुणानामधिकरणस्याप्यात्मनः तत्प्र
तियोगितावच्छेदकगुणसामान्याभावत्वावच्छिन्नानधिकरणत्वात् मेवं यादृशप्रतियोगितावच्छेदकावच्छिन्नानधिकरणत्वं
भावत्वावच्छिन्नप्रतियोगितावच्छेदकावच्छिन्नानधिकरणत्वं हेतुमतस्तादृशप्रतियोगि हेतुमतस्तदनवच्छेदकत्वस्योक्तत्वात् ॥
तानवच्छेदकत्वस्य कपिसंयोगाभावत्वे सत्त्वान्नाव्याप्तिः द्रव्यत्वाभाववान् सत्त्वादित्यादौ तु द्रव्यत्वाभावत्वावच्छिन्नप्रतियोगितावच्छेद
कावच्छिन्नानधिकरणत्वं हेतुमतस्तादृशप्रतियोगितावच्छेदकत्वस्य द्रव्यत्वाभावत्वे सत्त्वान्नातिव्याप्तिः तत्रैव तेमानत्वमिति अभा
वस्य वृत्तौ नु सबंधभेदान्निवेशनीयः प्रयोजनाभावात् व्याप्यवृत्तिसाध्यके तु अभावस्य देशिकसंबंधेनैव निवेशनीयः तेन जातिमा
नसत्त्वादित्यादौ जात्यभावस्य कालिकतयाऽहेतुमति तत्रावपि विशेषणतयाऽवृत्तित्वान्नाव्याप्तिः दैशिकसंबंधः कश्चिदैशिकवि

[illegible]

वस्तुतस्तु द्रव्यत्वं नास्तीति वत्तद्व्यक्त्यभावो नास्तीति संबंधांशे तुल्याकारप्रतीतिबलात् भावानामपि दैशिकविशेषणतास्वीकार्या
अतएव द्रव्यत्वाभाववत् जातित्वादिमादौ जातित्वाधिकरणे समवायसंबंधेन द्रव्यत्वस्य सिद्ध्या दैशिकविशेषणतया तत्र तद्विवक्षणाद्द्रव्य
त्वाभाववान्मेयत्वादित्यादावतिव्याप्तिरिति निरूपणमनवकाशं कालिकसंबंधावच्छिन्नप्रतियोगिताकस्य भावाभावे साध्ये आत्मत्वा
दिहेतौ कालिकसंबंधेन आत्मत्वाधिकरणे जन्ये प्रसिद्ध्या दैशिकविशेषणतया तद्वृत्त्याकाशाभावप्रतियोगितावच्छेदकत्वस्य साध्य
तावच्छेदके सत्त्वाद्व्याप्तिरंतो व्याप्यहृति साध्यकोपि तत्र प्रतियोगिवैयधिकरण्यपदे यमिति प्राप्त्य सामानाधिकरण्ये साध्यस्य यादृश
संबंधः प्रविष्टस्तन्न्यपः तेनसंबंधेन यो हेतुमानित्यस्य फलमाह धूमसमवायीत्यादिना साध्यस्य चेत्यादेः फलमाह धूमस्य

अत्र च प्राप्त्य सामानाधिकरण्ये हेतो यादृशः संबंधः प्रविष्टस्तेन संबंधेन यो हेतुमान् तत्र वर्तमानस्य भावस्य साध्यस्य च यादृशः
संबंधस्तत्संबंधावच्छिन्नायाः प्रतियोगिताया अवच्छेदकत्वेपि वह्नित्वस्य न क्षतिः पट्ठो साध्यतावच्छेदकसंबंधेन प्रतियोग्यसंबं
कत्वं वो ध्यम् तेन धूमसमवायिनिष्ठाभावस्य संयोगावच्छिन्नप्रतियोगिताया धूमसंयोगिनिष्ठाभावस्य समवायावच्छिन्नप्रति
योगिताया अवच्छेदकत्वे पि धूमहेतुमतोवक्तव्यं तथा च संबंधभेदेन प्रतियोगितावैलक्षण्यात् एवं स्थिते सामानाधिकरण्यादौ
संबंधित्वं निवेशनीयं न त्वधिकरणत्वं तथा च धर्मिणि व्याप्यत्वव्यापकत्वे निर्वहति तथाहि तादात्म्यसंबंधेन धूमवतः संबंधिनि
महानसे वर्तमानो योऽन्योन्याभावस्तस्य तादात्म्यसंबंधावच्छिन्नाया प्रतियोगितायास्तदनवच्छेदके वह्निमत्त्वावच्छिन्नस्य वह्निमतः
तादात्म्येन संबंधेन संबंधिनि महानसे धूमवतस्तादात्म्येन संबंधित्वं एवं धर्मिणो व्याप्यत्वव्यापकत्वे बोध्ये ॥ ॥ ॥

योगित्वादिना प्रतियोगितावच्छेदकसंबंधेन प्रतियोग्यसंबंधित्वमभावस्य साध्यतावच्छेदकसंबंधावच्छिन्नाया प्रतियोगिता तत्र संबंधद्वयमपेक्षितं अवा
द्राह्यमित्युक्ति तादात्म्येन साध्यतायां साध्यतावच्छेदकसंबंधेन प्रतियोग्यधिकरणत्वस्याप्रसिद्धेः प्रतियोग्यसंबंधित्वमिति संबंधभेदेन साध्यतावच्छेदकसं

अतएव तादात्म्येन व्याप्तिर्यवस्थापनीयेव ननु जलादीनां पृथिवीत्वाभावव्याप्यत्वेपि पृथिवीत्वाभावस्वरूपव्यापकाभावेन जलादीनामसंताना
व एव सिद्धेर्न्योन्याभावव्याप्तितदुपपादयति यथा चेत्यादिना क्रमेण फलमाहेत्येत्यादिना धूमावयवे समवायेन तादृशधूमवत्त्वग्रहेपि न
संयोगेन वह्न्यनुमितिः पर्वते संयोगेन धूमवत्त्वग्रहेपि न समवायेन वह्न्यनुमितिरित्यर्थः न चात्रेवायरावविरोधी तदनवतारेपि तथात्वस्य

अतएव जलादीनां पृथिवीत्वाभावव्याप्यत्वं तत्र तत्रोक्तं संगच्छते यथा च यादृशेन संबंधेन हेतोर्व्याप्यत्वं गृहीतं तादृशेन सं
बंधेन तस्य पक्षविशिष्टत्वे यादृशेन च संबंधेन साध्यस्य व्यापकत्वमवगतं तादृशेन संबंधेन साध्ययक्तयोर्विशिष्टानुमि
तिस्तेन संयोगेन न धूमावयवे न वा समवायेन पर्वते वह्निधीस्तथैवावगतव्यापकताघटकसंबंधेन व्यापकस्याभावग्रहे
गृहीतव्याप्यताघटकसंबंधेन व्याप्यस्याभावः सिध्यति कथमन्यथा समवायेन वह्निविरहिणि महानसे संयोगेन संयोगे
न वा वह्निविरहिणि स्वावयवे धूमः समवायेन न निवर्तेते। निवर्तेते च संयोगेन वह्निविरहिणि स्वावयवे संयोगेन धूम इति
नियमः उपपद्यते तथा च तादात्म्यसंबंधेन जलादीनां व्याप्यताग्रहात् व्यापकनिवृत्त्यात् तादात्म्येनैव तेषामभावः सिध्यतीत्य

नुभविकत्वादिति। अन्वयिनि नियमं व्यवस्थाप्य तद्दृष्टान्तेन व्यतिरेकिण्यपि नियमं व्यवस्था (एवं चान्योन्याभावः ss ॥)
पयति तथैवेति एतेनान्वयव्यतिरेकाभ्यां दर्शयति॥ कथमन्यथेति कथमन्यथा नियम उपपद्यते इत्यनेनान्वयः नियमं दर्शयति
समवायेनेत्यादिना संयोगेन न निवर्तेत इत्यनेनान्वयः निवर्तेते चेत्यस्य तु धूम इत्यनुषंगः ॥ ॥ ॥ ॥

चिं·शि·अ·
१०६

प्राचीनग्रंथसंमतिं दर्शयति इत्थमेवेति तादात्म्येन व्याप्तिग्रहवत्स्यायनेनैवेत्यर्थः वृक्षशिंशपयोरिति यावच्छिंशपा सा वृक्षस्तादा
त्म्येनेत्यर्थः अन्यत्र तु पुष्टमक्रमाह अत एवेति यत एव तादात्म्येनापि व्यापकत्वमत एवेत्यर्थः गोत्वत्वोपस्थितिदशा
यां तु तत्र गोत्वस्यैव पक्षधर्मतावशेनानुमितिरित्यादि वक्तुं शक्यत इति दृश्यदशायामित्युक्तं अत्र च स्वरूपत उपस्थित एव गो
त्वे तादृशप्रतियोगितानवच्छेदकत्वग्रहो विलक्षणविषयताशाली अनुमितिहेतुरन्यथा तादृशप्रतियोगितानवच्छेदक
गोत्वावच्छिन्नसंबंधिसंबंधी सास्नादिरित्येवं रीत्या ग्रहस्योक्तत्वाद्यदृश्यदशायामसंवादसंगत्यापत्तेः न चाभावग्रहविधि
करणतावच्छेदकप्रकारेणोपस्थितिः कारणमिति स्वरूपत उपस्थितगोत्वे कथं तादृशप्रतियोगितावच्छेदकत्वाभावग्रह इति

इत्थमेव च तादात्म्येन वृक्षशिंशपयोर्व्याप्तिनिश्चय इति संगच्छते अत एव गोत्वत्वाद्यग्रहदशायां यत्र सास्नादिः
सा गौरिति तादात्म्येन गोव्यापकत्वग्रहे सास्नादिना तादात्म्येन गोसाध्यतादात्म्येन गोव्यतिरेकाच्च सास्नादेर्व्यतिरेकः

वाच्यम् अभावलौकिकप्रत्यक्षं प्रत्येव तथा हेतुत्वस्याभ्युपगमात् अत्र तु भावस्यालौकिकप्रत्यक्षत्वांगीकारा [illegible]
एव वस्तुतो वक्ष्यमाणोभयाभावघटितव्याप्तिलक्षणाभिप्रायेणेदं तादृशप्रतियोगितासामान्ये स्वविशिष्टसंबंधिनिष्ठाभावप्र
तियोगितानवच्छेदकावच्छेद्यत्वसाध्यतावच्छेदकसंबंधावच्छिन्नत्वोभयाभाव इत्यत्र तादात्म्येन गोः साध्यत्वे गोसंबंधिनिष्ठाभावा
युक्तो गोत्वस्य स्वरूपेणैव प्रवेशः स्वसमवायेन गोत्वस्य साध्यतायां स्वसंबंधिनिष्ठाभावे तु केवलगोत्वस्य प्रवेशात् गोत्वत्वानु
पस्थितिदशायां तादृशज्ञानासंभव इत्यत्र तात्पर्यं न तादात्म्येन गोः सिध्यतीत्यन्वयः

पृ०
१०६

एवं चेति हेतुसंबंधी सामान्याभिधानेनेत्यर्थः वृत्त्यनियामकेति संयोगमात्रस्याधेयत्वाद्यनवच्छिन्नसंयोगस्य अत एव वृत्त्यनियामकेत्यर्थः इ
हभूतले घटो नास्तीत्यादावाधेयत्वावच्छिन्नसंयोगप्रतियोगितावच्छेदकसंबंधविषयाविषयकः तथैवानुभवात् यद्यपि चाधेयत्वमविष
यीकृत्यापि कुण्डसंयोगमात्रं प्रतियोगितावच्छेदकसंबंधविधया विषयीकृत्याभावप्रत्ययः प्रामाणिकः तदा गगनादेः पृथिवीत्वादि
व्यापकत्वमिति तात्पर्यं केचित्तु मात्रपदं कृत्स्नार्थकं तेन गगनवान् पृथिवीत्वादित्यत्र जलादिवृत्त्यनियामकसंयोगेन वृत्ते
तेषोपजदभावस्य पृथिव्यां प्रतियोगिव्यधिकरणस्य तादृशसंबंधावच्छिन्नायाः प्रतियोगितानवच्छेदकत्वमासाद्य [illegible]

एवं च संयोगेन गगनादेरपि द्रव्यत्वव्याप्यत्वं वृत्त्यनियामकसंयोगमात्रस्याभावप्रतियोगितानवच्छेदकसंबंधरूपत्वे सा
ध्यतावच्छेदकसंबंधेन प्रतियोग्यसंबंधिताभिधाने वा पृथिवीत्वादिव्यापकत्वमपि ।। ।। ।।

तिः अन्यथा गगनसंयोगमात्रस्यैव तादृशप्रतियोगितावच्छेदकसंबंधरूपत्वं नान्यस्येत्युक्ते गगनाभावस्यैव प्रतियोगितायां
तादृशसंयोगावच्छिन्नत्वसत्त्वेन प्रतियोग्यसमानाधिकरणाभावीयप्रतियोगितायां तादृशसंयोगावच्छिन्नत्वस्याप्रसिद्ध्या ल
क्षणासंगतिः स्यादिति व्याचक्षुः प्रतियोगितावच्छेदकसंबंधरूपत्वस्येति तस्य प्रतियोगितानवच्छेदकत्वे साध्यतावच्छेदक
त्वनियामकसंयोगावच्छिन्नायाः प्रतियोगितायाः अप्रसिद्धिः स्यादित्यर्थः द्वितीयविवक्षानुसारेणाह साध्यतावच्छेदकेति
इत्थं च वृत्त्यनियामकसंयोगसामान्यप्रतियोगितानवच्छेदकत्वेपि तेन संबंधेन प्रतियोग्यसंबंधिनि घटाद्यभावस्य तथाविधः
प्रसिद्ध इति ।।

[illegible]

ननु उत्पत्तिकालेजन्यस्य प्रलयकाले च नित्यस्य पृथिवीमात्रस्यैव गगनाभाववत्वात् कथं तस्य पृथिवीत्वव्यापकत्वमत आह तदभाववत्त्वोपीति तत्संबंधित्वात् गगनासंबंधित्वात् तथा च गगनाभावो न प्रतियोगिव्यधिकरण इति भावः तथैव स्वत्वनियामकसंयोगेनैव अ संबंधित्वादित्यनेन सामानाधिकरण्यस्य व्याप्तिघटकस्याभावः प्रदर्शितः सामानाधिकरण्यस्य तत्तस्यानुमित्यहेतुत्वेनापेक्षा ह अव्यापकत्वादिति ननु वृत्तिनियामकसंयोगेन गगनादेः कथमव्यापकत्वं तेन संबंधेन गगनाभावस्य प्रतियोगिसंबंधि नोऽप्रसिद्धप्रतियोगिवैयधिकरण्यं निर्वाच्यमित्यर्थः अत्र द्रव्यातिरिक्तेति स्पंदात्मकखंडकालवारणाय च स्वत्र द्रव्यपदं खं उकाले अतीतत्वादेस्तदभावस्य प्रतियोगिवैयधिकरण्यसंभवात् निधर्मव्यापकत्वं स्यादेवमेव स्यादतस्तद्वारणाय सर्वाणि

तदभाववत्तोपि पृथिव्यादेः संयोगेन तत्संबंधित्वात् सिद्धिरपि स्यान्नैव ननु वृत्तिनियामकसंबंधेन तेनासंबंधिता

विशेषणानिप घपिचतु ईर्व्यातिरिक्तेत्यवधुक्तम्॥ ॥त अव्यापकत्वाच्चावयक्री भविष्यतिचेदनुपरिष्टात् ॥

नावत्वेनमहाकालत्वासंभवात् तत एव आकाशादीनां कालत्वाभावादेववारणात् तथापि तांत्रिकपरिभाषामाश्रित्य तथाभिधानं त थाच महाकालोघटवत्त्वावच्छेदकतरि माणादिमहाव्याप्तिः ननु महाकालामात्र विशिष्टघटाभाव एव महाकाले प्रतियोगिव्यधिकर णत्वादित्यत आह विशेषणतो विशेषेणेति महाकालमात्रवृत्तिविशेषणताविशेषेणेत्यर्थः महाकालविशेषणता प्राइदानीं घट इतिमतीतिविषय(?) कालीयविशेषणताविलक्षणत्वात् कथमन्यथा इदानीं सर्वमितिमतीतस्याभावेपि कालः सर्वदा नित्योपि यतिकमतीतिवलात्कालस्य सर्वाधिकरणत्वमिति केचित्तु इदानीमितिधीविलक्षणधीर्महाकालेनानुपपद्यते इदानीमिस्य

नचैवं गुणान्यत्वविशिष्टसत्तापि गुणवृत्तिः स्यादिति वाच्यं गुणो गुणान्यत्वविशिष्टसत्तावानितिधीविरहादित्याहुः व्याप्यवृत्तिसाध्य के प्रतियोगिवैयधिकरण्यपदस्यानुपादानादाहाव्याप्यवृत्तीति कालिकसंबंधेन व्याप्यवृत्तिराकाशाभावो दिवकालिकतया प्र तियोग्यनधिकरणकालावच्छेदेन देशे दैशिकसंबंधावच्छिन्नघटाद्यभाववत्तदैशिकतया प्रतियोग्यनधिकरणदेशावच्छेदेनैव का लिकसंबंधावच्छिन्नाभाववत्त्वात् नचाकाशाभावस्य दैशिकतया अनधिकरणमस्ति केवलान्वयित्वात् कालिकतया तदनधि करणस्यात्मादेः सत्वेपि कालेन तदवच्छेदेन तदभावासंभवात् आत्मनि इदानीमाकाशाभाव इति प्रतीत्याऽमाद्यवच्छेदेनैव काले आकाशाभावविषयीकरणात् नच कालिकतया आकाशाभावाभावस्यात्मादिवृत्तेः कालिकतया काले सत्त्वात् तदा

नन्वत्र द्रव्यातिरिक्तद्रव्यात्मककालमात्रवृत्तिधर्मस्य विशेषणताविशेषणाव्याप्यवृत्तिः किमपि व्यापकं न स्यात् स्वा वच्छेदकसंबंधेन प्रतियोगिनोऽसंबंधिनि काले वर्तमानस्याभावस्य प्रतियोगितायां तत्संबंधावच्छिन्नत्वस्यैतेन संबंधेन

रणोयमतियोगिवैयधिकरण्यं भावस्येति कथं वाच्यं व्याप्यवृ ॥यत्प्रतियोगिसंबंधितदन्यत्वस्य चेकालेऽसंभवात् त्रिसाध्यके दैशिकविशेषणतया हेतुसमानाधिकरणत्वस्यैव निवेशे नाव्याप्त्यभावात् अन्यथा सत्तावान् जातेरित्यादाव पि कालिकतया सत्ताभावस्य हेतुसमानाधिकरणत्वात् प्रतियोगिवैयधिकरण्यनिवेशनायतेदिति संक्षेपः तत्र विवक्षा हृयस्यैवासंभवं दर्शयति स्वावच्छेदकसंबंधेनेत्यादिना स्वे प्रतियोगितावत्संबंधावच्छिन्नत्वस्य कालिकसंबंधावच्छिन्नत्वस्या संभवादित्यभिप्रायः संबंधः तेन संबंधेन कालिकसंबंधेन न चेति वाच्यमित्यभिप्रायेणान्वयः तादृशेति तादृशसंबंधः प्रतियोगि

चिं·शि·भ
१०८

संबंधविवक्षायाः फलमाह सत्तादीति। इदं ज्ञानवत्संयोगवद्द्रव्यत्वादिसाधावित्यर्थः तत्र विषयताया वृत्त्यनियामकत्वादाकाश
दौ ज्ञानाभावस्य वृत्तितानियामकसंबंधेन प्रतियोगिव्यधिकरणस्य सुघटत्वमेवेत्यतः संयोगसाध्यकानुसरणं तत्रापि नित्यगुण
संयोगस्यैकेनापि संबंधेनासत्त्वात्तत्रैव प्रतियोगिवैयधिकरण्यं स्यादत आह आदीति। आदिना गुणान्यत्वविशिष्टसत्तापरि
ग्रहः अतएवाह कर्मादावपीति। इत्थं च कर्ममात्रस्यैककालिकतया संयोगवत्त्वात् तत्र संयोगाभावस्य प्रतियोगिवैयधि
करणासंभवादव्याप्तिरिति भावः सत्ताद्यधिकरणसामान्यसमवेतत्वाभावस्य संयोगेऽसंभवादाह। यत्किंचिदिति प्रतियो

नच तादृशेन संबंधेन हेत्वधिकरणीभूतयत्किंचिद्व्यक्तिवृत्तिप्रतियोगितावच्छेदकविशिष्टप्रतियोगिसामान्यकत्वं वक्त
व्यं तथा चावृत्तिगगनाद्यभावव्यवहारिकेवलान्वयिसिद्धिः सत्ताद्यधिकरणकर्मादौ समवायेन ज्ञानसामान्यस्य चावृत्तेर्ना
तिव्याप्तिः भूतत्वमूर्तत्वोभयवत्त्वाद्विशिष्टगुणकर्मान्यत्वविशिष्टसत्तात्वविशिष्टत्वादिकं च मनोगुणादिवृत्तिसंयोग
सामान्यं तु न किंचिद्व्यावृत्तमिति वाच्यम्॥

गितावच्छेदकविशिष्टस्य फलमाह भूतत्वेति हितावच्छिन्नाभावस्य म॰
नोवृत्तिप्रतियोगिकत्वेऽपि हितावच्छिन्नमनोवृत्तित्वाभावात् प्रतियोगिवैयधिकरण्यं तत्रेत्यर्थः हितावच्छिन्नप्रतियोगिताकाव्या
प्यवृत्तित्वे प्रतियोगिताविशिष्टसंयोगवृत्तित्वाभिधानेऽक्तातिव्याप्तिनिरास इति स्थलांतरमाह। गुणेति अन्यत्वविशिष्टसत्ता
वच्छिन्नप्रतियोगिताविशेष्यपर्याप्त इति किंचिदिति भावः विशिष्टांतद्वयं मनोगुणाद्योर्यथाक्रममन्वेति सामान्यपदफलमाह। सं
योगसामान्येति तथा च संयोगि द्रव्यं त्वात्मादौ संयोगव्यक्तिविशेषस्य यत्किंचिद्व्यावृत्तत्वेऽपि तत्कालावच्छिन्नसंयो
गाभावेन प्रतियोगिव्यधिकरण इति नाव्याप्तिरिति भावः

राम०
१०८

विशिष्टसत्तेति तथा च गुणान्यत्वविशिष्टसत्तावान् जातेरित्यादौ गुणान्यत्वविशिष्टसत्तायास्तु शुद्धसत्तानतिरिक्तायाः समभावात्तद्विशि
ष्टाभावो निरुक्तप्रतियोगिसमानाधिकरण इत्यतिव्याप्तिरिति भावः ननु यत्किंचिद्धेत्वधिकरणवृत्तितानवच्छेदकप्रतियोगितावच्छे
दककत्वं वक्तव्यमत आह। समवायेनेति। अतिव्याप्तिमेव घटयति जातिमतीति मेयत्वाधिकरणं जातिमज्जातिशून्यं च तत्क्रमा

विशिष्टस्यानतिरिक्तत्वात् समवायेन जातेः साध्यत्वे मेयत्वादावतिव्याप्तेश्च जातिमन्निष्ठतादृशाभावप्रतियोगिता
याः जातित्वेनानवच्छेदात् जातिशून्ये च समवायेन वर्तमानस्याप्रसिद्धत्वात् संयोगादिसाध्यकगुणकर्मान्यत्वा
दावतिव्याप्तेश्च अदृष्टे हेतुमति समवायेन वृत्तेरप्रसिद्धेः द्रव्ये च संयोगारोपवृत्तेः मैवम्॥ ॥ ॥

न्मति समवायेन वृत्तेरप्रसिद्ध्या प्रतियोगिव्यधिकरणस्य घटत्वाभावादेः प्रसिद्धावपि तत्प्रतियोगिताया जातित्वेनावच्छिद्यते जाति
शून्ये च समवायेन वृत्त्यप्रसिद्ध्या जातित्वावच्छिन्नाभावो न प्रतियोगिव्यधिकरण इति भावः ननु जातेर्व्याप्यवृत्तित्वात्तत्साध्यकेऽप्र
तियोगिवैयधिकरण्यमवर्जनीयमतः संयोगादीति गुणकर्मान्यत्वेति एकैकोपादाने तत्रैव प्रतियोगिवैयधिकरण्यं प्र
सिद्धं स्यादत उभयान्यत्वमुपात्तं। अदृष्टे गुणादौ समवायेन जातेर्वृत्तेरप्रसिद्धत्वादाह हेतुमतीति। तादृशं च सामान्यादिक
मिति भावः॥

साध्यतावच्छेदकसंबंधेन प्रतियोग्यसंबंधिहेतुसंबंधिनिष्ठाभावांतमाकाशाभावसाधारणं निर्वक्ति। साध्यतावच्छेदकेत्यादिना प्रतियो
गितावच्छेदकसंबंधेन प्रतियोग्यसंबंधीत्यादिविवक्षायाः अप्रसंगगनादेर्हेतिमत्त्वपक्षे निष्कृष्यदर्शिनी यत्वान्न तत्र समाश्वि रुक्तः
कचिच्च तादृशसंबंधेत्यादिपाठः तत्र प्रतियोगितावच्छेदकसंबंधसामान्ये साध्यतावच्छेदकसंबंधसामान्येन्वितमर्थः वह्निमान्धू
मादित्यादौ महानसीयवह्निसंयोगेवह्नित्वावच्छिन्नप्रतियोगिकत्वधूमाधिकरणयत्किंचिद्व्यक्तिपर्वतानुयोगिकत्वोभयाभाव
स्य सत्त्वादव्याप्तेर्वारणाय सामान्यमिति। निरुक्तेतिपाठ्यसाभावप्रतियोगितावच्छेदकविशिष्टत्वर्थः घटादिसंयोगनिष्ठपर्वतानुयोगिक
त्वव्यक्तिविशेषायोगोलगीयसंयोगनिष्ठवह्निप्रतियोगिकत्वविशेषोभयाभावस्य संयोगसामान्ये सत्त्वात्तेष्वव्याप्तिरतः सामान्य

साध्यतावच्छेदकसंबंधसामान्यो निरुक्तप्रतियोगिप्रतियोगिकत्वहेत्वधिकरणीभूतयत्किंचिद्व्यक्त्यनुयोगिकत्वसामान्योभया
भयेति। अत्र च प्रतियोगित्वमनुयोगित्वं च संबंधनिरूपितं प्रतियोग्यनुयोगिनिष्ठमधिकरणता ॥ भावस्यावेवक्षितत्वात् ॥
दित्याहतः स्वरूपसंबंधविशेषः संबंधभेदेपि न भिन्नः तेन धूमसंयोगकालिकसंबंधनायोगोलकवृत्तित्वसत्त्वेपि नायोगोल
कानुयोगिकत्वं किंतु धूमसंयोगीयकालिकसंबंधस्यायोगोलकानुयोगिकत्वमितिनातिव्याप्तिः एतेन हेत्वधिकरणानुयो
गिकत्वेन तत्रानुयोगिकत्वसामान्यप्रवेशे धूमवान्वह्नेरित्यादावतिव्याप्तिः धूमसंयोगस्य कालिकादिसंबंधेनायोगोलका
नुयोगिकत्वसत्त्वात्संयोगीयविलक्षणानुयोगिकत्वप्रवेशे च द्रव्यवान्सत्त्वादित्यादौ संयोगेन साध्यतायामतिव्याप्तिस्तत्र हे
त्वधिकरणीभूतगुणानुयोगिकत्वस्य संयोगनिष्ठस्याप्रसिद्ध्या भावस्य गुणे प्रतियोगिव्यधिकरणाभावादित्यपास्तम्

यत्किंचित्पदस्य प्रयोजनमाह वह्न्यधिकरणायोगोलकेति अन्यथा वह्न्यधिकरणसामान्यानुयोगिकत्वधूमप्रतियोगिकत्वोभयत्वस
धूमसंयोगसत्त्वात्प्रतियोगिव्यधिकरणं न स्यादिति भावः निरुक्तपदस्य फलमाह चैत्रान्यत्वेति चैत्रान्यत्वविशिष्टेन दंडत्वाने
न दंडादित्यादौ चैत्रान्यत्वविशिष्टत्व दंडाभावप्रतियोगी एतद्दंडस्तत्प्रतियोगिकत्वचैत्रानुयोगिकत्वोभयस्य चैत्रवृत्तिदं
संयोगे सत्त्वात्प्रतियोगिव्यधिकरणं न स्यान्निरुक्तपददानेन तु चैत्रवृत्तिदंडसंयोगे चैत्रान्यत्वविशिष्टेतद्दंडप्रतियो
गिकत्वाभावादुभयाभाव इति चैत्रान्यत्वविशिष्टेन दंडाभावः प्रतियोगिव्यधिकरण इति भावः एकस्याएव दंडस्योक्तेः चै

धूमसंयोगवह्न्यधिकरणायोगोलकानुयोगिकत्वस्य चैत्रान्यत्वविशिष्टतद्दंडसंयोगे एतद्दंडाधिकरणचैत्रानुयो
गिकत्वस्य गुणकर्मान्यत्वविशिष्टसत्तासमवायेप्यत्यधिकरणगुणकर्मानुयोगिकत्वस्य विरहात्तानि प्रसंगः

त्रान्यत्वविशिष्टत्वेन साध्यत्वं दंडत्वेन हेतुत्वं चैतन्मतमवयित्तुमत्तादिति अन्यथा चैत्रवृत्तिदंडस्यक्तेः चैत्रान्यत्वविशिष्टत्वाभावे
न चैत्रान्यत्वविशिष्टदंडाभावप्रतियोगिताभावात्। निरुक्तपदं विहाय केवलप्रतियोगिकत्वाज्ञानव्यप्रभयाभावसत्तेन प्र
तियोगिव्यधिकरणसंभवान्निरुक्तपदानर्थक्यापातात् समवायेन साध्यतायामपि निरुक्तपदव्यावृत्तिमाह गुणेति
। यद्यपि समवायस्यैकत्वात्गुणकर्मान्यत्वविशिष्टसत्ताप्रतियोगिकत्वगुणानुयोगिकत्वोभयमपि समवायस्येवेति निरु
क्तपदेदत्तेपि न प्रतीकारः न च साध्यतावच्छेदकावच्छिन्नसाध्यप्रतिं ॥

योगिकसंबंधस्य साध्यतावच्छेदकसंबंधोऽतएव धूमसंयोग इत्यादिना तथैव दर्शितं तथा च समवायेन गुणानुयोगिकत्वसत्त्वेपि गुणकर्मान्यत्वविशिष्टसत्तासमवायेन गुणानुयोगिकत्वाभावादभयाभाव इति वाच्यं। तथा सति निरुक्तपदवैयर्थ्यापातात् तथापि समवायस्य नानात्वाभिप्रायकोयं ग्रंथः अत एवोत्तरविवक्षायां समवायस्यैकत्वेपीत्यादिनाः स्मो विवक्षाया मस्वरसं वक्ष्यति। किंचित्तु समवायस्य तत्तन्निरूपितस्यैव संबंधत्वं न तु शुद्धस्यान्यथा रूपिनीरूपव्यवस्थानस्यात् तथा च संबंधपदस्वरसात् यद्यद्रूपावच्छिन्नसमवायस्य संबंधत्वं तत्तद्रूपावच्छेदेनैवोभयाभावः सामान्यरोयस्तदानातु वाच्यः तथा च सत्ताप्रतियोगिकसमवायस्यापि संबंधत्वात् तत्प्रतियोगिकत्वावच्छेदेन केवलसत्ताप्रतियोगिकत्वगुणानुयोगित्वोभयस

स्वरूपसंबंधेन गगनादेर्वृत्तिमत्त्वे तु निरुक्तप्रतियोग्यनधिकरणहेतुमन्निष्ठाभावप्रतियोगितासामान्ये यत्संबंधावच्छिन्न-
त्वयद्धर्मावच्छिन्नत्वोभयाभावस्तेन संबंधेन तद्धर्मावच्छिन्नस्य व्यापकत्वं बोध्यम् ॥ ॥ ॥

त्वात् विशिष्टसत्ताभावस्य प्रतियोगिवैयधिकरण्यक्षतिरतो निरुक्तेति इत्थं च समवायस्यैकत्वेपीति ग्रंथस्तु शुद्धसमवायस्यैव कस्मिंश्चिदधिकरणे कस्यचित्संबंधत्वं न तु तन्निरूपितस्येत्याशयेन योजनीय इत्याहुः स्वरूपसंबंधेनेति गगनादेरपीति त्वप्रवादस्तु संयोगसमवायसंबंधपर इति भावः निरुक्तप्रतियोग्यनधिकरणं प्रतियोगितावच्छेदकसंबंधेन यादृशप्रतियोगितावच्छेदकावच्छिन्नप्रतियोग्यधिकरणभिन्नं प्रतियोगितासामान्ये तादृशप्रतियोगितासामान्ये धूमवान्वह्नेरित्यादौ घटाभावप्रतियोगितायामुभयाभावसत्त्वादतिव्याप्तिरतः सामान्य इति वह्निमान्धूमादित्यादौ समवायावच्छिन्नवह्न्यभावसंयोगावच्छिन्नमहानसीयवह्नि

तेन संबंधेनेति। न चैवं समवायेन गगनादेरपि व्यापकत्वं स्यात् समवायेन गगनाभावस्य प्रतियोगिव्यधिकरणत्वाभावादिति वाच्यं तथात्वेपि सामानाधिकरण्याभावेन व्याप्तिलक्षणेऽतिव्याप्त्यभावात् गगनादिव्यापकत्वस्य निर्वचनीयत्वे तु साध्यतावच्छेदकसंबंधेन यत्किंचिदधिकरणवृत्तितावच्छेदकत्वं व्यापकतावच्छेदके विशेषणीयमिति न वह्न्याकाशोभयत्वादिनापि व्यापकत्वेति अत्र यद्धर्मावच्छिन्नत्वं अभावप्रतियोगितानिष्ठं विलक्षणं निवेश्यं अन्यथा विषयतया ज्ञानावच्छिन्नस्य समवायेन साध्यतायां ज्ञानावच्छिन्नस्तदीङः स्वादित्यादौ हेतुसमानाधिकरणघटाद्यभावप्रतियोगितायां ज्ञानावच्छिन्नत्वसमवा

समवायेन मेयसामान्याभावस्य सामान्यादौ सत्त्वात् मेयत्वादेरप्यभावप्रतियोगितावच्छेदकत्वं सुलभम् ॥

यसंबंधावच्छिन्नत्वोभयसत्त्वात् अव्याप्त्यापत्तेः विषयतासंबंधेन ज्ञानाश्रयेपि ज्ञानावच्छिन्नत्वसत्त्वात्तत्ज्ञानावच्छिन्नो घट इति प्रतीतेः तदपि साध्यतावच्छेदकतावच्छेदकसंबंधे न बोध्यं तेन वह्निमान्वह्न्यवयवत्वादित्यादौ समवायेन साध्यतायां विषयितयावह्नित्वविशिष्टसत्तादेर्याभावस्तत्प्रतियोगितायां विषयितयावह्नित्वावच्छिन्नत्वसमवायसंबंधावच्छिन्नत्वोभयसत्त्वेपि नाव्याप्तिरिति विषयितया मेयत्वविशिष्टस्य ज्ञानादेरभावप्रतियोगितायां विषयितया मेयत्वावच्छिन्नत्वस्याप्रसिद्धावपि स्वरूपसंबंधेन साध्यतावच्छेदकतावच्छेदकेन तदवच्छिन्नत्वस्याप्रसिद्ध्याऽव्याप्तिरत आह मेयत्वादेरपीति ॥

गगनादेरवृत्तित्वप्रसंगेपि पूर्वकल्पे न समाप्तिमिति दर्शयति अत एवेति अत्र संयोगस्य द्वित्वावच्छिन्नप्रतियोगिताकत्वविरहेपि द्रव्यं ग
गने इत्यादौ नातिव्याप्तिरित्यन्वयः विरहेपीति तथा च पूर्वकल्पेपि न तत्रातिव्याप्तिसंभावनेत्यर्थः न च वह्निधूमोभयवान्धूमादित्यत्रा
व्याप्तिः संयोगसामान्ये द्वित्वावच्छिन्नप्रतियोगिताकत्वविरहादिति वाच्यम् निरुक्तप्रतियोगिकत्वस्य तेन न प्रतियोगितावच्छेद
कावच्छिन्नविशिष्टधीनियामकताविशेषस्य संसर्गनिवेशस्य विवक्षितत्वात् उभयत्वावच्छिन्नविशिष्टधीनियामकत्वं चैकाधिक
रणकोभयसंयोगद्वयस्य एकमेव अन्यथा पर्वतो वह्निधूमोभयवानिति प्रतीत्यनापत्तेः एवमेव चैत्रानुयोगिकदण्डप्रतियोगि
कसंयोगेपि चैत्रान्यत्वविशिष्टदण्डप्रतियोगिकत्वाभावादुभयाभावः संगच्छते इत्थं च संयोगस्येत्यस्यायोगोलकानुयोगि
कसंयोगस्येत्यर्थः महानसवृत्तिसंयोगद्वये द्वित्वावच्छिन्नप्रतियोगिकत्वासत्त्वादिति ध्येयम् विरहेपि चेत्यत्र चकारः समादि

अत एव समवायस्यैकत्वेपि द्रव्यत्वादिप्रतियोगिकत्वगुणाद्यनुयोगिकत्वोभयवत्त्वेपि द्रव्यं जानित्यादौ वह्निधूमोभयवान्व
ह्नेरित्यादौ संयोगस्य द्वित्वावच्छिन्नप्रतियोगिकत्वविरहेपि च नातिव्याप्तिरस्यापि वृत्तेरिति प्रतियोगित्वादिस्वरूपसंबं

कइति वह्निधूमोभयवान्धूमादित्यादौ संयोगस्य द्वित्वावच्छिन्नप्रतियोगिकत्वविरहे ॥ धविशेषेण संबंधत्वेन निवेशः ॥ ॥
पि च नातिव्याप्तिरव्याप्तिर्वेत्यपपाठः इत्थमेव स्फुटं तत्र साध्यसाधनभेदेन लक्षणभेदे वह्निधूमोभयवान्धूमादित्यादावुभयत्वावच्छि
न्नसाध्यके व्याप्तिलक्षणे निरुक्तपदस्थाने संभवद्युक्तत्वात्तत्र निरुक्तपदं न देयम् तथा च वह्निधूमोभयवान्वह्नेरित्यादावतिव्याप्तिरित्या
ह वह्निधूमोभयवानित्यादिना विरहेपि चेति तथा चासंभवापादकतया निरुक्तपरामर्शेन पद इत्यत सत्त्वमायेति यथाश्रुतमेव समञ्जसमिति ध्ये
यम् ननु प्रतियोगित्वस्वरूपसंबंधविशेषः तत्र च नियमघटितसंबंधत्वप्रवेशादात्माश्रयः इत्यत आह प्रतियोगित्वादिस्वेति आदि

ननु सामानाधिकरण्यं संबंधित्वं तत्र संबंधत्वप्रवेशादात्माश्रय इत्यत आह सामानाधिकरण्येपीति ननु यत्र संबंधसामान्येनैव व्याप्तिस्तत्र
संबंधत्वं प्रविष्टमतो दर्शितं चेति प्रकारताविशेष्यतान्यविशिष्टधीविषयत्वरूपमित्यर्थः अभावत्वं द्रव्यादिप्रकारकान्योन्याभाववत्त्वं तथा चा
भावसाध्यकव्यभिचारिण्यतिव्याप्तिरत आह अभावत्वं चेति इदमिह नास्तीति नियामकभावाभावसाधारणाभावत्वप्रवेशे तादात्म्येन सा
ध्यतायां व्यभिचारिण्यतिव्याप्तिस्ताह शप्रतीतिनियामकाभावप्रतियोगितायां तादात्म्यावच्छिन्नत्वाभावेनोभयाभावसत्त्वात् इदमि
दं न भवतीत्युक्तं भावाभावसाधारण इति भावस्वरूपाभावमात्रप्रवेशे भावसाध्यकव्यभिचारिण्यतिव्याप्तिरतो भावोपादानं पाठ

सामानाधिकरण्येपि संबंधः संयोगत्वादिनैव निविशते दर्शितं च नियमाघटितमपि संबंधत्वम् अभावत्वं चेदमिह नास्तीदमि
दं न भवतीत्यादिप्रतीतिनियामको भावाभावसाधारणः स्वरूपसंबंधविशेषः अतो नाभावसाध्यकव्यभिचारिण्यतिव्याप्तिः
तदपि वा नोपादेयं प्रयोजनविरहात् विषयतात्वादिवच्चातियोगित्वाधिकरणत्वत्वं संबंधत्वादप्यतिरिक्ता एव प

शप्रतियोगितावच्छेदकावच्छिन्नानधिकरणत्वं हेतुमत्तस्तादृशप्रतियो ॥ दार्था इत्येकदेशिनः ॥ इति व्याप्तिसिद्धान्तलक्षणं समाप्तं
गितायामुभयाभावविवक्षयैव सामञ्जस्ये तदुपादानमपि न कर्तव्यमित्याह तदपीति ननु घटाभावप्रतियोगित्वं घटस्वरूपं घटत्वस्वरूपं वा
आद्ये घटोऽभावप्रतियोगीत्यस्य घटोऽभाववान् घटवानित्यर्थः स्यात् तथा चाननुभवः द्वितीये घटोऽभाव घट इत्याकारः स्यात् तत्रापि च स एव दो
षः एवमधिकरणत्वमपि न संयोगादिस्वरूपं वदरस्यापि कुण्डाधारत्वप्रसंगात् अत आह विषयतेति नैयायिकैकदेशिनामप्यतिरिक्तविष
यत्वास्वीकारात्तस्याहृष्टान्तत्वा अत एवातिरिक्तविषयतावादिमत इति तत्रैव दर्शयति तत्त्वादीति विषयतात्वादीत्यर्थः आदिना प्रक
तात्वविशेष्यतात्वपरिग्रहः तत्त्वे चेति प्रतियोगित्वाधिकरणत्वत्वे इत्यर्थः ॥

प्रतियोगित्वानवच्छेदके सत्त्वावच्छेदकत्वं किमिति तन्निरूपयति नचेत्यादिना इह एतल्लक्षणे संभवति समनियते लघौ संभवति न
नु प्रमेयधूमवत्त्वस्य धूमवत्त्वघटितत्वात् वक्ष्यमाणरीत्या नानाधूमवत्त्वभेदः संभवतीत्यत आह कंबुग्रीवेति कंबुग्रीवात्वादिसंस्थानव
त्तिजातिभेदः परंपरासंबंधेन तद्वत्त्वमेव कंबुग्रीवादिमत्त्वं मतस्य गौरवमपीति भावः ननु पार्थिवत्वादिव्याप्यजातौ घटत्वानां
कं घटग्रीवादिमत्त्वेन समनियतमतस्तत्प्रतियोगितावच्छेदकं भवत्येवेति नातिव्याप्तिरतो घ्राणग्राह्येत्यादि इदमपि यथाश्रुतेऽयघ
पि न गंधत्वसमनियतमतीन्द्रियगंधगन्धाभावात् नच घ्राणग्राह्यत्वं ग्रहणयोग्यत्वं योग्यतावच्छेदकं च गंधत्वमेवेति वाच्यम् तथा सति

नन्ववच्छेदकत्वमिह न स्वरूपसंबंधविशेषः संभवति लघौ गुरौ तदभावात् प्रमेयधूमवत्त्वकंबुग्रीवादिमत्त्वघ्रा
णग्राह्यगुणत्वादेस्तथात्वेनैतेन रूपेण साध्यतायां व्यभिचारित्वप्रसंगात् ॥ ॥ ॥

ति प्रमेयधूमवत्त्वतुल्यत्वाय तादृशगुणत्वस्यासंभवेपि तथापि घ्राणग्राह्यत्वघटितगुणत्वव्याप्यजातिमत्त्वं तद्व्याप्यं तस्य च न गंधत्वघ
टितत्वं गंधत्वाविषयकसुरभित्वादिविषयकप्रतीत्याविषयीकरणसंभवाद्वक्ष्यमाणरीत्यावच्छेदकभेदसत्त्वादिति भावः य
द्वा घ्राणग्राह्यगुणत्वं घ्राणग्राह्यगुणत्वव्याप्यजातित्वं तस्य परंपरासंबंधेन गंधत्वसमनियतत्वात्तेन रूपेण साध्यताया
मतिव्याप्तिरिति यथाश्रुतेऽवेति अतएवात्र न प्रतियोगितानवच्छेदकत्वेन तत्प्रतियोगितामादाय पानातिरिक्तवृत्तित्वं निर्वाच्यं ॥

तथाविधप्रतियोगितात्वेनानुगतीकृतप्रतियोगितामादायवाऽऽपेदोषमाहप्रतियोगितापादइति प्रतिव्यक्तिभिन्नत्वेहेतुमाह स्वरूपसं
बंधात्मिकापाइतिधूमत्वोदरपीति तथाचानेकवृत्तिधर्मेणसाध्यतायांव्यभिचारिण्यपतिव्याप्तिरितिभावः द्वितीयमाशंकानिषेधतिन
चतथाविधेतिहेतुसमानाधिकरणप्रतियोगिव्यधिकरणेत्यर्थः प्रतियोगिव्यधिकरणहेतुसमानाधिकरणाभावप्रतियोगितासामान्य
शून्यत्वस्यासिद्धिःताहशप्रतियोगितासामान्यस्यकेपलान्वयित्वात् स्वाभूनहतिताहशप्रतियोगितासामान्यकत्वोक्तौचासं

नाप्यनतिरिक्तवृत्तित्वंप्रतियोगितायाःस्वरूपसंबंधात्मिकायाःप्रतिव्यक्तिभिन्नत्वेनधूमत्वादेरपितदतिरिक्तवृ
त्तित्वात् नचतथाविधयत्किंचिदेकाभावप्रतियोगितासामान्यशून्याहत्तित्वंतत् ॥ ॥ ॥

भवःसर्वस्यैवसाध्यतावच्छेदकस्यस्वान्यूनवृत्तिताहशप्रतियोगिताकत्वादतआह यत्किंचिदेकेति एकपदंतत्तदभावानांप्रातिस्वि
करूपेणग्रहणायेत्यपरंचताहशप्रतियोगितावच्छेदकंपक्षतत्तद्वेदकूटत्वेवसत्ताभावियत्रिध्येयम् ततश्चाभावप्रतियोगि
तात्वावच्छिन्नस्याभावयत्सामान्येतितन्चप्रमेयवान्भेयत्वादित्यादौसमवायेनसाध्यतायांव्यभिचारिण्यपतिव्याप्तिःसमवायावच्छिन्न
प्रमेयसामान्याभावप्रतियोगितायाःकेवलान्वयित्वेनतच्छून्याप्रसिद्ध्याप्रमेयत्वस्यताहशप्रतियोगितानवच्छेदकत्वादितिवाच्यं एवम्॰
स्वास्वनहतित्वंताहशप्रतियोगितासामान्यकत्वेतात्पर्यात् ततश्चानतिरिक्तवृत्तित्वम् ॥

अतएवयत्किंचिदेकाभावप्रवेशादेवअनवच्छेदकत्वापातात् ताहशयत्किंचिदेकाभावप्रतियोगितानवच्छेदकतायाताते नत्साधनंसंगच्छत
इति अतिरिक्तसामान्याभावसाधनंसंगच्छतइत्यर्थः अन्यथावह्निसमानाधिकरणविशेषाभावकूटप्रतियोगितावच्छेदकत्वेनैवातिप्रसं
गवारणेनतत्साधनंव्यर्थमेवेत्याशयः ननुताहशप्रतियोगितान्यूनानतिरिक्तवृत्तित्वमेवावच्छेदकत्वंवाच्यमतआहतार्णेतिद्वित्वादीत्यादिना
भावत्वपरिग्रहः संयोगेनतार्णतालोभयत्वावच्छिन्नप्रतियोगितान्यूनानतिरिक्तवृत्तित्वस्यवह्नित्वेसत्त्वेनविशेषितं। अनतिरिक्तवृत्तित्वेअतए

अतएवातिरिक्तसामान्याभावव्याप्यावेक्षमत्वादेरनवच्छेदकतायातादयेतत्साधनमपिसंगच्छतइतिवाच्यमवह्निघटवृत्तिद्वि
त्वतार्णतालोदहनवृत्तिद्वित्वाद्यवच्छिन्नप्रतियोगिताकाभावप्रतियोगितानतिरिक्तवृत्तिवह्नित्वादावतिप्रसंगात् एतेना
न्यूनवृत्तित्वविशेषितमपिपरास्तम् अतएवनानाप्रतियोगित्वस्यैकप्रतियोगितांगीकारेपिननिस्तारःलघुरूपसम
नियतंगुरुरूपेणसाध्यतायांसद्धेतावव्याप्तिस्ताहशतदवच्छेद्यत्वाप्रसिद्धेरितिचिन्न

ववह्नित्वादावतिप्रसंगादेव ननिस्तारइतिधूमत्वादेरिवसर्वस्यैवताहशप्रतियोगितानतिरिक्तवृत्तित्वेनव्याप्तिलक्षणासंभ
वापातादितिभावः ननुतथापिप्रतियोगिताधर्मिकोभयाभावविवक्षायाप्रमेयवह्नित्वावच्छिन्नत्वस्याप्रसिद्धानातिव्याप्तिसंभवतीत्यत
आहलघुरूपेति ताहशेति ताहशंलघुरूपनियतंयद्गुरुरूपंप्रमेयवन्हित्वादितदवच्छेद्यत्वाप्रसिद्धेःतथाचेतद्विवक्षायाप्रतिव्या
प्तिविरहेपिप्रमेयवह्निमान्धूमादित्यादावव्याप्तिरितिभावः ॥ ॥ ॥ ॥

प्रतियोगितावच्छेदकतिप्रतियोगितानतिरिक्तवृत्तित्वमुक्तौ हेतुसमानाधिकरणायत्किंचिदेकाभावादेरपि प्रवेशे गौरवमनेकव्यक्तिकप्रतियोगितांगीकारेऽपि वह्नित्वावच्छिन्नप्रतियोगितायाव्यासज्यवृत्तित्वानंगीकारेताराणात्सोभियत्वावच्छिन्नप्रतियोगिताया अपि वह्नित्वसमानवृत्तिकत्वात्तदनतिरिक्तवृत्तिवह्नित्वस्यापच्छेदकत्वापत्तिरतोवच्छेदकपर्यन्तानुधावनं प्रतियोगितावच्छेदकं च विशिष्योपादेयम् तेन तादृशप्रतियोगितावच्छेदकत्वेनानुगतीकृतानां तत्तद्वह्नित्वानामनतिरिक्तवृत्तित्वेऽपि वह्नित्वस्य न क्षतिः तदनतिरिक्तवृत्तित्वं प्रतियोगितावच्छेदकतानियामकसंबंधेन तदभाववति साध्यतावच्छेदकतानियामकसंबंधेनावृत्तित्वं तेन तादृशप्रतियोगितावच्छेदकीभूतघटत्वादेरपि कालिकसंबंधेन वह्निवृत्तित्वात्संबंधसामान्येन तदभाववति

प्रतियोगितावच्छेदकानतिरिक्तवृत्तित्वस्य विवक्षितत्वात् स्वसमानवृत्तिकं चावच्छेदकं ग्राह्यम् ॥

समवायेन वह्नित्वस्यावृत्तावपि न क्षतिः नवा प्रतियोगितावच्छेदकतानियामकसंबंधेन घटत्वादेरभाववति कालादौ कालिकादिसंबंधेन घटत्वादेर्वृत्तित्वेऽपच्छेदकत्वक्षतिः महाकालोर्ध्वं सत्वात्कालपरिमाणादित्वादावपि आकाशत्वघटत्वादिकमेवपारिभाषिकावच्छेदकं तादृशप्रतियोगितावच्छेदकीभूतगगनत्वाभाववति गगनत्वादेर्ध्वंसत्वीयस्वरूपसंबंधविशेषेणावृत्तेरिति ननु तथाविधप्रतियोगितावच्छेदकतार्णानामेभियत्वाद्यनतिरिक्तवृत्त्येव वह्नित्वादिकमित्यसंभव

इत्यत आह स्वसमानेति स्वपारिभाषिकावच्छेदकत्वेनाभिमतम् ॥

ननु स्वसमानत्वमन्यूनानतिरिक्ताधिकरणकत्वेन समवायसत्तादिनावाह्यमपि तादृशोभयत्वादौ गतमत आह तत्वं चेति स्वसमानवृत्तिकत्वं चेत्यर्थः उभयत्वादेरपि वह्नित्वाधिकरणे पर्याप्तेराह स्वपर्याप्तीति स्वपर्याप्त्यवच्छेदकावच्छिन्नपर्याप्तवृत्तिकत्वमित्यर्थः तेन यावद्वह्नीनामेव वह्नित्वपर्याप्त्यधिकरणत्वेऽपि न क्षतिः प्रत्येकरूपावच्छिन्नपर्याप्त्यवच्छेदकं च प्रकृते ग्राह्यं यावान्वह्निरिति प्रत्यये च वह्नित्वपर्याप्तित्वेनानुगतानां तावत्पर्याप्तीनामवच्छेदकतया यावत्त्वं भासते तेन तु प्रत्येकरूपावच्छिन्नपर्याप्तेरिति न यावत्त्वादौ वह्नित्वसमानवृत्तिकत्वमिति भावः यत्तु स्वपर्याप्त्यवच्छेदकताव्यापकपर्याप्त्यवच्छेदकताकत्वमित्यर्थः वह्नित्वपर्याप्त्यवच्छेदकतेन तद्वह्नित्वावच्छेदेन यावत्त्वस्यापर्याप्तेर्न तत्रातिप्रसंग इति तन्न तथा सत्यनतिरिक्तवृत्ति

तत्वं च स्वपर्याप्त्यधिकरणपर्याप्तवृत्तिकत्वं यावत्त्वादिकं तु न तथा पर्याप्तिश्चायमेको घटः इमौ द्वाविति प्रतीतिसाक्षिकः स्वरूपसंबंधविशेषः एवं त्रित्वादिकमपि नेह त्वादिसमानवृत्तिकमिति द्वित्वादिना साध्यतायां नात्रांशस्यैवैयर्थ्यादिति उभयत्वादेरपि वह्नित्वपर्याप्त्यवच्छेदकावच्छेदेन समवायेन सत्त्वादाह पर्याप्तवृत्ति व्याप्तिकत्वमिति वह्नित्वपर्याप्त्यवच्छेदकावच्छिन्नपर्याप्तवृत्तिकं महानसीयवह्नित्वमपीति तदनतिरिक्तवृत्तित्वमुक्तं यावत्त्वादिकमित्यादिना तानां नाभयत्वपरिग्रहः न तथा न वह्नित्वपर्याप्त्यधिकरणपर्याप्तिकं न तु पर्याप्तिः समवायसत्त्व चप्रत्येकं वह्न्यावयोरित्यत आह पर्याप्तिश्चेति एको घट इति एकमात्रवृत्तिधर्मावच्छेदेन घटत्वस्य पर्याप्तिदर्शयितुं इमौ द्वावित्युभयवृत्तिधर्मावच्छेदेन द्वित्वस्य पर्याप्तिरिति दर्शयितुं न तु प्रत्येकवृत्तित्वव्यासज्यवृत्तित्वाभ्यामेव समानवृत्तिकता तथा च वह्नि

धूमो भयवान्धूमादित्यादाव्याप्तिस्तदुभयत्वस्य समानपधूमाकाशत्रित्वानतिरिक्तवृत्तित्वादत आह त्रित्वादिकमपीति ॥

ननु ह्रदो न वह्निमानिति प्रतीतौ प्रतियोगितावच्छेदकतावच्छेदकतया पर्याप्तिरेव संबंधो भासते न तु समवायः अन्यथा प्रत्येकसत्त्वेपि प्रति
योगितावच्छेदकावच्छिन्नप्रतियोगिमत्त्वात् द्वित्वावच्छिन्नाभावो न स्यात् तथा च पर्याप्तिसंबंधेनोभयत्वाभाववति प्रत्येकं वह्नौ च
वह्नित्वस्य सत्त्वेनैवावच्छेदकत्वाभावे किमिति स्वसमानाधिकरणतिकत्वमवच्छेदकविशेषणमिति चेत् ताहृशसंबंधविशिष्टवेपराणां निरि
क्तत्वेति लाभायैव तदुपादानमिति एक पर्याप्तिसंबंधेन द्वित्वस्याभावो न प्रत्येकस्मिन्नन्यथोभयत्वेनप्रत्येकरूपेण द्वित्वाभाव
सत्त्वादिमौ न द्वाविति प्रतीत्यापत्तेः न च तदुभयत्वावच्छेदेन द्वित्ववत्ताज्ञानं विरोधितत्त्वेनैवाच्यमस्तु उभयत्वस्यानतिरिक्तत्वेन तद्रूपावच्छे
दकत्वमाराधनतथापि ताहृशप्रतीत्यापत्तेर्दुर्वारत्वात् ताहृशप्रतीतिं प्रति विरोधित्वकल्पने तद्रूपेण प्रत्यासत्त्वद्वित्वाभावानभ्युपगम
वलाघवादेकोनद्वाविति प्रतीतेरेकत्वे द्वित्वाधारतावच्छेदकत्वाभावावगाहित्वेनैवोपपत्तेरित्यन्ये परे तु ताहृशसंबंधेन प्रतियोगिता
वच्छेदकाभाववद्वृत्तित्वमित्युक्तौ तादृशताघटकं चावच्छेदकत्वं स्वरूपसंबंधविशेषः स्वं च प्रागुक्तयद्धर्मावच्छिन्नेत्यत्र यद्धर्मिस्वनिर्दिष्टधर्मा
वच्छिन्नेति वाच्यं तेनोक्तव्याप्तिनिरासः। शिरोर्णोभयत्वमपि न प्रतियोगितावच्छेदकं स्यादुभयत्वाभाववत्प्रत्येकस्य पर्याप्त्या उभयत्वस्य
तथा च तत्साधारण्याय प्रतियोगिव्यधिकरणत्वे स्याभावविशेषणस्यावश्यकत्वेन वह्नित्वादावतिव्याप्तिरतः स्वसमानवृत्तिकत्वे विशेषणान
न च प्रतियोगिव्यधिकरणत्वं प्रतियोगितावच्छेदकसंबंधेन प्रतियोग्यनधिकरणवृत्तित्वे द्वित्वानधिकरणं च प्रत्येकमप्रसिद्धिरिति दोषतादवस्थ्य
मिति वाच्यं पर्याप्त्यवच्छिन्नसमवायस्यैव प्रकृते प्रतियोगितावच्छेदकसंबंधत्वेन तत्र पर्याप्तिसंसर्गविहाय समवायसंबंधेन प्रतियोग्यधिकरणत
दन्यत्वस्यैव लाघवेन विवक्षणात् न च ह्रदो न वह्निरिति प्रतीतेरवच्छेदकत्वनियामकपर्याप्त्यवच्छिन्नसमवायत्वस्य संबंधो भासते तथा च तेन संबंधेन त
दभावविवक्षणे तादृशतात्पर्याभयत्वादेरवच्छेदकत्वसंपत्तये प्रतियोगिव्यधिकरणत्वं विवक्षणीयमतः अतः पर्याप्तिसंसर्गमनुपादाय समवायादिरूपम
वप्रतियोगितावच्छेदकतानियामकसंबंधमादाय तदन्यतिरिक्तवृत्तित्वनिवेशेन तथा सति वह्नित्वादावतिव्याप्तिरतः स्वसमानाधिकृतत्वमिति

नन्वेवं प्रमेयवान्सत्तावद्वा नाम प्रमेयत्वादित्यादावतिव्याप्तिः प्रमेयत्वस्यावच्छेदकस्याभावाप्रसिद्धा सत्ताया समवायेनाभाववति साध्यता
वच्छेदकतानियामकसमवायेन वृत्तेरप्रसिद्धा साध्यतावच्छेदके प्रमेयत्वे सत्तायां च ताहृशावच्छेदकत्वस्य विरहात्॥ अवच्छेदकानति
रिक्तवृत्तिपदेन स्वसमानाधिकरणात्यंताभावप्रतियोगितानवच्छेदकत्वाहृशावच्छेदकतावच्छेदककत्वस्य विवक्षणेपि धूमवा
न्वह्नेरित्यादावतिव्याप्तिस्तत्र धूमत्वस्य स्वरूपत एवावच्छेदकत्वेन तदवच्छेदकतावच्छेदकस्याभावात्स्वसमानाधिकरणाभाव
प्रतियोगितावच्छेदकवृत्तित्वाद्युक्तितं यत्समानाधिकरणाभावप्रतियोगितानवच्छेदकं तत्त्वमवच्छेदकत्वमित्यभिधानेपि दंडि
मान्द्रव्यत्वादित्यादौ द्रव्यत्वसमानाधिकरणाभावप्रतियोगितावच्छेदकीभूतदंडत्वे तद्युक्तित्वान्नादंडसमानाधिकरणा

वस्तुतस्तु तदवच्छिन्नप्रतियोगिताकाभाववदसंबद्धत्वविशिष्टसामान्यकत्वम्॥

भावप्रतियोगितावच्छेदकत्वादवच्छेदकलक्षणासंदेशादव्याप्तिः न च दंडत्वसामान्यलक्षणाधीनदंडत्वमात्रविशेष्यकधीरेव दं
डत्वभावप्रतियोगितावच्छेदके तथा च तन्नानीयतद्युक्तित्वदंडसमानाधिकरणाभावप्रतियोगितानवच्छेदकमिति नाव्याप्ति
रिति वाच्यम् ज्ञातातिरिक्तपदार्थस्यापि किंचिद्धर्मावच्छिन्नस्यैव प्रकारत्वेन दंडत्वभिन्नाविषयकदंडविशेष्यकज्ञानत्वेनावच्छेद
कत्वे वाच्ये तद्रूपपक्षस्यादंडत्वे नैवावच्छेदकत्वेनाप्रवादत आह वस्तुतस्तु तदिति तदवच्छिन्नेति तदवच्छिन्नाभाववदसंबद्धं यद्वि
शिष्टं सामान्यं तत्त्वमित्यर्थः तत्पदं ताहृशस्वरूपसंबंधरूपावच्छेदकपरं भवति हि वह्निसमानाधिकरणताहृशाभावप्रतियो
गिताया स्वरूपसंबंधरूपं पदवच्छेदकधूमत्वतदवच्छिन्नाभाववति प्रमेयधूमत्वविशिष्टसामान्यमसंबद्धम्॥ ॥

अत्रतादृशधूमत्वाश्रयप्रतियोगिताकधूमाकाशोभयत्वावच्छिन्नाभाववतिधूमत्वविशिष्टस्यसंबद्धत्वाद्धूमत्वादावव्याप्तिरतस्तदवच्छिन्नेति॥न
चतत्रतादृशावच्छेदकाप्रसिद्धेर्नव्याप्तिलक्षणातिव्याप्तिरितिवाच्यम् गगनत्वस्यैवतथात्वात् गगनत्वविशिष्टस्यकुत्राप्यधिकरणेऽसं
बद्धत्वेनतदवच्छिन्नाभाववत्संबद्धत्वात् धूमत्वावच्छिन्नाभावस्याप्युत्पत्तिकालावच्छेदेनधूमवतिसत्वाद्गगनत्वरूपतादृशावच्छेदकमा
दायधूमत्वादिकमनवच्छेदकंस्यादतःप्रतियोगिव्यधिकरणत्वेनाभावोविशेष्यःतदर्थश्चसाध्यतावच्छेदकसंबंधेनतत्प्रतियोगितावच्छेद
कावच्छिन्नप्रतियोगिव्यधिकरणत्वं तेनप्रतियोगितावच्छेदकावच्छिन्नस्यप्रसक्तस्यचित्तत्सामान्यस्यचेत्यादिविकल्पोक्तदोषानवकाशः
नवासमवायसंबंधेनधूमानधिकरणपर्वतादौधूमत्वविशिष्टस्यसंबद्धत्वेपिधूमत्वस्यावच्छेदकत्वक्षतिः संबंधसामान्येनप्रतियोगिव्य
धिकरणत्वविवक्षणेघटरूपसमानाधिकरणाभावप्रतियोगितावच्छेदकपृथ्वीत्वावच्छिन्नस्यानधिकरणगगनादौघटत्वविशिष्टस्य
संबद्धत्वात्पृथ्वीत्ववान्घटरूपादित्यादौनातिव्याप्तिः नवाद्रव्यंगुणादित्यादौपृथिव्यन्यत्वविशिष्टद्रव्यत्वाभावस्यप्रतियोगितावच्छेद
कीभूतपृथिव्यन्यत्वविशिष्टद्रव्यत्वत्वावच्छिन्नप्रतियोगिताकस्यद्रव्यत्वरूपप्रतियोगिव्यधिकरणस्याधिकरणेगुणादौद्रव्यत्वत्व
विशिष्टसामान्यस्यासंबद्धत्वेपिप्रवृत्तिरिति नतद्वच्छिन्नाभावोपिसाध्यतावच्छेदकसंबंधसामान्यइत्यादिक्रमेणाप्रतियोगिसमा
नाधिकरणःतेनकालोघटवान्कालपरिमाणादित्यत्रतादृशाभावप्रतियोगितावच्छेदकीभूतगगनत्वावच्छिन्नाभावस्यप्रतियोगिव्य
धिकरणतस्याप्रसिद्ध्यागगनत्वस्यपरिभाषिकावच्छेदकत्वक्षतिःतादृशाभाववदसंबद्धत्वंचसाध्यतावच्छेदकसंबंधेनतादृशाभ
ववत्संबद्धत्वसामान्याभावःतेनगगनत्वादिविशिष्टसामान्यस्यापिगगनत्वावच्छिन्नाभाववृत्तितादात्म्येनवृत्त्यनियामकसंबंधारि
नासंबंधित्वात्परिभाषिकावच्छेदकाप्रसिद्धेर्नव्याप्तिलक्षणासंभवः नचतादृशाभावप्रतियोगितावच्छेदकमहानसीयवन्हित्वा
वच्छिन्नाभाववतिजलत्॥

दौवन्हित्वावच्छिन्नसामान्यस्यासंबद्धत्वेपिवन्हिमान्धूमादित्यादावव्याप्तिः तादात्म्येनसाध्यतायांतेनसंबंधेनवृत्तेरप्रसिद्धेरसंबद्ध
त्वेतिस्वविशिष्टेतिकरणाच्चगुणान्यत्वविशिष्टसत्तावान्जातिमत्वादित्यत्रविशिष्टसत्तात्वावच्छिन्नाभाववतिगुणेविशिष्टसत्ता
श्रयीभूतसत्तायाःसंबद्धत्वेपिविशिष्टसत्तात्वस्यनावच्छेदकत्वक्षतिः स्वविशिष्टत्वंचयद्यपिनसाध्यतावच्छेदकताघटकसंबंधेनकाला
दौडिमान्दंडसत्वान्नाकालपरिमाणादित्यादौवृत्तितानियामकसंयोगेनकालिकविशेषणतासंबंधेनवाधंसतीयविशेषणताविशेष
णवासाध्यतावच्छेदकतायांतादृशावच्छेदकाप्रसिद्धेःगगनत्वादेस्तेनसंबंधेनावृत्तेःनापिप्रतियोगितावच्छेदकताघटकेनसंबंधेनकं
बुग्रीवादिमत्वान्मेयत्वादित्यत्रकंबुग्रीवादिमत्वस्यगुरुतयानवच्छेदकत्वेनघटत्वविशिष्टप्रतियोगितावच्छेदकताघटकीभूतसमवा
येनकंबुग्रीवादिमत्वस्यवृत्तेरप्रसिद्ध्यनवच्छेदकत्वापातात् वन्हिमान्धूमादित्यादौविशृंखलितयावन्हित्वव्यक्त्यनाभावप्रतियोगिता
वच्छेदकीभूतवन्हित्वविशिष्टत्वानादेस्तरवच्छिन्नाभाववत्यसंयुक्तत्वाद्वन्हित्वादेरवच्छेदकत्वापातात्नापिसंबंधसामान्येनय
द्ववत्त्वावच्छिन्नोभाववंतिगगनत्वावच्छिन्नाभाववतिचकालिकसंबंधेनघटत्वगगनत्वविशिष्टस्यसाध्यतावच्छेदकीभूतसंयोगेन
संबद्धत्वात्तादृशावच्छेदकाप्रसिद्ध्यासंभवापातानापिसाध्यतावच्छेदकताघटकप्रतियोगितावच्छेदकताघटकान्यतरसंबंधेनका
लिकसंबंधेनदंडविशिष्टस्यकालिकसंबंधेनसाध्यतायांकालपरिमाणहेतौतादृशावच्छेदकाप्रसिद्ध्यायतःतादृशप्रतियोगि
तावच्छेदकीभूतगगनत्वादेःकालिकसंबंधेनाश्रयस्यघटादेस्तदवच्छिन्नाभाववतिकालादौसंबद्धत्वात्कालभेदविशिष्टगगनत्वस्यका
लिकसंबंधेनघटादृत्तितयान्यतरसंबंधेनतद्विशिष्टसामान्यस्यतदवच्छिन्नाभाववदसंबद्धतयातत्तावच्छेदकप्रसिद्धावपितादात्म्य
नधूमसंबंधिनःसंयोगेनसाध्यतायांव्यभिचारिण्यतिव्याप्तेः तादृशप्रतियोगितावच्छेदकीभूतधूमत्वावच्छिन्नाभाववतिप्रतियोगिताव

घटकसमवायेन धूमविशिष्टस्य परमाणवादेः संयुक्तत्वेन धूमादेरनवच्छेदकत्वात्तथापि तद्वच्छिन्नाभाववर्तियेनयेन संबंधेनयद्विशिष्टसामान्यमसंबद्धं तेनतेन संबंधेनतत्प्रकारकज्ञानत्वावच्छिन्नभिन्नसाध्यतावच्छेदकताघटकसंबंधेनयद्धर्मप्रकारकं ज्ञानं तद्धर्मावच्छिन्नसामानाधिकरण्यं व्याप्तिरिति वक्तुलाघवः विषयितादिसंबंधेन वन्हित्वप्रकारकज्ञानत्वावच्छिन्नभिन्नं समवायेनवह्नित्वप्रकारकज्ञानमप्रसिद्धमिति वन्हिमान्धूमादित्यादौ वन्हित्वादेरनवच्छेदकत्वसंभवः। अतएव प्रमेयधूमत्वप्रकारकज्ञानत्वावच्छिन्ने धूमत्वप्रकारकज्ञानत्वावच्छिन्नभेदाभावात्तत्स्वरूपसंबंधरूपावच्छेदकत्वस्य लक्षणप्रवेशेऽपि न तत्राति व्याप्तिरेवमवच्छिन्नत्वादृशलघुरूपाघटितकंबुग्रीवादिमत्वादिकस्यैकातधानवच्छेदकत्वक्षणस्वेपक्षोपक्रमेदीधितिकारः विवेचयिष्यते चेदमग्रिमेऽत्रयुस्यविशेष्यांशेसाधनसमानाधिकरणाभावप्रतियोगितावच्छेदकप्रकारकज्ञानभिन्नं साध्यतावच्छेदकताघटकसंबंधेनयत्प्रकारकं ज्ञानं तद्वच्छिन्नसामानाधिकरण्यं व्याप्तिरिति वा अर्थः अतएवेतद्विमानेतद्भूतलत्वादित्यादौ नाव्याप्तिः नन्वेवमपि यत्साध्यतावच्छेदकसाधनसत्यानाधिकरणाभावप्रतियोगितावच्छेदकप्रकारकज्ञानेस्यैवविषयस्तत्राव्याप्तिरिति चेन्नयत्प्रकारकत्वावच्छिन्नकारणतापारिभाषिकावच्छेदकप्रकारकत्वावच्छिन्नकारणताभिन्नात्तद्वच्छिन्नसामानाधिकरण्यस्यैवविवक्षितत्वात् महानसीयवन्हित्वावच्छिन्नप्रतियोगिताकतादृशाभाववतिवन्हित्वविशिष्टसामहानसीयवन्हेरसंबद्धत्वात्सामान्येति पर्वतीयादिवन्हेर्वन्हित्वविशिष्टसामान्यस्यमहानसीयवह्न्याद्यभाववतिसंबद्धत्वान्नाव्याप्तिः

ननु गुणकर्मान्यत्वविशिष्टसत्तावान्जातेरित्यत्रातिव्याप्तिः विशिष्टस्यानतिरेकेण विशिष्टसत्तात्वावच्छिन्नाभाववति विशिष्टसत्ताया अपि संबद्धत्वात् नच तत्र तद्वच्छिन्नाभाववदवृत्तितानवच्छेदकत्वं तदर्थः प्रमेयवन्हिमान् [illegible] धूमादित्यत्राव्याप्तेः तादृशमहानसीयवह्नित्वावच्छिन्नाभाववति पर्वतादौ प्रमेयवह्नित्वविशिष्टस्यासंबद्धत्वेऽपि प्रमेयवह्नित्वस्य गुरुतया धेयतानवच्छेदकत्वात् प्रमेयवन्हिमान्धूमादित्यादौ तदर्थः प्रतीतिवलात् रूपाणामाधेयतावच्छेदकत्वस्वीकारेऽपि सत्तावान्द्रव्यत्वादित्यत्रातिव्याप्तिः सत्तात्वावच्छिन्नाभाववति जात्यादौ समवायेन द्रव्यत्वेऽप्रसिद्धत्वायामसत्तात्वस्य पारिभाषिकावच्छेदकत्वाभावादित्यहचेत्राह स्वविशिष्टेति स्वपारिभाषिकावच्छेदकत्वेनाभिमतमन्नद्विशिष्टत्वं च पूर्वनिरुक्तसंबंधेन वाच्यमतेन न पूर्वोक्तदोषः तत्त्वं तावृत्वस्वरूपसंबंधरूपावच्छेदकपरेन तथा च हेतुसमानाधिकरण

स्वविशिष्टसंबंधिनिष्ठाभावप्रतियोगितानवच्छेदकतत्त्वं वा तादृनतिरिक्तवृत्तित्वं वक्तव्यम्

तादृशाभावप्रतियोगितावच्छेदकं यद्विशिष्टसंबंधिनिष्ठाभावप्रतियोगितानवच्छेदकं तत्पारिभाषिकावच्छेदकमित्यर्थः विशिष्टसत्तात्वाश्रयसत्तासंबंधिगुणादिनिष्ठाभावप्रतियोगितावच्छेदकत्वाद्विशिष्टसत्तात्वस्यानवच्छेदकतायामितः स्वविशिष्टेति प्रतियोगितावच्छेदकमात्रस्येव संबंधांतरेण स्वविशिष्टसंबंधिनिष्ठाभावप्रतियोगितावच्छेदकत्वात्तादृशावच्छेदकाप्रसिद्ध्याव्याप्तिलक्षणासंभवइत्यतन्त्साध्यतावच्छेदकसंबंधेनसंबंधित्वं वाच्यम् संयोगेनसाध्यतायां तादृशप्रतियोगितावच्छेदकमात्रस्यैवतद्विशिष्टसंबंधिनिष्ठाभावप्रतियोगितावच्छेदकत्वादवच्छेदकाप्रसिद्ध्याऽव्याप्तिरतःप्रतियोग्यधिकरणत्वमभावे देयं साध्यतावच्छेदकसंबंधेनप्रतियोगितावच्छेदकावच्छिन्नासमानाधिकरणत्वं तदर्थः तेन वह्निमान्धूमादित्यादौ वन्हिसमानाधिकरणघटाद्यभावस्यापि कानकादिसंबं

संबंधसामान्येन प्रतियोगिव्यधिकरणाभावस्य प्रतियोगितानवच्छेदकत्वेपि नासंभवः नच शब्दवाचागगनत्वादित्यादौ शब्दसमानाधि
करणस्य घटत्वाद्यभावस्य केनापि संबंधेन प्रतियोगिसमानाधिकरणत्वाभावाद्गुणत्वादौ शब्दत्वविशिष्टसंबंधिनिष्ठाभावप्र
तियोगितावच्छेदकत्वसत्त्वाच्छब्दत्वादेर्नावच्छेदकत्वमिति नासंभव इति वाच्यं घटत्वादेरपि स्वाश्रयसंयोगादिसंबंधेन गगना
दिवृत्तित्वात् एवं समवायेन गगनाद्यभावस्यापि शब्दसमानाधिकरणस्य तादात्म्येन स्वप्रतियोगिसमानाधिकरणत्वात्प्रति
योगिव्यधिकरणत्वाद्यभावांतरप्रतियोगितानवच्छेदकत्वाद्गगनत्वादेस्तमादायापि शब्दत्वस्यावच्छेदकत्वबोधं तादा
त्म्येन साध्यतायामव्याप्तिवारणाय प्रतियोगिसंबंधित्वस्यैव तदर्थतया वाच्यत्वात् नैवं च स्वत्वस्यैव धर्मस्य यत्किंचित्संबंधेन
सर्वत्र सत्त्वात्प्रतियोगिव्यधिकरणाभावस्यैवाप्रसिद्धिः विशिष्टप्रतीतिविषयस्यैव संबंधत्वात् सर्वं च संसर्गत्वे विशिष्टप्रती
तेः सामान्याभावादेतावतापि संभवस्यानपायाच्चेति सत्तात्वविशिष्टसंबंधिनिष्ठो यः प्रतियोगिव्यधिकरणोभावस्तत्प्रतियोगिता
नवच्छेदकं विशिष्टसत्तात्वमपीति सत्तावान् जातेरित्यत्राव्याप्तिरतः प्रतियोगितावच्छेदकावच्छिन्नेति प्रतियोगितानवच्छेदकत्व
त्रावच्छेदकत्वं हेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकताघटकसंबंधेन बोध्यम् तेन विषयितादिसंबंधेन धूमत्वादिवि
शिष्टस्य ज्ञानादेः संयोगेनाभावस्य प्रतियोगिव्यधिकरणस्य च घटत्वादिविशिष्टसंबंधिनिष्ठस्य प्रतियोगितायां विषयितासंबं
धेनावच्छेदकत्वेपि घटत्वादेर्न तादृशावच्छेदकत्वप्रसिद्धिर्विषयितया धूमसमानाधिकरणाभावप्रतियोगितावच्छेदकस्य वह्नि
त्वादेर्वह्नित्वविशिष्टसंबंधिनिष्ठाभावप्रतियोगितायाः समवायेनानवच्छेदकत्वाद्वह्नित्वादेर्न तादृशावच्छेदकत्वोपपत्तिर्वा न
न्वेवं हेतुसमानाधिकरणाभावे प्रतियो ॥

गिव्यधिकरणत्वस्य प्रतियोगितावच्छेदकावच्छिन्नासमानाधिकरणत्वविवक्षणात् व्यर्थं जातिसमानाधिकरणाभावप्रतियोगितावच्छेद
कं यद्द्रव्यत्वं तदवच्छिन्नाभाववति विशिष्टसत्तात्वविशिष्टस्यासंबद्धत्वत्वस्य विशिष्टसत्तात्वविशिष्टसंबंधिनिष्ठाभावप्र
तियोगितानवच्छेदकत्वात्तल्लक्षणद्वयेपि तादृशद्रव्यत्वाभावमादायैव विशिष्टसत्तात्वस्य प्रतियोगितावच्छेदकत्वेन गुणान्य
त्वविशिष्टसत्तावान् जातेरित्यादावतिव्याप्तिविरहादिति अत्र ब्रूमः प्रतियोगितावच्छेदकावच्छिन्नानुपादाने हि यत्प्रतियोगितावि
शिष्टस्यानधिकरणं हेत्वधिकरणं तत्प्रतियोगितावच्छेदकं यद्विशिष्टसंबंधिनिष्ठतादृशाभावप्रतियोगितानवच्छेदकं तद्भिन्नं यत्साध्य
तावच्छेदकमित्यर्थः तथा चाव्याप्तिर्वह्निमान्धूमादित्यादौ महानसीयवह्निनिष्ठा यावद्व्यक्तित्वावच्छिन्नप्रतियोगिता तद्विशिष्टमहा
नसीयवह्नेरनधिकरणं पर्वतादि तत्प्रतियोगितावच्छेदकं वह्नित्वं स्ववह्नित्वविशिष्टसंबंधिनिष्ठाभावप्रतियोगितानवच्छे
दकत्वेन वह्नित्वादेरपि यावद्विशेषाधिकावच्छेदकत्वात् प्रतियोगिभेदेप्यभावप्रतियोगिताया अभेदे तु गुणकर्मान्यत्वविशिष्ट
सत्तावान् जातेरित्यत्रातिव्याप्तिः विशिष्टसत्ताभावस्य द्रव्यत्वाभावसमनियततया एकत्वेन द्रव्यत्वनिष्ठप्रतियोगिताया अपि स्व
तानिष्ठतया गुणादेः प्रतियोगिताविशिष्टाधिकरणत्वेन द्रव्यत्वाभावस्यापि प्रतियोगिव्यधिकरणत्वाभावात् न चैवं समवाये
न गगनाभावस्य संयोगेन सत्ताभावाभिन्नतया समवायेन प्रतियोगिव्यधिकरणस्याभावस्याप्रसिद्ध्यसंभवात् कथमतिव्याप्तिरि
ति वाच्यं तथापि लक्षणस्यासंभवात् संयोगेन घटाद्यभावस्यापि घटत्वावच्छिन्नत्वविशिष्टप्रमेयताभावाभिन्नतया तत्प्रतियोगि
ताविशिष्टप्रमेयत्वस्य केवलान्वयितया न च प्रतियोगितावच्छेदकभेदेनैव प्रतियोगिताभिन्नत्वमिति द्रव्यत्वत्वावच्छिन्नप्रतियोगिता
विशिष्टसत्तात्वावच्छिन्नप्रतियोगितातो भिन्नैवेति वाच्यम् मानाभावात् प्रतीतिवैलक्षण्यस्यावच्छेदकभेदेनैवोपपत्तेः न चैवं स

मवायवदेकैवप्रतियोगितास्यालाघवादितिवाच्यम् दुष्टत्वात् वस्तुतस्तु प्रतियोगितावच्छेदकभेदेनप्रतियोगिताभेदेप्येतद्रू
पान्यत्वविशिष्टसत्तावाञ्जातेराकाशान्यत्वविशिष्टद्रव्यवान्द्रव्यत्वादित्यादौ समवायेन संयोगेन च साध्यतायाम् तिव्याप्तिः
एतद्रूपा समवेतरात द्रूपभिन्नयावत्समवेतस्याकाशासंयुक्तस्याकाशातिरिक्तयावद्द्रव्यसंयुक्तस्य चाप्रसिद्ध्या प्रतियोगिव्य
धिकरणतादृशाभावासंभवादतोहेतुसमानाधिकरणाभावेपि प्रतियोगितावच्छेदकावच्छिन्नासमानाधिकरणत्वं वाच्यमि
तिदिक् ननु महाकालोघटवान्कालपरिमाणादित्यत्राव्याप्तिः तादृशप्रतियोगितावच्छेदकीभूतगगनत्वस्यगगनत्ववि
शिष्टसंबंधप्रसिद्ध्यापारिभाषिकावच्छेदकत्वाभावात् नच संबंधसामान्येनस्वविशिष्टसंबंधित्वं वाच्यं तथाचतादात्म्येन
हत्वनियामकसंयोगेनवागगनत्वविशिष्टसंबंधीप्रसिद्ध एवेति वाच्यम् तादृशसंबंधिनि कालिकसंबंधेनगगनाभावस्य
सत्वात्प्रतियोगितावच्छेदकत्वेनगगनत्वस्यावच्छेदकत्वाभावात् नचतन्निष्ठाभावोपि संबंधसामान्येनेवाच्यः संबंधसा
मान्येनगगनसंबंधिनि चनतेन संबंधेनगगनाभाव इति वाच्यम् धूमसमानाधिकरणतादृशाभावप्रतियोगितावच्छेदकीभू
तद्व्यत्वत्वादेर्वन्हित्वविशिष्टसंबंधिनि संबंधसामान्येनयोभावस्तत्प्रतियोगितानवच्छेदकत्वाद्वन्हित्वादेरप्यवच्छेदकत्वा
यातात् नच तादात्म्येन संबंधित्वं प्रतियोगित्वं चवाच्यं विशिष्टसत्तात्वस्य सत्तात्वविशिष्टसंबंधिनिष्ठभेदप्रतियोगितानवच्छेद
कतयासत्तावाञ्जातेरित्यत्रसत्तात्वस्यावच्छेदकत्वापातात् यत्तु हेतुसमानाधिकरणतादृशाभावप्रतियोगितावच्छेदकोयेः राम०
संबंधस्तेनसंबंधेनस्वविशिष्टसंबंधित्वं प्रतियोगित्वं चवाच्यं भवतिहि कालपरिमाणसमानाधिकरणगगनभेदः कालि

कसंबंधेनप्रतियोगि [illegible] अधिकरणस्तत्प्रतियोगितावच्छेदकीभूततादात्म्यसंबंधेनघटगगनत्वविशिष्टसंबं
धितन्निष्ठोयोभेदस्तत्प्रतियोगितानवच्छेदकं गगनत्वमितिन च विशिष्टसत्तात्वावच्छिन्नप्रतियोगिताकभेदस्यापिगुणनिष्ठत
यातत्प्रतियोगितावच्छेदकतादात्म्यसंबंधेनसत्तात्वविशिष्टसंबंधिनिवर्त्तेतयोभेदस्तत्प्रतियोगितानवच्छेदकं विशिष्ट
सत्तात्वमितिसत्तावाञ्जातेरित्यत्राव्याप्तिरितिवाच्यम् विशिष्टसत्तात्वस्यगुरुतयाजातिसमानाधिकरणतादृशभेदप्रति
योगितायाःसत्तात्वेनैवावच्छेदात् नचवन्हिमान्धूमादित्यादौ साध्यतावच्छेदकसंबंधेनप्रतियोगिव्यधिकरणधूमसमानाधि
करणसमवायसंबंधावच्छिन्नाभावप्रतियोगितावच्छेदकंरूपत्वमुत्पत्तिकालेःचयविनिरूपसामान्याभावसत्वात्तत्प्रतियोगितावच्छेद
कीभूतसमवायसंबंधेनवन्हित्वविशिष्टसंबंधिनिष्ठोयःसमवायावच्छिन्नप्रतियोगिताकोभावस्तत्प्रतियोगितानवच्छेदकमित्यव्या
प्तेः नच स्वविशिष्टसंबंधिनिष्ठाभावप्रतियोगिव्यधिकरणत्वं साध्यतावच्छेदकसंबंधेनैववक्तव्यं नतु प्रतियोगितावच्छेदकसंबंधेन त
थाचवन्हित्वविशिष्टसंबंधिनिष्ठोयोरूपाभावः संयोगेनसाध्यतायांजलघटाणुकसंयोगसमानाधिकरणतादृशाभावप्रतियोगिता
वच्छेदकंरूपत्वं तत्प्रतियोगितावच्छेदकीभूतसमवायेनजलघटाणुकत्वविशिष्टसंबंधिनिजलपरमाणौसमवायावच्छिन्नप्रतियो
गिताकःसंयोगेनप्रतियोगिव्यधिकरणोयोघटाभावस्तत्प्रतियोगितानवच्छेदकमित्यव्याप्तेः जलपरमाणौरूपसामान्याभावस्याभावादि
ति अत्रकेचित् साध्यतावच्छेदकसंबंधसामान्येयद्विशिष्टप्रतियोगिकत्वतादृशप्रतियोगितावच्छेदकावच्छिन्नाभाववद्वृत्तुयोगि
कत्वोभयाभावस्तत्पारिभाषिकावच्छेदकंकालोघटवान्कालपरिमाणादित्यत्रतादृशाभावप्रतियोगितावच्छेदकत्वसत्तिःगग
योगिकत्वोभयाभावस्यसंयोगसामान्यसत्वेपिनवन्हित्वस्यावच्छेदकत्वमितिइदं त्वं बंधयम् हेतुसमानाधिकरणाभावस्य+

प्रतियोगिव्यधिकरणत्वनिरुक्तौ प्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिकत्वमपहाय यद्धर्मविशिष्टप्रतियोगिकत्वमात्रमुपादेयम् तथा
च साध्यतावच्छेदकसंबन्धसामान्ये यद्धर्मविशिष्टप्रतियोगिकत्वहेत्वधिकरणीभूतयत्किंचिदनुयोगिकत्वोभयाभावकूटवत्त्वं तद्धर्मभिन्न
यत्साध्यतावच्छेदकं तदवच्छिन्नसामानाधिकरण्यं व्याप्तिरित्येतावतैव प्रमेयधूमवान्वह्नेरित्यादावतिव्याप्तेः कालो घटवान्कालपरिमा
णादित्यादावव्याप्तेश्च वारणे तादृशोभयाभावघटितलक्षणानारणीयधूमसंयोगसामान्ये प्रमेयधूमत्वविशिष्टतन्त्रप्रतियोगिकत्व
वन्ह्यधिकरणायोगोलकानुयोगिकत्वोभयाभावकूटसत्त्वेनातिव्याप्तेरभावात् कूटपदं दाना च संयोगसामान्ये वन्हित्वविशिष्टमहा
नसीयवन्हिप्रतियोगिकत्वधूमाधिकरणीभूतपर्वतानुयोगिकत्वोभयाभावसत्त्वेपि वन्हित्वविशिष्टपर्वतीयवन्हिप्रतियोगिकत्व
पर्वतानुयोगिकत्वोभयवत्त्वात् पर्वतीयवन्हिसंयोगस्य तादृशोभयाभावासत्त्वान्न तादृशोभयाभावकूटवत्त्वमिति न वन्हिमान्धूमादित्यत्राव्या
प्तिरिति केचित्तु तादात्म्यसाध्यतावच्छेदकातिरिक्तसंबन्धेन यत्त्वविशिष्टसंबन्धिनिष्ठो यत्तदन्यतरसंबन्धेन प्रतियोगिव्यधिकरणोभावस्तत्प्र
तियोगितानवच्छेदकं तत्त्वमित्यर्थः गगनत्वविशिष्टतादृशसंबन्धिनि गगने वर्तते यः कालिकसंबन्धेन गगनाभावः सत्तादात्म्येन प्रतियो
गिसमानाधिकरणश्चेति न तन्मादाय गगनत्वस्यावच्छेदकत्वक्षतिः सत्तावान्जातेरित्यत्रान्यतरसंबन्धेन तादात्म्यसमवायान्यतरेण गुणक
र्मान्यत्वविशिष्टसत्तायां संबन्धिनि गुणे सत्तात्वविशिष्टसंबन्धिनि वर्तते यो भावस्तत्प्रतियोगितावच्छेदकं गुणकर्मान्यत्वविशिष्टसत्तात्व
मिति नाव्याप्तिरित्याहुः तत्र साध्यीयः आकाशं शब्दसमानाधिकरणवन्हिमच्छब्दादित्यत्र तत्त्वविषयकसंयोगेन साध्यतायामव्याप्तेः भ
वति हि शब्दसमानाधिकरणतादृशाभावप्रतियोगितावच्छेदकं गगनत्वं तत्त्वतादृशसंबन्धेन शब्दसमानाधिकरणवन्हित्वविशिष्टसंबन्धिनि
गगने वन्हेश्च वर्तते यस्तादृशसंबन्धेन प्रतियोगिव्यधिकरणोभावस्तत्प्रतियोगितानवच्छेदकमिति चन्द्रो साध्यतावच्छेदकीभूत तत्ता नियाम

त अन्यतुयेनयेनसंबन्धेन स्वविशिष्टसंबन्धि यद्यन्नतेन तेन संबन्धेन प्रतियोगिव्यधिकरणो यत्तन्निष्ठाभावस्तत्प्रतियोगितानवच्छेदकं तत्त्वमित्यर्थः न चेदं सर्वेषु सं
बन्धेष्वन्यतमत्वादिना समवायादिना साध्यतायां व्यभिचारिणि सत्त्वे तस्य पारिभाषिकावच्छेदकत्वं न स्यात् विषयितया कालिकतया वा सत्त्वविशिष्टसंबन्धिनि विषयि
तया कालिकेन प्रतियोगिव्यधिकरणाभावस्याप्रसिद्धेरिति वाच्यं विषयितासंबन्धेन निरुक्तप्रतियोगिकत्वस्वविशिष्टसंबन्ध्यनुयोगिकत्वोभयाभावस
त्तादुक्तरीत्याश्वज्ञानात्मत्वविशिष्टघटाभाववत्प्रतियोगिवैयधिकरण्यप्रसिद्धिसंभवात् साध्यतावच्छेदकसंबन्धेन संबन्धितं प्रतियोगित्वं च वा
च्यमित्येतेन चोक्तलक्षणाभिप्रायमाशो न तद्विरोध इत्याहुः नव्यास्तु वाकारो व्यवस्थितविकल्पार्थः तेन यत्र तादृशप्रतियोगितावच्छेदके सा
ध्यतावच्छेदकसंबन्धेन स्वविशिष्टसंबन्धिनिष्ठाभावत्वादिकमेवोपादेयं तेन कालो घटवान्कालपरिमाणादित्यादौ गगनत्वविशिष्टसंबन्धिनोऽप्रसि
द्धात्वदवच्छिन्नाभाववदित्यादिकमेवोपादेयं तत्र साध्यत्वादि प्रमेयो नुमतात्वावच्छिन्नाभाववति सामान्यादौ समवायेन संबन्धत्वस्याप्रसिद्ध्या स्ववि
शिष्टसंबन्धी यादिरूपमेवोपादेयमिति विस्कृतस्तिमारभ्य लक्षणाद्वयमेव व्यवस्थितवैकल्पिकमित्येकपक्षः अत एवामिलितैककल्पतामस्व

अत एव सत्तावान्जातेरित्यादौ जातिमन्निष्ठाभावप्रतियोगितावच्छेदकं गुणान्यत्वविशिष्टसत्तात्वं तुल्यवृत्तिकत्वेपि सत्तात्वस्य न स
नाथत्वेपेतदनतिरिक्तवृत्तित्वमित्युक्तं एवं च रूपरसाभावसमानाधिकरणरूपाभावान्नारसीयादिति प्राहुः प्रतियोगितावच्छेदकानतिरिक्तवृत्तित्वमि तिः
तत्रारुचिं प्रकाशयति अत एवेति तदवच्छिन्नाभाववदित्यादिविवक्षणादेवेत्यर्थः तुल्यवृत्तिकत्वेपि सत्त्वापि स्वरूपेण तेन हि त्वादिवद्विशिष्टधर्म
स्यापि विशेष्यविशेषणसंबन्धेषु पर्याप्त्यस्वीकारे नायं दोष इति सूचितं अत्रेदं चिन्त्यं हेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकं यद्विशिष्टसं
बन्धिनिष्ठाभावप्रतियोगितानवच्छेदकं तदवच्छिन्नसाध्यतावच्छेदकमित्युक्तौ विशिष्टस्यानतिरिक्तत्वपक्षे वन्हिमान्धूमादित्यादावव्याप्तिः महानसीयव
न्हित्वस्य पारिभाषिकावच्छेदकत्वे नेवान्हित्वं तच्छेदाभावात् न चावच्छेदकत्वं व्याप्यवृत्तिनिरवच्छिन्नमेव वन्हित्वपर्याप्तस्य तिवाच्यम् स्वरूपसंबन्ध
रूपावच्छेदकस्य भेदप्रतियोगितेन मतेः प्रवेशात् किंतु पारिभाषिकावच्छेदकभिन्नत्वेन तस्मात्तद्घटितं पक्षो साध्यतावच्छेदकमिति विवक्षणे मतदघ
टितत्वं च तद्विषयकप्रतीतिविषयत्वं भवति च वन्हित्वं महानसीयवन्हित्वविषयकप्रतीतिविषयः तादृशपारिभाषिकावच्छेदकतायनरूपेण तन्नरूपेणान्त

तदंकुरत्वेन तदघटितत्वेन तदविषयकप्रतीतिविषयत्वरूपेणास्तीति संभाव्यते तदा प्रकारतासंबंधेन यद्धर्मावच्छिन्नकार्यतातो भिन्नाय द्धर्मावच्छिन्न कार्यता भवतीति वाच्यम् भवति चैतदंकुरत्वप्रकारकत्वावच्छिन्नकार्यतातस्तदंकुरत्वप्रकारकत्वावच्छिन्नकार्यताभिन्ना विशेषणतानस्योवि शेषणतावच्छेदकप्रकारकनिश्चयस्य वा कार्यतायां प्रमेयधूमत्वादिरूपकार्यतावच्छेदकत्वं प्रसिद्धमिति मंतव्यम् ननु प्रतियोगितावधर्मिको भया भावविवक्षायां यद्धर्मान्विन्नहतिधर्मावच्छिन्नेनो क्रोसत्तावान्जातेरित्यत्र सत्तात्वान्न्यून वृत्तिगुणान्यत्वविशिष्टसत्तात्वाघवच्छेद्यत्वस्य समवा यसंबंधावच्छिन्नत्वस्य च जातिसमानाधिकरणाभावप्रतियोगितायां सत्वादव्याप्तिरत आह एवमिति स्वविशिष्टेति। स्वं साध्यतावच्छेद केनाभिमतं इत्थं च तादृशप्रतियोगितासामान्ये यद्विशिष्टसंबंधिनिष्ठाभावप्रतियोगितानवच्छेदकावच्छेद्यत्वयत्संबंधावच्छिन्नत्वोभयाभाव स्तेन धर्मेण तेन संबंधेन व्यापकत्वमिति बोध्यं गुणान्यत्वविशिष्टसत्तावान्जातेरित्यादौ गुणान्यत्वविशिष्टसत्तात्वाश्रयं संबंधिनिष्ठाभाव प्रतियोगितानवच्छेदकं सत्तात्वादिकमेव जातिसमानाधिकरणाभावप्रतियोगितासामान्ये तदवच्छेद्यत्वस्याभावादिति व्याप्तिरतः स्वविशि

एवं स्वविशिष्टसंबंधिनिष्ठाभावप्रतियोगितानवच्छेदकावच्छेद्यत्वं बोध्यम् ॥ ॥

ष्टेति स्वविशिष्टत्वं च साध्यतावच्छेदकताघटकसंबंधेन बोध्यम् तेन धूमवान्वन्हेरित्यत्र कालिकेन घटादेरपि धूमत्वविशिष्टत्वाद्धूमत्वविशिष्टस्य संयोगेन यत्संबंधितन्निष्ठाभावप्रतियोगितानवच्छेदकं द्रव्यत्वादि तदवच्छेद्यत्वाभावस्य वन्हिमन्निष्ठाभावप्रतियोगितावत्तेन याभावस्य संयोगावच्छि न्नत्वप्रतियोगितानवच्छेदकाप्रसिद्ध्या कथमिति व्याप्तिरिति वाच्यम् घटाभावत्वादेरेव तथात्वात् घटाभावस्य संयोगावच्छिन्नप्रतियोगितायाः लाघवाद्भावत्वेनैवावच्छेदात् न चैवमपि तदवच्छेद्यत्वप्रसिद्ध्या कथमतिव्याप्तिः घटाभावस्य भेदप्रतियोगितायां घटाभावत्वावच्छिन्नत्व स्य प्रसिद्धिसंभवात् अत एव वन्हिमान्धूमादित्यादावव्याप्तिर्न भवति तादृशघटाभावत्वावच्छिन्नत्वाभावेनैव लक्षणसमन्वयात् प्रतियोगिव्य धिकरणपदमप्येतदर्थमेवाभावेदेयम् अन्यथा संयोगावच्छिन्नप्रतियोगितावच्छेदकमात्रस्यैव धूमत्वविशिष्टसंबंधिनिष्ठाभावप्रतियोगितावच्छे

दित्यादौ समवायेन घटत्वस्य साध्यतायां घटत्वविशिष्टसंबंधिनिष्ठे समवायावच्छिन्नज्ञानाभावस्याविषयतया प्रतियोगिसमानाधिकरणत्वा त् संबंधसामान्येन प्रतियोगिव्यधिकरणेति तत्तद्व्यक्तित्वावच्छिन्नाभाव एव तत्प्रतियोगितानवच्छेदकज्ञानत्वावच्छेद्यत्वसमवायावच्छिन्न त्वोभयस्य घटरूपवन्हिनिष्ठाभावप्रतियोगितायां सत्वेन वन्हिमान्धूमादित्यादौ संयोगेन साध्यतायां वन्हित्वविशिष्टसंबंधिनिष्ठघटाद्य भावः कालिकेन प्रतियोगिसमानाधिकरणाद्येतिप्रतियोगिव्यधिकरणतादृशाभावप्रतियोगितानवच्छेदकं घटत्वं तदवच्छेद्यत्वसं योगावच्छिन्नत्वोभयस्य धूमवन्निष्ठाभावप्रतियोगितायां च सत्वेन सत्तावान्जातेरित्यत्र च सत्तात्वविशिष्टसंबंधिनिष्ठप्रतियोगि व्यधिकरणाभावप्रतियोगितानवच्छेदकं विशिष्टसत्तात्वं तदवच्छेद्यत्वसमवायावच्छिन्नत्वोभयस्य जातिसमानाधिकरणाभाव प्रतियोगितायां सत्वेपि चनासंभवो ऽव्याप्तिर्वा वृत्तिनियामकसंबंधस्याभावप्रतियोगितावच्छेदकत्वे सर्वस्यैव धर्मस्य वन्हित्वादिविशि ष्टसंबंधिनिष्ठप्रतियोगिव्यधिकरणाभावप्रतियोगितावच्छेदकत्वात् तदनव च्छेदकावच्छेद्यत्वाप्रसिद्ध्या ऽसंभवः मेयत्वादेरपि पर्व तादेविषयिता संबंधावच्छिन्नप्रतियोगिताकाभावप्रतियोगितावच्छेदकत्वात् यदि च द्रव्यत्वाघवन्हिमदन्यतरत्वं वन्हिमन्नि ष्ठतादृशाभावप्रतियोगितानवच्छेदकं वन्हिप्रति संयोगेन समवायेन तदन्यतराभावसत्वेपि तत्प्रतियोगितायां वन्हिमत्वेनैवा वच्छेदात् विषयतादिरूपव्यधिकरणसंबंधावच्छिन्नतदभावप्रतियोगितायां अपि वन्हिमत्वद्रव्यत्वाभावत्वादिनैवावच्छेदात् तदवच्छेद्यत्वं च भेदप्रतियोगितायां प्रसिद्धमिति विभाव्यते तदा ऽसंभवविरहे पि धूमवान्वन्हेरित्यादावतिव्याप्तिरुक्तरीत्या द्रव्य त्वाघभाववन्मवदन्यतरत्वस्यैव धूमवन्निष्ठाभावप्रतियोगितानवच्छेदकत्वेन तदवच्छेद्यत्वसंयोगावच्छिन्नत्वोभयाभावस्य

वन्हिमन्निष्ठाभावप्रतियोगितासामान्येसत्वादतः प्रतियोगित्वंसाध्यतावच्छेदकसंबंधेनवाच्यमन्यथंचधूमत्वविशिष्टसंबंधिनिष्ठ
तादृशाभावीयसंयोगावच्छिन्नप्रतियोगितायाः अनवच्छेदकंधूमत्वायोगोलकादावित्यादितदवत्वस्यतादृशप्रतियोगितायासत्वा
द्वनातिव्याप्तिरिति ननुतथाप्यव्याप्तिःकालोजगदाधारःकालपरिमाणादीश्वरज्ञानंसर्वंवन्हित्यसविषयत्वादितत्रकालिक
विषयितासंबंधाभ्यांसाध्यतायांजगदाधारत्वतत्सर्वत्वविशिष्टसंबंधिनिमहाकालेईश्वरज्ञानादौचतेनसंबंधेनप्रतियोगिव्यधि
करणस्याभावस्याप्रसिद्धेः नचमहाकालान्यत्वविशिष्टघटाभावस्यश्वरज्ञानान्यत्वविशिष्टघटाभावस्यतथात्वान्नाव्याप्ति
रितिवाच्यम् तथापिमहाकालमात्रवृत्तिविशेषणतयेश्वरज्ञानमात्रवृत्तिविषयिताविशेषेणचसाध्यतायामव्याप्तेरपरिहारात्
तेनसंबंधेनमहाकालान्यत्वविशिष्टघटाद्यधिकरणस्याप्यप्रसिद्धेरितिचेन्नस्वविशिष्टसंबंधिनिष्ठाभावप्रतियोगितायां
तद्धर्मावच्छिन्नत्वतत्संबं
धावच्छिन्नत्वोभयाभावोहेतुसमानाधिकरणाभावप्रतियोगितासामान्ये तद्धर्मावच्छिन्नत्वतत्संबं
धावच्छिन्नत्वोभयाभावस्यविवक्षितत्वात् भवतिहिसर्वत्वविशिष्टसंबंधिमहाकालनिष्ठसमवायाद्यवच्छिन्नप्रतियोगिता
कघटाभावादिप्रतियोगितायांसर्वत्वाद्यवच्छेद्यत्वकालिकसंबंधावच्छिन्नत्वोभयाभावः कालपरिमाणसमानाधिकरण
तादृशाभावप्रतियोगितायामपितदुभयाभावइतिनाव्याप्तिः धूमत्वविशिष्टसंबंधिनिष्ठतादृशाभावप्रतियोगितायांधूमत्वा
वच्छेद्यत्वसंयोगावच्छिन्नत्वोभयाभावसत्वेपिवन्हिसमानाधिकरणाभावप्रतियोगितायांतदुभयसत्वान्नधूमवान्वन्हेरित्या एम·
दावतिव्याप्तिरितिकृतंपल्लवितेन॥

ननुप्रमेयधूमवान्वन्हेरित्यत्रप्रमेयधूमत्वेगुरुधर्मत्वविशिष्टत्वादिपारिभाषिकावच्छेदकलक्षणमव्याप्तस्वविशिष्टसंबंधिनिष्ठाभाव
प्रतियोगितानवच्छेदकत्वंचतादृशप्रतियोगितावच्छेदकप्रतियोगिकभेदस्यात्रिप्रसंजकतयातादृशप्रतियोगितावच्छेदकत्वा
वच्छिन्नप्रतियोगिताकभेदस्यविवक्षणीयत्वप्रमेयधूमत्वविशिष्टसंबंधिनिष्ठाभावप्रतियोगितावच्छेदकत्वस्यधूमत्वविशिष्ट
संबंधिनिष्ठाभावप्रतियोगितावच्छेदकत्वलघुरूपसमनियतस्यागुरुतयाऽनवच्छेदकत्वात्सर्वप्रमेयवन्हिमान्धूमादित्यत्रप्र
तियोगिताधर्मिकोभयाभावघटितलक्षणमव्याप्तंप्रमेयवन्हित्वविशिष्टसंबंधिनिष्ठाभावप्रतियोगितावच्छेदकत्वस्यगुरुत्व
याऽभावप्रतियोगितानवच्छेदकत्वेनतादृशप्रतियोगितानवच्छेदकावच्छेद्यत्वस्याप्रसिद्धेरतआह तादृशेतितथाचप्रमेय
वन्हित्वविशिष्टसंबंधिनिष्ठाभावीयपर्याप्तप्रतियोगितातदवच्छेदकभेदकूटवत्त्वेतादृशानवच्छेदकंप्रसिद्धमितिनाव्याप्तिः
तादृशप्रतियोगितास्वविशिष्टव्यापारेपानातागुरोरवच्छेदकत्वंविनाडुर्वचत्वमप्रतियोगित्वंसंबंधित्वंचसाध्यतावच्छेद
कसंबंधेनबोध्यमतोनसंबंधभेदमादायदोषः॥ ॥ ॥

एवंपारिभाषिकावच्छेदकलक्षणमपिप्रमेयधूमत्वादौज्ञेयमूनचतादृश्यावच्छेदकमेवविशिष्यकुसुचितमितिवाच्यमस्य
प्रतियोगितायाअपिनानावच्छेदकानांविशिष्यापादानेगौरवात्तत्प्रतियोगितावच्छेदकत्वेनापादानेचलाघवादितिप्रतियोगित्व
मिति प्रतियोगिताधर्मिकोभयाभावविवक्षायांस्वविशिष्टसंबंधिनिष्ठाभावप्रतियोगित्वंसाध्यतावच्छेदकसंबंधेनवाच्यम् ननुपूर्वत्र
तत्रसाध्यतावच्छेदकसंबंधेनप्रतियोगिव्यधिकरणत्वेनवसंबंधभेदमादायदोषाभावात्तथ्याहतिस्फुटत्वाद्व्याख्यानावसरएवप्रपंचितोति
नेहप्रयत्नयतेएवमुत्तरत्रापि संबंधित्वम् स्वविशिष्टसंबंधित्वं।संबंधित्वापेक्षयाप्रतियोगित्वस्यचरमोक्तत्वेपिप्रतियोगित्वस्या

[illegible]

नन्तु कालो घटवान्कालपरिमाणादित्यत्र कालिकसंबंधेन घटत्वविशिष्टसंबंधि विषयप्रतियोगिव्यधिकरणाभावीयकालिकसंबंधावच्छि
न्नप्रतियोगितावच्छेदकाप्रसिद्ध्यातदनवच्छेदकावच्छेद्यत्वमप्रसिद्धमत आह कालिकेति अनित्येति अतीतनष्टद्व्यक्तित्वावच्छिन्ना
नधिकरणं स्वविशिष्टसंबंधि वर्तमानक्रियात्मकं तदुकालोपाधिरेवतन्निष्ठताहशाभावप्रतियोगितावच्छेदकं तन्नष्टद्व्यक्तित्वमे
तिनाप्रसिद्धिः कालोऽजगदाधारः कालपरिमाणादित्यत्र तु पूर्वोक्तदिशा लक्षणं संगमनीयम् अभावश्चेति अत्र प्रतियोगितावच्छेद
कावच्छिन्नस्य यस्य कस्यचित्तत्सामान्यस्य वा प्रतियोगितावच्छेदकयत्किंचिदवच्छिन्नस्य वाऽनधिकरणं नवाच्यम् अपि धूमवान्वह्ने
रित्यादावतिव्याप्तिः धूमवतोऽपि पर्वतादेर्यत्किंचिद्धूमव्यक्त्यनधिकरणत्वेन तद्वृत्तिधूमाभावस्य प्रतियोगिव्यधिकरणत्वात्तादृशप्र
तियोगिव्यधिकरणाभावप्रतियोगितानवच्छेदकघटाभावत्वावच्छेद्यत्वघटितोभयाभावस्य तादृशप्रतियोगितायां सत्त्वात् द्विती

कालिकविशेषणताविशेषेण साध्यतायां तादृशप्रतियोगितावच्छेदकत्वमनित्यत्वनष्टव्यक्तित्वप्रसिद्धम् अभावस्यात्र प्रति

येद्रव्यत्वाभाववान्गुणत्वादित्यादावव्याप्तिः गुणत्वनिष्ठाभावप्रतियोगितायां गुण॥ योगिव्यधिकरणो बोध्यः ॥ ॥
त्वाभाववत्त्वावच्छिन्नाभावप्रतियोगितावच्छेदकावच्छिन्नसामान्यानधिकरणद्रव्यत्वाभावसंबंधिनिष्ठगमनाभावप्रतियोगितानवच्छेदक
गुणत्वाभावत्वावच्छेद्यत्वतादृशसंबंधावच्छिन्नत्वोभयसत्त्वात्तद्गुणत्वाभावाभाववतोऽपि गुणस्यानित्यत्वादिविशिष्टगुणत्वाभावाभावात्म
कस्य गुणत्वानतिरेकात् तृतीये धूमवान्वह्नेरित्यत्रातिव्याप्तिः धूमत्वविशिष्टसंबंधिनां धूमाभावाभाववतोऽपि गुणस्यानित्यत्व दिविशिष्टगुण
त्वाभावाभावात्मकस्य गुणत्वानतिरेकात् तृतीये धूमवान्वह्नेरित्यत्रातिव्याप्तिः धूमत्वविशिष्टसंबंधिनो धूमाभाववत्पर्वतादेरपि धूमाभाव
पर्वतभिन्नत्वमकारकप्रमाविशेष्यत्वाभावान्यतरत्वावच्छिन्नप्रतियोगिताकाभावेतद्रूपयत्किंचित्प्रतियोगितावच्छेदकावच्छिन्नसामान्यानधि
करणत्वात्तादृशाभावप्रतियोगितानवच्छेदकघटाभावत्वादिकमेवतदवच्छेद्यत्वसंयोगावच्छिन्नत्वोभयाभावसंबंधि समानाधिकरण

मौलमस्तूलोपात्तं इदमीयं अवच्छेदकलक्षणप्रविष्टं नतु मौलिप्रतियोगिवैयधिकरण्यानुपादानेऽप्यदं संयोगिद्रव्यत्वादित्यादावव्याप्तिरत आ
ह संयोगत्वेति संयोगत्वस्य द्रव्यत्वसमानाधिकरणाभावप्रतियोगितावच्छेदकत्वेऽपि तदवच्छिन्नाभाववति संयोगत्वविशिष्टस्य संबद्धत्वा
त्संयोगत्वस्य न पारिभाषिकावच्छेदकत्वं तादृशं चावच्छेदकं गगनत्वादिकमेव तेन तद्भिन्नत्वस्य संयोगत्वे सत्त्वान्नाव्याप्तिरित्यर्थः इद
मीयप्रतियोगिवैयधिकरण्यानुपादानेऽपि संयोगी सत्त्वादित्यत्रातिव्याप्तिनिरस्ता निर्गुणादीति संयोगत्वावच्छिन्नाभाववति संयोग

नचमौलमिदमीयं च प्रतियोगिवैयधिकरण्यमनुपादेयम् संयोगत्वाद्यवच्छिन्नाभाववति संयोगत्ववि
शिष्टस्य तन्त्रगुणादिनिष्ठाभावप्रतियोगितावच्छेदकद्रव्यत्वे द्रव्यमात्रसमवेतत्वाद्यवच्छिन्नाभाववति
चाद्वर्त्तेरव्याप्त्यतिव्याप्त्योरनवकाशादिति वाच्यम् ॥ ॥ ॥

त्वविशिष्टस्य संबद्धत्वेऽपि गुणादिनिष्ठाभावप्रतियोगितावच्छेदकीभूतद्रव्यत्वत्वावच्छिन्नाभाववत्संबद्धत्वात्संयोगत्वस्य पारिभाषि
कावच्छेदकत्वेन तद्भिन्नत्वाभावान्नातिव्याप्तिरित्यर्थः सकलद्रव्यवृत्तित्वघटितं द्रव्यत्वत्वं नावच्छेदकमतो द्रव्यमात्रेति द्रव्या
न्यासमवेतत्वावच्छिन्नेत्यर्थः संयोगप्रतियोगिकाभावमादायाप्यतिव्याप्तिं कल्पयति द्रव्यमात्रेतीत्यपि कश्चित् ॥ ॥

अवच्छेदकत्वस्योक्तत्वात्तदंशे दोषमपि तु प्राह धूमवान्वह्नेरिति अत्रातिव्याप्तिवारणाय तादात्म्येन मूलेऽप्यव्याप्तिवारणाय तत्पदं दत्तमिति भावः तदेवदर्शयति नहीति धूमवान्वह्नेरित्यत्र वह्निसमानाधिकरणाभावीयसंयोगसंबंधावच्छिन्नप्रतियोगितावच्छेदकं प्रथमद्रव्यत्वं कालावच्छेदेन तत्रत्वावच्छिन्नाभाववति धूमत्वविशिष्टस्य सत्त्वाद्धूमत्वे पारिभाषिकावच्छेदकत्वमनुपपन्नमिति तादृशावच्छेदकं गगनत्वा

धूमवान्वह्नेरित्यादावतिव्याप्तेः नह्युत्पत्तिकालावच्छेदेन महानसादौ किंचित्संयो
गोऽस्ति [illegible] गेन वर्तते येन वह्निमदयोगो
लकनिष्ठात्यंताभावप्रतियोगितावच्छेदकायोगोलकावृत्तिद्रव्यत्वाद्यवच्छिन्नाभाव
वद्वृत्तित्वं धूमत्वविशिष्टस्य संभाव्येत॥

दिकमेवेति तदवच्छिन्नत्वस्य धूमत्वे सत्त्वादतिव्याप्तिरित्यर्थः येनेत्यादि यदि पटे किंचित्संयोगेनोत्पत्तिकालेऽपि वर्तेत तदायोगोलकावृत्तिद्रव्यत्वावच्छिन्नाभाववदयोगोलकाद्यवस्यात्र धूमवद्येन तत्र धूमत्वविशिष्टस्यासंबद्धत्वाद्धूमत्वस्य पारिभाषिकावच्छेदकत्वं स्यादिति भावः अयोगोलकावृत्तिद्रव्यत्वेत्यत्र द्रव्यत्वपदं संयोगसंबंधेनायोगोल ७

[illegible]
कावृत्तित्वस्यावच्छेदकस्य संयोगावच्छिन्नायाश्च प्रतियोगिताया लाभाय तदवच्छिन्नाभाववदित्यादि विवक्षायां प्रतियोगिताधर्मिको
भयाभावविवक्षायां चातिव्याप्तिः प्रथमे गगनत्वरूपतादृशावच्छेदकस्याप्रसिद्धत्वात्तद्देशस्य धूमत्वे सत्त्वात् तीये धूमत्वविशिष्टसं
बंधिनिष्ठाभावस्य संयोगावच्छिन्नप्रतियोगितानवच्छेदकं घटाभावत्वं संयोगावच्छिन्नप्रतियोगिताया लाघवेनाभावत्वेनैवावच्छेद
ततरवच्छेद्यत्वस्य भेदप्रतियोगितायां प्रसिद्धस्य संयोगावच्छेद्यत्वेतरवच्छेद्यत्वोभयाभावस्य हेतुसमानाधिकरणतादृशाभावप्रति
योगितासामान्ये सत्त्वादतिव्याप्तिः मध्यमविवक्षायां तु नातिव्याप्तिर्गगनत्वविशिष्टसंबंध्यप्रसिद्ध्या गगनत्वस्य पारिभाषिकावच्छेद
कत्वासंभवात् किंतु संयोगेन साध्यतायामव्याप्तिस्तादृशावच्छेदकाप्रसिद्धेरिति नच प्रथमविवक्षायां कथमतिव्याप्तिः हेतुसमाना
धिकरणस्यायोगोलकभेदाभावस्य प्रतियोगितावच्छेदकं पदयोगोलकभेदत्वं तदवच्छिन्नाभाववत्ययोगोलके धूमत्वविशिष्टस्यासंबद्ध
त्वेन धूमत्वस्य पारिभाषिकावच्छेदकत्वादिति वाच्यम् प्रतियोगिवैयधिकरण्यानुपादानेनातादात्म्येन साध्यतायां धर्ममात्रस्यैव तदवच्छिन्नाभाव
वत्त्वे वद्धत्वविशिष्टसामान्यकत्वेन तादृशावच्छेदकाप्रसिद्ध्याः व्याप्तिभवेन प्रतियोगितायां साध्यतावच्छेदकसंबंधावच्छिन्नत्वस्य वि
वक्षणीयत्वात् संयोगावच्छिन्नप्रतियोगितायां लाघवेन भेदत्वस्यैवावच्छेदकत्वेनायोगोलकभेदत्वस्य प्रतियोगितानवच्छेदकत्वेना
तिव्याप्तेः सत्त्वादिति वस्तुतस्तु अयोगोलकभेदस्य कालिकसंबंधावच्छिन्नप्रतियोगिताकोऽभावः कालेऽयोगोलकावच्छेदेन वर्त
तइत्यविवादं जन्यमात्रस्यैव कालोपाधित्वाच्च पर्वताद्यपि तादृशाभाववदेव तत्र च धूमत्वविशिष्टस्यसंबद्धत्वात्साध्यतावच्छेदकसंबं
धावच्छिन्नप्रतियोगिताविवक्षणे व्यतिव्याप्तिर्दुर्वारैवेति तथा चातिव्याप्तिवारणाय पदमीप प्रतियोगिवैयधिकरण्योपादानेऽपि सं

प्रतियोगितयोरिति हेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकलक्षणानि विष्ठाभावप्रतियोगितयोरित्यर्थः तथाचहेतुसमानाधिकर
णाभावीयपद्यत्संबंधावच्छिन्नप्रतियोगितावच्छेदकं पद्यन्तत्संबंधावच्छिन्नतद्वच्छिन्नप्रतियोगिताकाभाववत्तदसंबद्धत्वविशिष्टसा
मान्यकं पद्यन्तत्पारिभाषिकावच्छेदकमिति एवमन्यत्रलक्षणेपियोज्ञेयम् धूमवान्वह्नेरित्यादौ हेतुसमानाधिकरणाभावीयस्वरूपसं
बंधावच्छिन्नप्रतियोगितावच्छेदकमयोगोलकभेदत्वं तत्स्वच्छिन्नतत्संबंधावच्छिन्नप्रतियोगिताकाभाववत्त्वयोगोलके धूमत्वविशिष्टस्या
संबद्धत्वान्नावच्छेदकत्वक्षतिः यत्वनत्वयोरननुगमाद्विशिष्यतत्तत्संबंधानां निवेशविशेषणताविशेषस्यापि निवेशात्तेन्निवेशावश्य

प्रतियोगितयोरेकसंबंधावच्छिन्नत्वस्य विशेषणताविशेषावच्छिन्नत्वस्य वाविवक्षणे पुनरनुपादेयमेव प्रतियोगिवैयधि
करण्यद्वयम् पक्षाधिकरणे व्यभिचारस्तत्रन्यत्वत्वतदन्यत्वप्रकारकप्रमाविषयत्वत्तमाध्यवत्त्वप्रकारकप्रमाविषयत्व
त्वादीनां साध्यतावच्छेदकविशिष्टसाध्यवन्निष्ठात्यंताभावप्रतियोगितानवच्छेदकत्वात् तुतावच्छेदकविशिष्टहेतुमन्नि
सर्वसामंजस्ये संबंधांतरप्रवेशो व्यर्थ इत्याशयेनाह विशेष ॥ ष्ठात्यंताभावप्रतियोगितावच्छेदकत्वाच्चातिव्याप्तेरनवकाशात्
णताविशेषेति जातिमान्भाववत्त्वादित्यत्र भाववत्समानाधिकरणाभावीयविशेषणताविशेषावच्छिन्नप्रतियोगितावच्छेदकं जातिम
त्वप्रकारकप्रमाविशेष्यत्वं तत्तद्वच्छिन्नाभाववतिसमवायिनासंबद्धत्वस्याप्रसिद्ध्या जातित्वस्य पारिभाषिकावच्छेदकत्वक्षतिरतोऽध्यमप्रकारमु
वलंब्यप्रतियोगिवैयधिकरण्यानुपादानेपि व्यभिचारिण्यतिव्याप्तिनिराकरणप्रकारं दर्शयति यत्रेत्यादिना घटत्वचान्यतदभिन्नान्यतमत्वादिसत्त्वे
घटभिन्नात्मकव्यभिचारनिरूपकाधिकरणान्यत्वादेः साध्यवन्निष्ठस्य घटत्वात्मकस्याभावीयविशेषणतानामसंबंधेनतत्तोज्ञानविषयतानिरूपित
विशेषणताविशेषमवलंब्यातिव्याप्तिवारणमाह तदन्यत्वप्रकारकेति लाघवमभिप्रेत्याह साध्यवत्त्वेति॥

यद्धर्मविशिष्टसंबंधिनिष्ठाभावीयविशेषणताविशेषावच्छिन्नप्रतियोगितानवच्छेदकं हेतुसमानाधिकरणाभावीयविशेषणताविशेषावच्छि
न्नप्रतियोगितावच्छेदकं तदन्यधर्मवत्त्वं व्यापकत्वमित्येवं मध्यमप्रकारपर्यवसितेर्थे कालोघटवान्कालपरिमाणादित्यादावव्याप्तिः तादृशपारि
भाषिकावच्छेदकाप्रसिद्धेः महाकालान्यत्वविशिष्टघटत्वादीनां प्रागुक्तयुक्त्या तादृशत्वासंभवात् एवं समवायेन गगनादेरपि धूमव्यापकता
पत्तिः समवायेन गगनत्वविशिष्टसंबंध्यप्रसिद्ध्या गगनत्वादेरपि तादृशपारिभाषिकावच्छेदकत्वाभावात् अतः प्रतियोगिताधर्मिकाम
प्याभाववैलक्षण्यमेवतत्तीयप्रकारे साध्यतावच्छेदकसंबंधावच्छेद्यत्वांशपरित्यागेन परिष्कुरुते तथा चेति विशेषणताविशेषस्येत्यस्य

तथा च विशेषणताविशेषावच्छिन्नयद्धर्मविशिष्टसंबंधिनिष्ठाभावप्रतियोगितानवच्छेदकावच्छेद्यत्वं तत्संबंधावच्छिन्न
साध्यसमानाधिकरणात्यंताभावप्रतियोगितासामान्ये नास्ति साधनं तद्धर्मविशिष्टसामानाधिकरण्यं व्याप्तिरितिप

णघटकत्वइत्यर्थः यद्धर्मः साध्यतावच्छेदकरूपधर्मः तत्संबंधावच्छिन्नेति विशेषणताविशेषावच्छिन्नेत्यर्थः ॥ एवमितीर्थः
धूमवान्वह्नेरित्यादौ उक्तत्वप्रकारकप्रमाविषयत्वाभावप्रतियोगितायां धूमत्वविशिष्टसंबंधिनिष्ठाभावप्रतियोगितानवच्छेदकीभू
तधूमवत्त्वप्रकारकप्रमाविषयत्वत्वावच्छेद्यत्वाभावादतिव्याप्तिरतः सामान्यइति इत्थं च धूमवत्त्वप्रकारकप्रमाविषयत्वाभावप्र
तियोगितायां तदवच्छेद्यत्वस्याभावाभावादेवनातिव्याप्तिः कालोघटवान्कालपरिमाणादित्यादौ तु कालान्यत्वप्रकारकप्रमावि
शेष्यत्वाभावप्रतियोगितायां तादृशीप्रसिद्धेति नाव्याप्तिरिति अत्रयद्यपि साधनसमानाधिकरणाभावप्रतियोगितासामान्ये यद्धर्मवि
शिष्टसंबंधिनिष्ठाभावप्रतियोगितावच्छेदकावच्छेद्यत्वमित्यतएव

सामंजस्येन त्र्यवयवगर्भतायां गौरवं तथापि मूलेन तत्पादानां तद्दूषितमेव लक्षणमुक्तं पयासन्निवेशेन वैयर्थ्यमपरे तु नञ्द्वयगर्भतायां
व्यभिचारिणि व्याप्तिः वह्निसमानाधिकरणधूमवत्त्वप्रकारकप्रमाविषयताभावप्रतियोगितायां ताद्रूप्यविषयतात्मकप्रतियोगिरू
पायां धूमत्वविशिष्टसंबंधिनिष्ठाभावप्रतियोगितावच्छेदकीभूतं यन्महानसवृत्तित्वविशिष्टताद्रूप्यप्रमाविषयत्वं तदवच्छेद्यत्वस्य
सत्वान्महानसवृत्तित्वविशिष्टताद्रूप्यप्रमाविषयताभावप्रतियोगितारूपस्य महानसवृत्तित्वविशिष्टस्यापि ताद्रूप्यप्रमाविषयत्वान
तिरेकात् ताद्रूप्यप्रतियोगितानवच्छेदकावच्छेद्यताभावाभिधाने तु नायं दोषः ताद्रूप्यप्रमाविषयत्वरूपताद्रूप्यप्रतियोगितानव
च्छेदकावच्छिन्नत्वेन तदभावासंभवादिति न चैवं वह्निमान्धूमादित्यादावव्याप्तिर्वह्नित्वविशिष्टसंबंधिनिष्ठाभावप्रतियोगितानवच्छेद
कपर्वह्निमत्त्वप्रकारकप्रमाविषयत्वे धूमसमानाधिकरणमहानसवृत्तित्वविशिष्टताद्रूप्यप्रमाविषयताभावीयप्रतियोगितायां

यत्र सद्धेतुविशेषे साध्यतावच्छेदकं न प्रतियोगितावच्छेदकं तत्रैवं रीति रूपादेयत्वमपि वदन्ति॥ ॥

विशिष्टताद्रूप्यप्रमाविषयत्वरूपायां तदवच्छेद्यत्वसत्वेन तदभावासंभवादिति वाच्यं विशेषिताताद्रूप्यप्रमाविषयत्वस्यावच्छेद्यत्वसंभवेपि
विशेषणे तदभावेन विशिष्टतदवच्छेद्यताभावादित्याहुः॥ ॥पत्रसद्धेतुविशेषइति प्रमेयवह्निमान्धूमादित्यादाविसर्थः तत्रैवेति वह्निमान्धू
मादित्यादौ प्रतियोगितावच्छेदकसंबंधेन प्रतियोगिव्यधिकरणस्य हेतुसमानाधिकरणाभावस्य प्रतियोगितायां पद्धर्मावच्छिन्नत्वप
र्यन्तं वावच्छिन्नत्वोभयाभावइत्येतावदेव सम्यगिति भावः तेन कालो घटवान्कालपरिमाणादित्यादौ साध्यतावच्छेदकसंबंधेन प्रतियोगि
व्यधिकरणप्रसिद्ध्या नाव्याप्तिः पत्रासद्धेतुविशेषइति पाठः प्रामादिकः असद्धेतौ व्याप्त्यभावेन तत्र लक्षणस्याप्रसक्तत्वादिति भा
वः वदंतीत्यस्वरसस्तद्बीजं तु अव्याप्यवृत्तिसाध्यके प्रतियोगिव्यधिकरणत्वघटितलक्षणायक्षया निरुक्तलक्षणमेव लघु तथा

॥ दीधितिः

गौरवेसतिपाद्रूप्यावच्छेदकत्वविरहस्ताद्रूप्यावच्छेदकत्वस्य संसर्गतयापि भानेगौरवत्वात्तानं विरोधिप्रकृते च गौरवत्वान्नैसत्यपिकंबुग्रीवादिमान्ना
स्तीति कंबुग्रीवादिमत्त्वस्यावच्छेदकत्वोल्लेखिप्रत्ययसत्वाद्गौरवत्वात्तन्नैताद्रूप्यावच्छेदकत्वग्रहविरोधीत्यभिप्रेत्याह गौरवेतिन्नैसत्सः कंबुग्रीवा
दिमान्नास्तीतिप्रतीतेः तथाविधेति कंबुग्रीवादिमद्घटकिंचिद्व्यक्तिसत्वइत्यर्थः अत एवेति यत एव कंबुग्रीवादिमान्नास्तीति प्रतीतेर्यत्किंचि
त्कंबुग्रीवादिमत्प्रतियोगिताकाभावमात्रं न विषयः किंतु कंबुग्रीवादिमत्वावच्छिन्नप्रतियोगिताकाभाव एवात एवेत्यर्थः अन्यथैकघ
टवत्यपि यत्किंचित्कंबुग्रीवादिमद्व्यक्तेरभावसत्तात्तत्रापि प्रमाणं स्यादिति भावः ननु गुरुतया न च्छेदकस्य कंबुग्रीवादिमत्वस्याव

गौरवप्रतिसंधानदशायामपि कंबुग्रीवादिमान्नास्तीति प्रतीतेर्गुरुरूपस्य धर्मावच्छेदकः प्रतियोगितायाः न चास्यास्तत्प्रतियोगि
ताकाभावमात्रमवलंबम तथाविधयत्किंचित्प्रतियोगिसत्वे ताद्रूप्यप्रतीतेरनुदयात् अत एवैकघटवति कंबुग्रीवादिमान्ना
स्तीति शाब्दज्ञानप्रमाणं प्रमाणं च घटसामान्यशून्ये न चैदेवं लघुरूपसमानियतानां गुरूणामव्याप्यतापत्तिः गुणादिगुण
कर्मान्यत्वविशिष्टसत्त्वादिसमानाधिकरणाभावप्रतियोगितावच्छेदकत्वनिषेधायाः प्रतियोगितायाः लाघवेन द्रव्यादिनिष्ठाभा
वप्रतियोगितावच्छेदकत्वेनैवावच्छेदात्॥ ॥

च्छेदकत्वावगाहनादेव शाब्दोन प्रमाणामत आह प्रमाणं चेति तथा सति घटसामान्यशून्येपि प्रमाणं व्यवहारो न स्यादिति भावः न चैदे
वं पदार्थगुरोर्धर्मस्य न प्रतियोगितावच्छेदकत्वं गुणादीति द्रव्यं गुणादुणकर्मान्यसत्वाद्द्रव्यत्वाद्वत्पत्र तयोरणामेवाव्याप्यत्वं स्यादित्यर्थः
लाघवेनेति गुणादिसमानाधिकरणाभावप्रतियोगितावच्छेदकत्वस्य द्रव्यवृत्त्यत्यंताभावप्रतियोगितावच्छेदकत्वरूपलघुरूपसमनि
यतस्यानवच्छेदकत्वादिति भावः एवं तात्पर्येन द्रव्यस्यापि न व्याप्यता द्रव्यसंबंधिनिष्ठत्वाद्यपेक्षया द्रव्यत्वेनैतीत्यारे लघुत्वादिति॥ ॥

ननु तत्तदवच्छेदकत्वव्यक्तीः प्रातिस्विकरूपेणोपादायैतावदभावकूटस्यैवव्यक्त्वादत आह तत्तदिति ननु ताहशावच्छेदकत्वत्वावच्छिन्ना
भावोनवाच्यः किंतु स्वावच्छिन्नाभाववत्संबद्धहेतुमन्निष्ठाभावप्रतियोगितावच्छेदकत्वसामान्यं कोपीधर्मस्तद्धर्मावच्छिन्नप्रतियोगि
काभाववद्यत्साध्यतावच्छेदकं तदवच्छिन्नसामानाधिकरण्यं व्याप्तिः द्रव्यं गुणादित्यादौ चद्रव्यनिष्ठाभावप्रतियोगितावच्छेदकत्वत्वा
वच्छिन्नाभाववत्संबद्धमेवगुणावन्निष्ठाभावप्रतियोगितावच्छेदकत्वसामान्यमिति द्रव्यानिष्ठाभावप्रतियोगितावच्छेदकत्वमे
वताहशं स्वतत्स्वच्छिन्नाभावस्य च द्रव्यत्वत्वेसत्तान्नुगुणे स्वच्छेदकत्वस्वीकारदत आह उपदर्शितेति इत्यत्रत्यतेना भावप्र
तियोगितावच्छेदकत्वत्वमेव प्रकृते स्वपदार्थस्तस्य चानुकूलयत्वमतः स्वस्वादीति आदिनाहेतुसमानाधिकरणाभावप्रतियोगितावच्छे

तत्तदवच्छेदकत्वव्यक्तीनां च प्रातिस्विकरूपेणाभावानां पुनस्तहस्त्राणामपि ज्ञातुमशक्यत्वात् संबद्धव्यत्वत्वादिविशिष्टद्रव्यत्वादेरप्या
पत्तास्वरूगेप्यनुसंधेयः उपदर्शितप्रकाराणामपि स्वत्वादिघटितत्वेन दुर्ज्ञेयत्वात् अत एव घ्राणाभावगुणत्वादिना साध्य
तायां द्रव्यत्वादेर्व्यभिचारित्वमपि साधु संगृहीतं इत्यपि केचिदिति कृतं पल्लवितेन॥ ॥ ॥ ॥

दकत्वव्यक्तीनां प्रातिस्विकरूपेणाज्ञानेन तत्सामान्येताहशाभाववत्संबद्धत्वस्य ज्ञातुमशक्यत्वमित्यादौ परिग्रहः पदार्थपरत्वादवच्छेदनवन्हिमद
न्याहतित्वमिव गुणसमानाधिकरणाभावप्रतियोगितावच्छेदकत्वत्वावच्छिन्ने द्रव्यहत्व त्वंताभावप्रतियोगितावच्छेदकत्वत्वावच्छिन्नाभाववद
संबद्धत्वंतस्य गृहमेवतयापिताहशज्ञानसामग्र्यभावदशायामपि निरुक्तयथाश्रुतव्याप्तिज्ञानादनुमितेरानुभाविकत्वान्नायंप्रकारः संवतीति
भावः अत एव पतरावघ्राणाघ्रावगुणत्वादेर्गुणेरपि धर्मस्य प्रतियोगितावच्छेदकत्वमत एव त्यर्थः केचित्तु पूर्वोक्तरीत्या व्याप्तिर्दुर्ज्ञेयत्वमित्यस्वर
सादत एवेति अत्र हेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकं यद्विशिष्टसंबंधिनिष्ठाभावप्रतियोगितानवच्छेदकं सधर्मः पारिभाषिका

व्याप्तिलक्षणानंतरं सामान्याभावः एवगेवतिर्यथस्याव तारार्थमाह ननु यएवेति प्रत्येकमिति महानसेपर्वतीयवन्हेरभावः पर्वतेमहानसीयव
न्हेरभाव इत्येवं रीत्या लनीयन्यायेनेत्यर्थः तत्र महानसाधवच्छेदेन स्वस्व तत्तत्प्रतियोगितात तथा च तेषामभावानां महानसाधवच्छेदेनप
तत्तत्प्रतियोगितावच्छेदकत्वं महन्हित्वावच्छिन्नेयधिकरण्यं तन्निरूपिका इत्यर्थः तथा च यादृशप्रतियोगितापीपतिकिंचिदवच्छेद
कावच्छिन्नानधिकरणत्वं हेतुमत्स्ताहशप्रतियोगितानच्छेदकत्वं लक्षणाघटकमित्यभिप्रायः एवं वन्हित्वस्यापि तत्प्रतियोगितावच्छेद
कत्वे तद्धतित्वात् महानसस्यापि वृत्तित्वात् न तथात्वं न प्रतियोगितावच्छेदकावच्छिन्नानधिकरणवृत्तित्वं तथा च याहशप्रतियोगिता
वच्छेदकावच्छिन्नानधिकरणत्वं हेतुमतत्स्तत्र यत्किंचित्सदाप्रक्षेपणप्रतियोगितावच्छेदकसामान्यमेवधर्मव्याप्तिमिति भावः एवं सति
न्हिमान्धूमादित्यादौ संयोगेन साध्यतायां साध्यतावच्छेदकस्य वेधनप्रतियोगिव्यधिकरणस्याभावस्याप्रसिद्ध्या तत्कल्पविहायप्रतियो

ननु पर्वतेमिलिताभावस्याभावाज्ञात्वादेवन्हिर्नास्तीति धिपंजन्यंतित एव प्रत्येकं धूमवृत्ति महानसादौ चं तंतित न्न चेतेषांस्वत्वावच्छे
दकतत्तद्वन्हित्वावच्छिन्नवैयधिकरण्यनिरूपिकायाः प्रतियोगिता स्वरवच्छेदकमेव वन्हित्वमतो व्याप्तिः न चैवं वन्हित्वावच्छि
न्नस्यतद्धतित्वान्नतथात्वं तथा सति हृदादित्तिधूमाभावप्रतियोगितावच्छेदक हृदात्वेत्वावच्छिन्नस्य वन्हिप्रदयोगोलकेवृत्तितया
गितावच्छेदकसंबंधेन प्रतियोग्यनधिकरणे हेत्वधिकरणे हेत्वभावप्रतियोगितासामान्ये यद्धर्मावच्छिन्नत्वयत्संबंधावच्छिन्नत्वा इति व्याप्तेः
त्वोमानाभाव इति विवक्षणमाश्रयणीयं तथा सत्याह तथा सतीति न लक्ष्ये दृढ़त्वत्ति नोस्तीति बुद्धेः सर्वेषामेव हृदादवृत्तीनाम भावो विषयः धूमो
पिच हृदादावृत्तिरिति तत्तद्भूमाभावस्यापि हृदादावृत्तित्वे प्रतियोगितावच्छेदकं न स्वच्छिन्नं च वन्ह्यादि अयोगोलके वर्त्ततएवेति तत्तद्भूमाभावस्यापि
प्रतियोगितावच्छेदकावच्छिन्नवैयधिकरण्याभावात् भावात्तस्मादापद्यमवान्वन्हेर्हितया दावति व्याप्तिरित्यर्थः न च प्रतियोगितावच्छेदक संबंधे
वच्छेदकावच्छिन्नाधिकरणत्वस्य हेत्वधिकरणेऽसंभवात्॥

एतादृशीत्या चेदनुगतं रूपं तत्तदभावप्रतियोगितानवच्छेदकमिति संयोगीकृत्य वन्हिमान्धूमादित्यादौ वन्हित्वाद्यवच्छिन्नस्याप्रसिद्ध्या प्रतियोगितावच्छेद-
कोभयाभावविवक्षणासुपेक्ष्य हेतुसमानाधिकरणप्रतियोग्यधिकरणाभावप्रतियोगितानवच्छेदकत्वघटितलक्षणमङ्गीकरोषि तदा धू-
मवान्वह्नेरित्यादावतिव्याप्तिरित्याह अथेत्यादिना केचित्तु पूर्वलक्षणाद्वृत्तित्वविशिष्टस्य यत्किंचिदधिकरणवृत्तित्वं विशिष्टस्य वा तद्रूपाभावेत्या-
भावएवं सामान्यतावच्छेदकसंबंधेन प्रतियोग्यधिकरणः अभावप्रतियोगिकस्यापि प्रतियोग्यधिकरणस्य विशिष्टाभावस्याभ्युपगमादिति न
दसन्नवम्पूर्वलक्षणाद्वृत्तित्वविशिष्टतद्रूपाभावाभावस्यापि विशेषणतया तद्रूपवद्वृत्तित्वावच्छिन्नाभावतया विशेषणतया तद्रूपवद्वृत्तित्वरूपप्रति-
योगितावच्छेदकावच्छिन्नेन समं संयोगेन सामानाधिकरण्यात् अन्यथा पूर्वलक्षणाद्वृत्तित्वविशिष्टस्य तद्रूपस्याभावस्य प्रतियोग्यसमानाधिकर

अथानुगतं रूपं तत्तदभावप्रतियोगितानां नावच्छेदकम् अनवच्छेदकमेव तत्तदभावप्रतियोगितायाः अभावान्तरेभानाभावात् यत्र च तत्
द्रूपावच्छिन्नसाध्यकव्यभिचारित्वप्रतिव्याप्तिरतः ॥

गत्वेन कृतेनोक्तेः अथ पूर्वलक्षणाद्वृत्तित्वविशिष्टतद्रूपस्याभावाभाववद्वृत्तित्वावच्छिन्नाभावजन्यावाप्ववृत्तित्वरूपप्रतियोगितावच्छेदकावच्छिन्न
समानाधिकरणस्तदाप्रकृतेनापि तुल्यमिति अनेनात्याकाशाभावएव प्रतियोग्यसमानाधिकरणः न च तस्यापि द्रव्यावृत्तित्वात्तदभावोपि तथा य
स्य द्रव्याहत्तेरभावाभाववद्द्रव्यावृत्तिर्नास्तीति प्रतीतेरभावस्तदभावस्यैव द्रव्यावृत्तित्वं प्रतियोगितावच्छेदकं कल्प्यते आकाशाभावस्य चकेवला
न्वयित्वात् व्यतिरेकेण तदभावासिद्धेर्नतस्य तत्प्रतियोगितावच्छेदकत्वमिति तदपि तुच्छं लौकिकमत्यक्षस्यैव विषयाधीनत्वात् नातीन्द्रिय
स्य केवलान्वयित्वात् व्यतिरेकेण तदभावासिद्धेर्नतस्य तत्प्रतियोगितावच्छेदकत्वमिति तद्धूमवद्गगनाभावस्याभावेन तादृशप्रतीतिर्भा
वासिद्धेस्तस्य द्रव्यावृत्तित्वेन प्रतियोगितावच्छेदकमिति स्यैव प्रतियोग्यधिकरणत्वेतिव्याप्त्यसंभवात् अभावान्तर इति अनुगतरूपस्य तत्त
दभावभिन्नाभावप्रतियोगितावच्छेदकत्व इत्यर्थः तद्रूपावच्छिन्नसाध्यके अनुगतरूपावच्छिन्नसाध्यके ॥

अत्र रूपत्वेन तद्रूपाभावप्रतियोगितावच्छेदकं नवेति न विप्रतिपत्तिः अभावाधिकरणातिरिक्ताभावानभ्युपगमे सामान्याभावाभ्युपगन्तादिनन्तद्रूप
भावस्य रूपत्वावच्छिन्नप्रतियोगिताकत्वस्वीकारात् किं तु वायो रूपं नास्तीति प्रतीतिरभावरूपविषयिणी नवा अत्यन्ताभाववृत्तिरूपत्वावच्छिन्नप्रतियोगि
ताकत्वं रूपकालावच्छेदेन रूपवद्वृत्तिभिन्नरूपवद्वृत्तिवृत्तिनेवेत्यादिका वा अत्र चरमेत्यत्र द्वितीयपक्षे वायुसंयोगमात्राभावे रूपत्वावच्छिन्नप्रतियो
गिताकत्वमत्वाद्विशेषसिद्धसाधनमतः पक्षे रूपत्वं नतु तद्रूपाभाववृत्तित्वाद्विशेषसिद्धसाधनमतः साध्ये भिन्नान्तं रूपसामान्याभावस्यानुत्पत्तिकालावच्छेदे
नरूपवद्वृत्तित्वाद्यावृत्त्यतो रूपकालावच्छेदेनेति भेदप्रतियोगिविशेषणमरूपवत्वप्रकारकप्रमाविशेष्यत्वाभाववद्वृत्तित्वाद्व्यत्वाभाववद्वृत्तितयावसि

सामान्येति । संशयान्यथानुपपत्तिप्रमाणमाह अन्यथेति वायाविति यद्यप्ययं संयोगेन वायुविशेष्यकस्तस्य विशेषणत्वेनोल्लेखात् न वा रू
पस्य ... विशेष्यकः तथापि रूपतदभावयोर्विरोधिनोः कोटितया प्रकृतानुपयोगप्रसंगात् तथापि वायू रूपवान्स्तदभाववान्वे

सामान्यधर्मावच्छिन्नप्रतियोगिताकस्याभावः पृथगेव अन्यथा सकलप्रसिद्धरूपाभावप्रसिद्धरूप
वदन्यत्वेनावगतवायौ रूपवान्नवेति संशयो न स्यात् विशेषाभावकूटस्यानिश्चितत्वात् ॥ ॥

¹ रूपेनवावायु ²

निरूपतदभावकोटिकसंशयेतात्पर्यमन्यस्तु रूपवत्तदन्योन्याभावकोटिक इति वाभेद इति संप्रदायविदः ॥ ॥ ॥

द्धसाधनमतो हेत्वंतमरूपकालावच्छेदेन रूपवद्वृत्तित्वविशिष्टद्रव्यत्वाद्यभावस्य रूपसामान्याभावसमनियतस्य सिद्धावपीष्टसिद्धिरेव समनियताभावाना
मैक्यादिति दिक् संशयान्यथानुपपत्तिम् अन्यथानुपपद्यमानं संशयम् प्रमाणयति प्रमाणत्वेनाचष्टे समनेः ऐश्वर्य इत्यत्र भावा तादृशसंशयएव व्य
तिरेकानुमानमुपपादितं सान्याभावेमानमिति भावः अपेक्षायां रूपनचेत्तत्र व्यवच्छिन्नप्रमानन्तस्य वायोः उत्कर्षादिति सप्तम्यन्तपदेन विशेषण
त्वप्रतिपादनादित्यर्थः रूपविशेष्यकत्वे वा पुरुषितत्वतदभावकोटीकाच्येतथा सत्याह तथापीति प्रकृतेति रूपाभावनिश्चयप्रतिबध्यसंशयस्यैवाकूतीत्याहरूप
सामान्यभावसाधकत्वेन प्रकृतोपयोगादिति भावः रूपवान्नवेत्युक्तो रूपवत्स्योन्यादभावस्यैव कोटित्वे लभ्यमानेन तु रूपाभावस्य तत्तदभाववान्वेत्युक्ते नो

शब्दासंदर्भमेवसंप्रदायविरुद्धत्वेनेनोह्याद्यशब्दसंदर्भमेवटावस्थापयति विरुद्धयोरित्यादिना कोटिद्वयविशेष्यकत्वे संशयत्वमनुपपन्नमेक
धर्मिकविरुद्धोभयप्रकारकज्ञानस्यैव संशयत्वादित्यतोन्यथासंशयत्वनिर्वचनम् तदुभयप्रकारतानिरूढोभयप्रकारता नियता आवश्यकीतथा
चेतिरूपंवायोरूपाभावोवेत्याकारकः संशयइत्यर्थः असौसंशयः मतांतरमाह वायुरितिवेत्यादिना ननुतथासतिप्रकृतानुपयोगइत्यतः

विरुद्धयोरेकधर्मिसंबंधावगाहिज्ञानमेवसंशयोननुतदुभयप्रकारतापिनियतातथाचरूपतद
भावविशेष्यकोवायुर्विशेषणकोवाविनिनुनव्याः वायुरितित्वतदभावकोटिकरूपधर्मिकएवसं
शयः अधिकरणेतत्तदभावान्यतरनिश्चयस्यापितदधिकरणइतितत्संशयविरोधित्वात् अन्य
थाभूतलेघटतदभावान्यतरनिर्णयेपिघटोभूतलइतिनेवेतिसंशयप्रसंगादित्यपरे ॥

प्रकृतोपयोगंसाधयति अधिकरणइति तत्तदिति तत्तदभावयोर्यद्न्यतरत्तन्निश्चयस्येत्यर्थः तथाचवायौरूपाभावनिश्चयेरूपेवायुरितित्वसंशयो
नुपपन्नइतिरूपसामान्याभावासत्वेविशेषाभावनिश्चयदशायांवायौतादृशसंशयोप्यनुपपन्नइतिभवतिप्रकृतोपयोगित्वमितिभावः अन्यथा ता
दृशनिश्चयस्याविरोधित्वे अनवच्छिन्नविलंवादिनाप्रतिबंधकीभूततज्ज्ञानांतरसंपादकत्वेनाप्यन्वयव्यतिरेकयोरन्यथासिद्धत्वात्तात्तंत्रैशार्मति

यावदितियावद्रूपाभावनिर्णयएवतादृशसंशयविरोधीतदभावात्संशयोनानुपपन्नइतिभावः इत्यस्यपदुनिवाकस्यतथानिर्णीतत्वादि
तिवक्तव्यत्वापादंतोरूपाभावास्तेषांपावंतिरूपाणितदभावानांचनिर्णयः प्रकृतेचनेतइत्यर्थः तस्यप्रतियोगितयावत्त्वनिर्णयस्याभावग
तयावत्त्वनिर्णयस्यच अकिंचित्करत्वात्संशयोसत्त्वावकिंचित्करत्वात् अभावनिश्चयइतितथाचवस्तुगत्यायावंतोरूपाभावास्तन्निश्च

अथैतावंत्येवरूपाणीत्यनिर्णयायावद्रूपाभावानिर्णयेसंशयोनविरुद्धइतिचेन्नयावद्रूपाभावानिर्णयइत्यस्ययावंतोरूपाभा
वास्तेषांयावत्त्वेनतेषांयावंतिरूपाणितावदभावानांयावद्रूपत्वेनतदभावानांवाऽनिर्णयइत्यर्थः नप्रथमस्तत्रीयेतथानिर्णी
तत्वात्नेतरोप्रतियोगितदभावयोर्यावत्त्वानिर्णयेपियोग्योनुपलब्ध्याभूतलेघटोनास्तीतिनिश्चयमात्रादेवघटतदभावसं
शयोच्छेददर्शनेनतस्याकिंचित्करत्वात्नचातिरिक्तसंभावनाविरहसहकृतएवाभावनिश्चयस्तत्प्रतिबंधकः संभावनाच
रूपंपार्थिवादित्रितयभिन्नवृत्त्याकारिकानिवर्ततेचेयंरूपत्वावच्छेदेनत्रितयभिन्नत्वाभावनिश्चयादेवेतिवाच्यम् गौ
रवात् विनाप्यतिरिक्तसंभावनांविशेषाभावनिश्चयेसामान्यसंशयदर्शनाच्च॥

एवंतादृशासंभावनाविरहसहकृतः प्रतिबंधकइत्यर्थः नन्वतिरिक्तरूपस्याप्रसिद्धेः कथंतत्संभावनेत्यत आह संभावनाचेति ननुरूपत्वसा
मानाधिकरण्येनपार्थिवादित्रितयभिन्नत्वाभावनिर्णयसत्वात्कथंतादृशसंभावनेत्यत आह निवर्ततेचेतिरूपत्वसामानाधिकरण्येनतादृ
शभिन्नत्वसंशयोरूपत्वावच्छेदेनतदभावनिश्चयादेवनिवर्ततइतिभावः ननुप्रामाणिकंगौरवंनदोषायेत्यत आह विनापीतितथाचव्य
भिचारेणनतथाप्रतिबंधकत्वमितिभावः॥

चिं·दी·भ·
१३१

अन्यथाऽभावज्ञानमात्रस्य प्रतिबंधकत्वे तथापि सामान्याभावाभ्युपगंतुरपि अतिप्रसंगात् प्रमेयत्वादिना सामान्याभावनिश्चयस्यापि प्रति
बंधकत्वप्रसंगात् सर्वरूपवत्सामान्यावच्छिन्नप्रतियोगिताकत्वनिश्चयश्च न तु विशेषाभावानामेव रूपत्वावच्छिन्नप्रतियोगिताकत्वेऽपि नि
न ह्यद्दृश्यरूपं नास्तीति तु यावत्पविनीरूपत्वावच्छिन्नप्रतियोगिताकताश्रयत्वेनातिरिक्तोऽभावः सिद्ध्येदित्यत आह अभावस्य चेति अत्र य
त्पभावस्यापि तेन रूपेण रूपत्वावच्छिन्नप्रतियोगिताकत्वे विरोधाभावात् भावस्येति सामान्यत एवोक्तं न तु विशेषपर्याप्तीभूतस्य यावद्विशेषाभा
वाधिकरणवृत्तित्वस्य निष्प्रतियोगिकत्वाद्विशिष्टस्य तथात्वेन संभवतीति भावाभावकरं विततत्वमप्यत एव यद्वृत्त्वेऽभावे च विशेषणविशे

अथाभावस्य सामान्यावच्छिन्नप्रतियोगिताकत्वनिश्चय एव तादृशसंशयविरोधी अन्यथा तत्राप्यतिप्रसंगात्सच न प्रकृते अ
भावस्य च यावद्विशेषाभावाधिकरणवृत्तित्वेन विशिष्टस्य तदवच्छेदेन वा सामान्यावच्छिन्नप्रतियोगिताकत्वं संभवति चेदं तादृश
प्रतियोगितायाअतिरिक्तत्वात् तेन नैकविशेषवतो विशेषांतराभाववत्वेन सामान्याभावत्वप्रसंगः ॥ ॥ ॥

षाभावापन्नेसप्रतियोगिकत्वमत आह तदवच्छेदेनेति ननु यावद्विशेषाभावप्रतियोगित्वं चेत्सामान्यावच्छिन्नात्तदा तादृशप्रतियोगिताकत्व
विशिष्टस्याभावस्य विशेषांतरवत्त्यपि संभवाद्यावद्विशेषाभावाधिकरणवृत्तित्वस्य न तत्रावच्छेदकत्वं तथा च तत्रापि सामान्याभावधीप्रसंग इ
त्यत आह संभवति चेति तथा च सामान्यावच्छिन्नप्रतियोगिताकत्वमभावस्य यावद्विशेषाभावाधिकरणावच्छेदेनैवेति भावः इदं च प्रौढ्यो
क्तं गुणे सत्तायाः सत्त्वेऽपि गुणान्यत्वविशिष्टसत्ताया असत्त्ववत्तत्प्रतियोगिकाभावस्य विशेषांतरवति संभवेऽपि सामान्यावच्छिन्नप्रतियो
गिताकत्वविशिष्टस्याभावस्यासत्त्वसंभवादिति ॥ ॥

राम॰
१३१

प्रतियोगितायास्तत्तत्प्रतियोगिस्वरूपाया भेदस्याभावभेदनियामकत्वे प्रतियोगिभेदपक्षोक्तदोषापत्तिरतोऽवच्छेदकभेदमाशंक्य निषेधति न
चेति भेदो वैलक्षण्यमतेन घटत्वस्य नीलघटत्वानतिरिक्तत्वेऽपि न क्षतिः तत्त्वे अभावभेदनियामकत्वे एकघटेऽपि नियामकाभावे नियमस्यानुप
पत्तेरिति भावः अवच्छेदकत्वेति अत्र प्रतियोगितावच्छेदकतानियामकसंबंधः प्रतियोगितावच्छेदकसंबंधः प्रतियोगिविशेषणं चावच्छेदकपदा
र्थः आद्ये पादानात्समवायेन रूपत्वावच्छिन्नस्य समवायेनाभावात्कालिकतया रूपत्वावच्छिन्नस्य समवायेनाभावो भिन्न इति मह्यन्यो।

न च प्रतियोगितावच्छेदकभेदस्याभावभेदनियामकत्वादेव सिद्धिः प्रतियोगिभेदस्य तत्त्वे एकघटप्रतियोगिकस्य प्रागभावा
दिचतुष्टयस्याभेदप्रसंगात् अवच्छेदकं तु भिद्यत एव तत्र कचित्तादात्म्यस्य कचित्संसर्गस्य कचित्पूर्वापरकालीनतद्घ
टत्वादेस्तथात्वादिति वाच्यम् संसर्गप्रतियोगिविशेषणसाधारणस्यैकस्यावच्छेदकत्वस्य दुर्वचत्वात् पूर्वापरकाली
नत्वादेर्ध्वंसादिप्रतियोगितावच्छेदकत्वमानाभावाच्च॥

न्याभावतद्घटात्यंताभावयोः प्रतियोगिविशेषणरूपावच्छेदकभेदाभावेऽपि प्रतियोगितावच्छेदकसंबंधभेदात्स्वभेद इत्याह कचित्तादात्म्ये
ति पूर्वेति ध्वंसे पूर्वकालीनतद्घटत्वादेः प्रागभावे परकालीनतद्घटत्वादेः तथात्वात् प्रतियोगितावच्छेदकत्वात् अन्यतरत्वादिना तदु
भयसाधारणमेकमवच्छेदकं दुर्वचमत आह पूर्वेति तद्घटत्वस्यैव ध्वंसप्रागभावयोः प्रतियोगितावच्छेदकत्वेऽप्यनुयोगिताविशेषस्व
रूपध्वंसत्वप्रागभावत्वविषयकत्वादेर्वैलक्षण्यप्रतीत्युपपत्तौ पूर्वकालीनत्वादेः प्रतियोगितावच्छेदकत्वाकल्पनादिति भावः ॥

ननु ध्वंसस्य प्रतियोग्यधिकरणक्षणकालावृत्तित्वं प्रागभावस्य च प्रतियोग्यधिकरणापरकालावृत्तित्वं नियमतः प्रतीयत इति संबंधविशेषयोः पूर्वापरकालयोरेवावच्छेदकत्वं कल्प्यत इत्यत आह किन्त्वेति प्रकृते तस्य अभावभेदस्य तत्तद्रूपभेदस्य तत्तद्रूपानतिरेकादिति भावः तद्व्याप्यत्वमिति यत्र प्रतियोगितावच्छेदकयोर्भेदस्तत्र तदवच्छिन्नाभावयोर्भेद इत्येवं रीत्यर्थः वैयधिकरण्यादिति अवच्छेदकस्वरूपभेदस्यावच्छेदकविषयतया अभावस्वरूपभेदस्य चाभावनिष्ठतया वैयधिकरण्यादित्यर्थः अत एव वैयधिकरण्यादेव दूषणान्तरमाह अभेदेपीति व्याप्यस्याभावभेदस्यासत्वेपि व्यापकस्य प्रतियोगितावच्छेदकभेदस्य सत्वमविरुद्धम् तथा च रूपत्वतद्रूपत्वयोर्भेदेपि नाभावभेदसिद्धिरिति भावः वैयधिकरण्यादिकं परिहृत्य दूषयति नचेत्यादिना तथा च रूपत्वावच्छिन्नप्रतियोगिताकाभावस्तद्रूपत्वावच्छिन्न

किंचावच्छेदकभेदस्याभावभेदनियामकत्वं न जनकत्वम् अत्यन्ताभावादिस्वरूपस्य तस्याजन्यत्वात् नापि तद्व्याप्यत्वं वैयधिकरण्यात् अत एव व्यापकत्वमपि न अभेदेप्यविरोधाच्च न च तदितरधर्मावच्छिन्नप्रतियोगिताकत्वं तद्धर्मावच्छिन्नप्रतियोगिताकान्यत्वस्य व्याप्यं मानाभावात् अत एव समनियतसुखदुःखादितत्तत्संख्यापरिमाणव्यक्त्यादिनानाधर्मावच्छिन्नोप्यभिन्न एवाभावः भेदासिद्धिस्तु भाववदभावस्यापि विरुद्धधर्माध्यासात्

योगिताकाभावादतिरिक्तः तद्रूपत्वातिरिक्तधर्मावच्छिन्नप्रतियोगिताकत्वात् घटाभाववत् इत्यनुमानमिति भावः अत्राप्रयोजकत्वमाह मानाभावादिति अत एव एतादृशव्याप्तौ मानाभावादेव समनियतेति तत्तत्सुखादिव्यक्तीनां नानाभाव तत्तद्दुःखादिकालेतनतत्सुखाद्यवच्छिन्नाभावस्य तत्तत्सुखादिकालेतनतद्दुःखाद्यवच्छिन्नाभावस्य च समनियतत्वान्न तयोरैक्यमतस्तत्तत्संख्यापरिमाणेति आदिपदाद् घटपरत्वादिपरिग्रहः नानाधर्मावच्छिन्नः नानाधर्मावच्छिन्नप्रतियोगिताकः किं तर्हि भावभेदस्य किं नियामकमपेक्षायामाह भेदासिद्धिस्त्विति भाववदभावस्यैव विरुद्धेति तद्देशावृत्तित्वतदभावोत्तरकालावच्छिन्नत

समनियतानामिति समनियतदेशकालानां समनियतावच्छेदककानां चेत्यर्थः अत्यन्ताभाव इति इदं चात्र बोध्यं रूपत्वावच्छिन्नाभाववत् तत्परिमाणत्वावच्छिन्नाभावोपि नैक एकक्षणवृत्तित्वविशिष्टतत्परिमाणत्वावच्छिन्नाभावादिकं तदेव तत्परिमाणं नास्तीति बुद्ध्युपपत्तेः एवं तत्संख्यात्वावच्छिन्नाभावोप्यभावकूटमेवेति मूलाग्रावच्छिन्नशरीरतरुसंयोगादीनां युगपदुत्पन्नानामपि नैकः प्रागभावो युगपद्विनष्टानामपि नैको ध्वंस इत्यतोः सत्वीति तत्र परस्परानवच्छेदकावच्छेदेन तत्तत्प्रागभावध्वंसयोः सत्वेपि नैक्यमिति भावः समानाधिकर

अत एव च गगनादीनामवृत्तीनां समनियतानां धर्मधर्मिणामेक एवात्यन्ताभावः युगपद्विनष्टानामुत्पन्नानां वा समदेशानामस्ति बाधके एक एव ध्वंसः प्रागभावो वा व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकोपि चेदभावः प्रामाणिकस्तदा तस्यैकस्यैव प्रतियोगिताः सर्वैरेव व्यधिकरणैर्धर्मैः सर्वेश्च समानासमानाधिकरणैः संबंधैरवच्छिद्यन्ताम् आकाशाभाव एव वा तथास्ताम्॥

णेरिति इदं च व्यधिकरणधर्मावच्छिन्नाभावस्यापि प्रतीतिबलात् प्रतियोगितावच्छेदकसंबंधाङ्गीकारेण अन्यथा समानाधिकरणसंबंधावच्छिन्नाभावस्य व्यतिरेकित्वात् केवलान्वयिव्यधिकरणधर्मावच्छिन्नाभावेन सममैक्यानुपपत्तेरिति आकाशाभाव एवेति यद्यप्याकाशाभावस्यापि व्यधिकरणसंबंधावच्छिन्नत्वात् समानाधिकरणैः संबंधैरित्यनेन गतार्थता तथाप्यतिरिक्ताभावकल्पनामपि चेद्व्यधिकरणधर्मावच्छिन्नाभावानभ्युपगमस्तदोक्तप्रस्याकाशाभावस्यैव व्यधिकरणधर्मसंबंधावच्छिन्नप्रतियोगिताकत्वं कल्प्यते बाधकाभावादित्याशयेनेदमिति॥

तत्रहेतोनिमूलाद्यवछिन्नंवृक्षादिवृत्तित्वंकिंचिदनवछिन्नंचगुणादिवृत्तित्वंकपिसंयोगाद्यभावत्वस्यावछेदकमूएवमुक्तत्रिकालाद्यवछिन्नघ
टादिवृत्तित्वंकिंचिदनवछिन्नंचवाय्वादिवृत्तित्वंरूपाद्यभावत्वस्यावछेदकम् एवंकिंचिदनवछिन्नंघटादेर्वृत्तित्वंसमवायेनगोत्वाभावत्वस्यावछे
दकंकालिकतयागोत्वाभावत्वस्यतुगोभिन्नदेशावछिन्नंकालवृत्तित्वमवछेदकमसमवायेनोकाशाद्यभावत्वस्यतुनकिंचिदवछेदकंव्या
प्यवृत्तित्वादितिविशिष्यतत्वेपूर्वोक्तदोषोऽतस्तदवछेदेनेतिघटपरेति अव्याप्यवृत्तित्वंगोत्वादीतिव्याप्यवृत्तित्वंचाभिप्रेत्यतद्वदः घटा

मेवमूएवंहितत्रदेशकालाद्यवछिन्नानवछिन्नतत्तदधिकरणवृत्तित्वेनविशिष्यतत्तदवछेदेनैवैकस्यैवाभावस्यघटगोत्वा
दिप्रतियोगिकत्वसंभवेनतद्देशेपिविलुप्यतत्तत्प्रतियोगिकत्वंतत्तत्स्वभावःतत्ताधिकरणविशेषवृत्तित्वस्यांतर्भावोऽवछे
दकत्वेनेतितुसमानेअतएवसमान्यावछिन्नप्रतियोगिताकत्वंव्यासज्यवृत्तीत्यपिप्रयुक्तम् अव्यासज्यवृत्तेस्तत्स्वभावस्यतत्वा
नुपपत्तेःअतिरिक्तकल्पनेचकिमपराद्धमोतिरिक्ताभावेन किंचव्यधिकरणयोर्घटपटयोर्भिन्नप्रतीतिवद्व्यधिकरणानामपिवि
शेषाभावानांयुगपदिंद्रियसंनिकर्षेसामान्यावछिन्नप्रतियोगिताकत्वप्रत्ययोपिस्यात्॥

भावपदाभावादिभेदःतत्तत्स्वभावःतत्तदभावस्वरूपःनतत्रेति अधिकरणवृत्तित्वस्याभावानात्मकत्वेनतदंतर्भूतत्वात् अभावस्वरूपस्यसा
र्वत्रिकत्वेनतदनवछेदकत्वाच्चेति समानमितिरूपत्वावछिन्नप्रतियोगिताकत्वस्यापितद्रूपाभावस्वरूपत्वात्तत्रापियावद्विशेषाभावाधिक
रणवृत्तित्वादेरनवछेदकत्वादितिव्यासज्यवृत्तीति तथाचघटवत्तिपटशून्येघटपटोभयवदितिबुद्धिरिवपतिंचिद्रूपाभाववतिरूपवानिति
पंनास्तीतिबुद्धेरप्रमात्वइतिभावः अतएवेत्युक्तमर्थंविवृणोति अव्यासज्यवृत्तेरितितादृशप्रतियोगितातिरिक्तेवचेत्तत्राह अतिरिक्तेति
व्यासज्यवृत्तित्वदोषांतरमाह किंचेति युगपदितिमिलितघटद्वयेयावद्रूपाभावानांयुगपदिंद्रियसन्निकर्ष

ननुनिरधिकरणाभावेलौकिकप्रतीतिर्नास्त्येवातइन्द्रियसंबद्धविशेषणतापास्यतथाहेतुत्वात्तादृशधीरत आह अपिचेतिरूपांतरेणगुणत्वा
दिनाननुव्यासज्यवृत्तिधर्मेलौकिकप्रत्यक्षयावदाश्रयसंनिकर्षापेक्षातद्भावदशायांगुणत्वादिनातल्लौकिकप्रत्यक्षंनभवत्येवेत आह
संबंधविधयेतियावदाश्रयासंनिकर्षेपिसंबंधविधयाव्यासज्यवृत्तिधर्मस्यलौकिकप्रत्यक्षंभवतीत्यभिप्रायः एवंचेतिव्यासज्यवृत्तित्वा
वछेदकप्रकारकव्यासज्यवृत्तिधर्मलौकिकप्रत्यक्षस्यावदाश्रयसंनिकर्षस्यहेतुत्वाद्रूपंनास्तीतिबुद्धौचरूपत्वावछिन्नप्रतियोगि
ताकत्वस्यसंबंधविधयैवभानादेकैकाभावसन्निकर्षेपितथाधीःस्यादित्यर्थःननुयावदाश्रयासंनिकर्षेसंबंधविधयातद्भानंनभवेसेवा
तएवदंडपुरुषसंनिकर्षेदशायामेवदंडीतिसंयोगसंबंधांशेलौकिकप्रत्यक्षंतथाचव्यासज्यवृत्तितावछेदकप्रकारकत्वंनकार्यता

अपिचरूपांतरेणसंबंधविधयावाव्यासज्यवृत्तिधर्मस्तानेनयावदाश्रयसंनिकर्षापेक्षा मानाभावात् एवंचैकाभावसन्निकर्षेपिसा
मान्याभावबुद्धिप्रसंगःयादृशेचतज्ज्ञानेयावदाश्रयाणांसन्निकर्षापेक्षातेनतत्रैवातद्भेदस्यचज्ञानेमपितज्ज्ञानेतद्भेदाज्ञानेच
तदग्रहात् आश्रयभेदभ्रमेणतद्भ्रमदर्शनाच्च॥

वेदेदकेनिवेशपमतआदृपाहयशनि तत्रेतादृशज्ञाने तेषांयावदाश्रयाणाम् तद्भेदस्य यावदाश्रयाणांपरस्परंभेदस्य यद्यपितद्भेदज्ञा
नेतज्ज्ञानस्यावश्यकत्वात्तज्ज्ञानस्यपृथक्हेतुत्वेमानाभावस्तथापियावदाश्रयलौकिकप्रत्यक्षाभिप्रायेणेदम् तदुपनीतभा
नेसत्यपिलौकिकप्रत्यक्षप्रतिबंधकदोषसत्वेयावदाश्रयसंनिकर्षेतद्भेदज्ञानादिसत्वेपिव्यासज्यवृत्तिधर्मोग्रहादिति तद्विशेष्य
कज्ञानाभिप्रायेणाइमिस्यापिकश्चित् तदज्ञाने तल्लौकिकप्रत्यक्षाभावे तद्भेदाज्ञानेतद्भेदज्ञानाभावेतदग्रहात्व्यासज्यवृत्तिधर्मग्र
हात् व्यतिरेकमुक्त्वान्वयमाह आश्रयभेदेतिएकस्मिन्नेवद्वयभेदभ्रमेणद्वित्वभ्रमदर्शनादित्यर्थः॥ ॥ ॥ ॥

एतावता प्रकृते किमायातमित्यत आह न चेति अत्र बाधादौ विशेषणत इति अभावत्वादिना ग्रहस्य परस्परभेदज्ञानानुपयोगित्वेनोक्तिं
विरुद्धत्वान्न तद्रूपाभावत्वादिना ग्रहस्य प्रकृतोपयोगिनस्तत्तद्रूपत्वाद्यज्ञानेऽसंभवात् तथा च बाधादौ रूपं नास्तीति लौकिकप्रतीति
र्न स्यादिति भावः ननु यावदाश्रयभेदज्ञानादौ नीलो व्याप्यवृत्तिप्रत्यक्षत्वावच्छिन्नं प्रति नैकरूपेण हेतुता द्वित्वत्रित्वसंयोगादिसाधारण
व्याप्यवृत्तित्वस्यैकस्याननुगतत्वादिति प्रसक्तस्य यावदाश्रयभेदज्ञानत्वस्य चाभावात् किं तु द्वित्वप्रत्यक्षे तन्नाद्वित्वप्रत्यक्षे तत्तदाश्र
यभेदज्ञानत्वादिना हेतुत्वं प्रकृते चाश्रयभेदज्ञानाभावेऽपि रूपं नास्तीति प्रतीतिसत्त्वात्तथा हेतुत्वमेव न कल्प्यत इत्यत आह दिगिति
दिगर्थस्तु रूपं नास्तीति प्रतीतिविषयतैकस्यैवाभावस्य कल्प्यते न तु नैकस्य एवं प्रतिबंधकाभावकारणतायामप्यभावकूटस्य कारण

न चात्र यावद्विशेषाभावानां प्रथममुपस्थितिः संभवति तत्प्रतियोगिनां विशेषाणामनुपस्थितेरिति दिक् केचित्तु न तु विशेषाभा
वानां सामान्यावच्छिन्नप्रतियोगिताकत्वस्य तद्व्याप्यवृत्तित्वस्य च कल्पनामपेक्ष्य लाघवात् सामान्यावच्छिन्नप्रतियोगिताक
त्वेनैक एवाभावः कल्प्यते कल्पनीयशरीरस्योभयत्वेऽपि तदपेक्ष्य तस्य गुरुत्वात् ॥ ॥ ॥ ॥

त्वापेक्षया एकस्यैव प्रतियोगितावच्छिन्नप्रतियोगिताकाभावस्य हेतुत्वे लाघवमेवं रूपवन्निरूपांतरानुमत्या भवत्यं रूपं प्रतिरूपाभावस्य का
रणत्वे वाच्ये नव रूपाभावकूटत्वेन गौरवात् अस्मन्मते तु रूपाभावत्वेनेति दिक् तद्व्याप्यवृत्तित्वस्य तादृशप्रतियोगिताकत्वे व्याप्यवृ
त्तित्वस्य इदं च व्याप्यवृत्तित्वं तत्प्रतियोगिताकत्वातिरिक्तमित्यभिप्रायेण न तु प्रमतादृशप्रतियोगिताकत्वतद्व्याप्यवृत्तित्वं च द्वयं क
ल्प्यं भवतामपि सामान्यावच्छिन्नप्रतियोगिताकत्वमतिरिक्ताभावश्चेति द्वयं कल्प्यं तत्कल्पतत्कल्पनामपेक्ष्य लाघवमित्यत आह कल्पनी

ननु प्रतियोगिताकत्वस्य व्याप्यवृत्तित्वं तत्प्रतियोगिताकत्वस्वरूपमतो नाधिकं कल्प्यं तथा च भवतामेव तादृशप्रतियोगिताकत्वमभावेऽ
भ्युपगतं कल्पनमिति गौरवमत आह विनिगमनेति तद्व्याप्यवृत्तित्वस्यातिरिक्तस्याकल्पनेऽस्माकमपि प्रतियोगितातिरिक्ता न कल्पनीया
तथा चन्ये प्रत्येकं तेषां काभावप्रतियोगितात्र सामान्यावच्छिन्नत्वं च कल्प्यं यथा भवतां तथास्माकमपि स्वरूपानामनंतप्रतियोगितानां
सामान्यावच्छिन्नत्वमतिरिक्ताभावश्चेत्युभयत्र तुल्यत्वे विनिगमनाविरहादतिरिक्ताभावसिद्धिरिति भावः ननु धर्मिकल्पनातो धर्मकल्प
नायां लघुता तत्प्रतियोगिताकत्वस्य धर्मत्वमेव तत्कल्पने विनिगमकमत आह धर्मेति पत्र धर्मिकल्पने धर्मे धर्मिणोरुभयोरपि क

विनिगमनाभावेऽपि च सामान्याभावसिद्धिरस्तु हेतुवधर्मकल्पनातो धर्मिकल्पनाया गुरुत्वं कल्पनीयानेकत्वप्रयुक्तं न चातिरिक्ता
भावस्य तत्र च सामान्यावच्छिन्नप्रतियोगिताकत्वस्य बाधाद्यनंताधिकरणवृत्तित्वस्य च कल्पनामपेक्ष्य लघुत्वानंताधिकरणवृत्ती
नां यावद्विशेषाभावानामेव सामान्यावच्छिन्नप्रतियोगिताकत्वस्य तद्व्याप्यवृत्तित्वस्य च कल्पने वलघीयसीति वाच्यम् ए
वं सत्यभावमात्रासिद्धिप्रसंगादित्याहुः ॥

ल्प्यत्वं धर्मकल्पने चैकस्यैव कल्प्यत्वं तत्रैव तन्न्यायवत्तोऽनंतधर्मत्वेऽनवलोचनमिति तदर्थ इति भावः लघीयसीति भवतां कल्पनीयं त्रयं मम
तु द्वयमनंताधिकरणवृत्तित्वस्य विशेषाभावेषु क्लृप्तत्वादित्यर्थः एवं सतीति प्रत्यभावस्तावदेकः कल्प्यस्तस्यानंताधिकरणवृत्तित्वं कल्प्य
तदपेक्ष्य क्लृप्तानामेवाधिकरणानां तथा प्रतीतिनियामकत्वं लघु इत्यभावान्न सिध्येदित्यर्थः वस्तुतो [illegible] नियामकतया
तिरिक्ताभावसिद्धेस्तस्यानंताधिकरणसंबंधः कल्पनीय इति फलमुखगौरवमिदं गौरवं न दोषायेति भावः आहुरित्यस्वरसबी
जं तु प्रतिबंदिः तु न तर्हि मनिसत्त्वे सूचितम् सामान्याभावरहस्य मिति ॥

नानाव्यक्तीतिरूपवान्पृथिवीत्वादित्यादाविति अर्थः साध्यसेकत्वे विशिष्टाभावाघनंगीकारेणाव्याप्तिः हेतोरपिनानाव्यक्तित्वे पदेहेत्वधिकरणे
पासाध्यव्यक्तिसत्वेऽस्वव्याप्तिरितिमिश्र दिशावकुंशकमितितत्परिहाराय विशेषणद्वयम उपाध्यायमतमास्कंदतिनचात्रेतिरूपवत्वम
पिरूपव्यक्तिभेदान्नेकमतआह तच्चेतिपरंपरासंबंधेनस्वाश्रयसमवायेनरूपादेरितितथाचरूपवतीपृथिवीत्यनुमितिर्नस्यात्त्याच
रूपं पृथिवीत्यनुमितिरितिभावः ननुपत्ररूपस्यतादृशाव्यापकत्वभ्रमस्तत्रैवरूपवती पृथिवीत्यनुमितिरन्यत्रतुरूपं पृथिवीत्याकारिके
वेत्यतआहद्रव्यान्यत्वेतिद्रव्यत्वादावव्याप्तेरिति यद्यप्यसंभवएववक्तुमुचितः सर्वत्रैवविशिष्टाभाववद्वृत्तित्वावच्छिन्नाभावसंभवात्

पदेहेत्यादि अथात्रनानाव्यक्तिरूपादिसाध्यकैकव्यक्तिपृथिवीत्वादावव्याप्तिः नचात्ररूपवत्वादिकमेवसाध्यम् तच्चपरंप
रासंबंधेनरूपत्वादिकमेवतेनचसंबंधेननतदभावः पृथिव्यादाविति वाच्यम् रूपादेरसाध्यतापत्तेः द्रव्यान्यत्वादेविशिष्टसत्ता
यद्वाप्रतियोगिव्यधिकरणस्वसमानाधिकरणात्यंताभावाप्रतियोगिसाध्यसामानाधिकरण्यम् ॥ ॥

घभावस्यद्रव्यादिवृत्तित्वात्सत्तादिसाध्यकद्रव्यत्वादावव्याप्तेश्च अन्यथाविशिष्टतयासत्वादेः साध्यत्वेव्यभिचारिणिज्ञातिमत्वादाव
थापिद्वित्वावच्छिन्नप्रतियोगिताया व्यासज्यवृत्तित्वांगीकारेएतद्रूपवान्नेतद्रूपादित्यादौ प्रतियोगिव्यधिकरणहेतुसमानाधिकरणाभावप्रति
योगितापर्याप्त्यधिकरणत्वं साध्येनसंभवतीतिनासंभवइतितथोक्तमिति नन्ववच्छेदकाघटितलक्षणेप्रतियोगितावच्छेदकावच्छिन्नवैयधिक
रण्यंनवाच्यंकिंतुप्रतियोगिवैयधिकरण्यंतथाचविशिष्टसत्ताभावस्यप्रतियोगिसमानाधिकरणतयाप्रतियोग्यसमानाधिकरणपदेनैवव्या
वारणमतआह अन्यथेतिअतिप्रसंगादिति तथाचतद्वारणायप्रतियोगितावच्छेदकावच्छिन्नवैयधिकरण्यमवश्यंवाच्यमितिभावः अ

ननुविशिष्टाभावस्यविशेष्यविशेषणसंबंधस्यप्रतियोगीनतुविशेष्यंतत्रविशिष्टसत्तायाः साध्यत्वेसद्धेतुत्वमेवतादृशसंबंधस्यचसाध्य
विव्यभिचारित्वमतआहयुत्पादयिष्यतइति दंडीपुरुषोनास्तीत्यादौ दंडविशिष्टपुरुषस्यैवप्रतियोगित्वावगाहनान्नतुतादृशसंयोगस्येतिभा
वः ननुविशिष्टप्रतिरिक्तमेवेतिमतेनोक्तदोषइत्यतआह द्वित्वादीतितत्रहेतुमतिप्रतियोगितानव्यासज्यवृत्तिरितिभावः तथाचासंभवइतिध्ये
यम् प्राचांमतमाशंक्यनिषेधतिअथेतियेनरूपेनरूपेणेतितथाचतादृशप्रतियोगित्वाभावावच्छेदकंपत्साध्यतावच्छेदकंतदवच्छिन्नसामाना
धिकरण्यंव्याप्तिरितिभावः अयंरूपत्वेनतादृशप्रतियोगित्वाभावः तदभावावच्छेदकत्वंप्रतियोगित्वाभावावच्छेदकत्वंसर्वत्रैवेतिरूपव

युत्पादयिष्यतेचविशिष्टाभावस्यविशेष्यप्रतियोगिकत्वं द्वित्वाद्यवच्छिन्नसाध्याभावस्यतत्रसत्वाच्च। अथाप्रतियोगित्वंप्रतियो
गित्वाभावः सचयेनरूपेणतद्रूपावच्छिन्नव्याप्यत्वंहेतौ अस्तिचापरूपादौरूपत्वाश्रितान पृथिवीनिष्ठाभावप्रतियोगित्वमितिप्र
त्ययादितिचेन्नतादृशप्रतीत्याहिरूपत्वासेप्रतियोगितायाअवच्छेदकत्वाभावोगृह्यतेनतुतदभावावच्छेदकत्वमसर्वत्रैवरू
पेपृथिवीनिष्ठाभावप्रतियोगित्वंनकुत्रापिरूपेतदभावइत्यबाधितप्रत्ययात् अन्यथाघोयोधर्मोयस्यनावच्छेदकस्तत्तद्रवच्छेदेन
तत्तदभावोयुक्तरीत्यासिध्यतमेयधूमत्वेननवह्निमन्निष्ठाभावप्रतियोगित्वमितिप्रत्ययात्तदवच्छेदनतादृशप्रतियोगित्वाभा

स्यानतिरिक्तवृत्तित्वरूपावच्छेदकत्वस्फोरणायनकुत्रापीतिरूपत्वसामानाधिकरण्येनतादृशप्रतियोगित्वाभावसत्वव्यवच्छेदायतथाचरूपत्वाव
च्छेदेनतादृशप्रतियोगित्वप्रत्ययस्यविरोधिनः सत्वेतदवच्छेदेनप्रतियोगित्वत्वावच्छिन्नाभावविषयीकरणासंभवाद्रूपत्वादिनानपृथिवीनि
ष्ठाभावप्रतियोगित्वमितिप्रत्ययस्यतत्तीयोच्छिन्नविनस्यपृथिवीनिष्ठाभावप्रतियोगितावच्छेदकत्वस्याभावोरूपत्वेविषयइतिभावः ननुरूपत्वाद्यव
च्छेदेनतादृशप्रतियोगित्वाद्यभावज्ञानेरूपत्वेस्वरूपसंबंधरूपतादृशावच्छेदकत्वज्ञानमेवविरोधिनत्वनतिरिक्तवृत्तित्वरूपावच्छेदकत्वज्ञानमतो
नोक्तमतीतिचेत्अधिकेत्यतआहान्यथेतितेनरूपेणप्रतियोगित्वाभावविषयीकरणेयोपइतितथाचगुणाद्यनवच्छेदकमप्येयत्वाद्यवच्छेदेनगुणा

अथैतत्तथा सामानाधिकरण्यप्रतियोगितावच्छेदकम् तथा च सामानाधिकरण्यप्रतियोगितावच्छेदकतादृशप्रतियोगित्वाभावावच्छेदको यो धर्मस्तद्रूपावच्छि-
न्नसामानाधिकरण्यं व्याप्तिरिति भावः इदमवच्छेदकत्वमनतिरिक्तवृत्तित्वनियतमन्यूनवृत्तित्वनियतं वा आद्ये समानाधिकरणेति असमानाधिकरणा-
धूमोपस्यायोगोलकीयवन्हेस्तद्वृत्तितया तथा च वन्हित्वस्यातिरिक्तवृत्तितया सामानाधिकरण्यप्रतियोगितानवच्छेदकत्वाद्वन्हिमान्धूमा-
दित्यादावव्याप्तिरिति भावः द्वितीये कंबुग्रीवेति कंबुग्रीवादिमत्त्वस्य प्रमेयधूमत्वादिरिव गौरवेणानवच्छेदकत्वादित्यर्थः अत एव कंबुग्रीवादिम-

अथ प्रमेयधूमत्वं न गौरवेण सामानाधिकरण्यप्रतियोगितावच्छेदकं विवक्षितं चात्र तथात्वमिति चेत् असमानाधिकरणधूमव्यक्ति-
कवृत्तितया वह्नित्वमपि न तदवच्छेदकं कंबुग्रीवादिमत्त्वादिना च घटादेरसाध्यतापत्तिरिति विकल्प्याक्षेपश्च अत एव प्रमेयधू-
मत्वं गौरवेण प्रतियोगितापाइन्वतच्छून्यतापाअपि नावच्छेदकमित्युक्तावपि न निस्तारः॥ ॥अत्र वदन्ति अप्रतियोगित्वं प्रतियो-
गितानवच्छेदकधर्मवत्त्वम् न चैवं पूर्वस्मादभेदः तत्र साध्यसजातीयसमानाधिकरणसाधनजातीयत्वस्यात्र साध्यसाधनयोः
समानाधिकरण्यस्य व्याप्तित्वतात्पर्यात् घटकयोस्तादृशप्रतियोगितावच्छेदकतावान्योन्याभावात्यन्ताभावगर्भभेदाद्भेद इत्य-
पि केचित्॥

त्वादिना घटादेस्साध्यत्वापातादेव तथा च तादृशप्रतियोगित्वाभावावच्छेदकं यद्रूपविशिष्टसंबंधिनिष्ठाभावप्रतियोगितानवच्छेदकं तद्रूपावच्छिन्न-
सामानाधिकरण्यमित्युक्तौ प्रमेयधूमवान्वन्हेरित्यादावतिव्याप्तिरिति भावः स्वप्रतियोगितानवच्छेदकत्वघटितलक्षणाकरणे तत्र साध्यजातीयेति
तथा च पूर्वलक्षणोपन्यासे अधिकरणवन्हिसंबंधयोरपि व्याप्तिरित्युक्तप्रमेयकेत तु समानाधिकरणतत्तद्धूमवद्भ्रातादेव व्याप्तिरित्युच्यत इति भेदः घटकयोः लक्ष-
णघटकयोः प्रतियोगितेति प्रतियोगितावच्छेदकान्योन्याभावप्रतियोगितावच्छेदकत्वात्यन्ताभावयोरित्यर्थः अन्यनिष्ठव्याप्तिग्रन्थास्तदर्थक-
त्रिदित्यनेन सूचितः॥

सामान्यविशेषेति सामान्यं साध्यसजातीयसमानाधिकरणसाधनजातीयत्वम् विशेषः साध्यसाधनयोः सामानाधिकरण्यम् आधिक्या-
दिति अन्योन्याभावाप्रतियोगियत्साध्याधिकरणं तद्वृत्तिसाध्यसामानाधिकरण्यमित्यर्थः एकस्य साध्याधिकरणांशस्याधिक्यात् य-
द्वृत्तित्वमित्यत्र तत्त्वान्योन्याभावाप्रतियोगियत्साध्याधिकरणं तद्वृत्तित्वमित्यर्थः तत्प्रवेशात् लाघवमिति भावः नानाव्यक्तीति नानाधिकरण

अत्यन्ताभावगर्भतत्सामान्यविशेषभावे न्योन्याभावगर्भमपि व्याप्तिद्वयमाह यत्समानाधिकरणेत्यादिना लक्षणद्वयेन प्रथमस्य
साध्याधिकरणांशस्याधिक्याद्द्वितीयलक्षणम् अत्र यद्यपि नानाव्यक्तिसाध्यकस्थले तत्तत्साध्यवत्तत्तत्साध्यवत्त्वस्य च सा-

यत्समानाधिकरणान्योन्याभावप्रतियोगिपदं न भवतितेन समं सामानाधिकर-
ण्यम् स्वसमानाधिकरणान्योन्याभावाप्रतियोगियद्वृत्त्यकत्वम्॥ ॥ ॥

यत्समानाधिकरणान्योन्याभावप्रतियोगितानवच्छेदकत्वाच्चाव्याप्तिः तथापि यद्रूपावच्छिन्नवत्त्वं तादृशान्योन्याभा-
वप्रतियोगितानवच्छेदकतद्रूपावच्छिन्नसामानाधिकरण्यमित्यत्र तात्पर्यम्॥

इति नानाव्यक्तिसाध्यकस्थल इत्यर्थः साध्यस्यैकव्यक्तित्वे तु तत्रैकानेहा विनिप्रतीतेरन्योन्याभावाविषयत्वेनाव्याप्तेरसंभवः साध्यस्यैकव्य-
क्तित्वे च यत्साध्यवत्त्वं तादृशान्योन्याभावप्रतियोगितानवच्छेदकमित्युक्तेऽपि निस्तारः स्यादित्यतः साध्यतद्भेदोत्रानात्वमुपदर्शितम् तत्तत्सा-
ध्यवत्त्वस्येति तत्तद्वन्हिमत्त्वस्य तादृशान्योन्याभावप्रतियोगितावच्छेदकत्वादित्यर्थः॥ ॥

ननुवन्हिमान्धूमादित्यादौवन्हित्वस्यसाध्यतावच्छेदकत्वेनयद्रूपावच्छिन्नवत्वमनवच्छेदकमितिलक्षणसमर्थनेपिवन्हिसंयोगत्वस्यवन्हिघ
टितमूर्तिकत्वेनगात्वात्कथंलक्षणगगनमतआहवह्न्यादाविति साक्षात्परंपरयाचेतिवन्हौसाक्षात्तद्द्वयोःपरंपरयासाश्रयप्रतियोगि
कत्वरूपयावद्धितत्वमनुगमकमित्यर्थःनन्वेवमपिवन्हिसंयोगादौसाध्येवन्हिमानित्यिवानुमितिःस्यान्नतुवन्हिसंयोगवानित्याकारि
केत्यतस्तत्रविशिष्येवलक्षणमाहयदित्यादिना वन्हित्वादौसाध्येयदनवच्छेदकंवह्न्यादौसाध्येयद्रूपावच्छिन्नमनवच्छेदकंवन्हिसं

वह्न्यादौतत्संयोगादौतद्द्रुदादौवासाध्येसर्वत्रसाक्षात्परंपरयावाऽनुगमकंवन्हित्वादिकमेवसाध्यतावच्छेदकंतद
वच्छिन्नवत्वस्यचतादृशान्योन्याभावप्रतियोगितावच्छेदकत्वमितिपर्यवद्रूपावच्छिन्नेयादृशरूपावच्छिन्नमनव
च्छेदकमितिवामथापृथंवक्तव्यम् शब्देकस्यानुपादेयत्वात्॥

योगादौयादृशरूपावच्छिन्नमिति एवंवन्हिसंयोगवदादौसाध्येयादृशरूपावच्छिन्नावच्छिन्नमित्यादिवाच्यमूद्दंचप्रगल्भम
तानुसारेणतत्रहन्हेस्तत्तद्वन्हित्वेनप्रतियोगितावच्छेदकत्वेपिवन्हित्वेनतत्रतदभावाभ्युपगमात् स्वमतेतुवह्न्यादौसाध्येता
दृशप्रतियोगितावच्छेदकतानवच्छेदकंयत्साध्यतावच्छेदकमितिवन्हिसंयोगादौप्रतियोगितावच्छेदकतावच्छेदकतानवच्छे
दकमित्यादिवक्तव्यमितिबोध्यमृशब्देकेतिअभिधेयस्यनानाविधत्वेएकशब्देनाभिधानस्याकिंचित्करत्वादित्यर्थः॥

स्तदुत्पत्तिरत्र तदर्थमन्यथोपपादयति उत्पन्नेति कार्यादेरित्यादिनाप्यरिन्द्रकार्योत्पत्तिकालीनोत्पत्तिकध्वंसपरिग्रहः तेनानेनविकल्प
स्य चतुर्थक्षणे न पुनरुत्पादप्रसक्तिः न चैतत्कालीनानन्तध्वंसा घटभावानां कारणत्वमप्यस्य लाघवावारक एव प्रागभावे हेतुः कल्पनाइतिवा
च्यं प्रागभावकल्पनेपि तत्कालोत्पत्तिकानन्तपदार्थप्रतियोगिकानामनन्तानां प्रागभावानां विनिगमनाविरहेण हेतुत्वापादुर्वारत्वा
त् तथा च प्रागभावकल्पना गौरवपरमतिरिक्तमिति अतएव वाहुल्याद्ववादिति प्रागभावकल्पनेतु धर्मिकल्पनागौरवादिरितिभावः एतेन धर्मी ध
र्मौ प्रति मिथ्याज्ञानवासनानां कारणत्वं तत्तज्ज्ञानानां धर्माधर्मानुत्पत्तिवशात्कल्प्यं तेन तथा च मिथ्याज्ञानवासनानामनन्तत्वादाद्यतत्त्वज्ञा

उत्पन्नस्य पुनरुत्पादप्रसंगस्तु लाघवाद्वा कार्यादेः प्रतिबंधकत्वेनापि निरसनीयः ॥ ॥ ॥

नं प्रागभावस्यैवधर्माधर्महेतुत्वं लाघवादिति पराभ्रमः आद्यतत्त्वज्ञानकालोत्पत्तिकानंतनरात्मसंयोगद्वित्वादिप्रतियोगिकानामनंता
नां प्रागभावानां विनिगमनाविरहेण हेतुताया दुर्वारत्वात् तथा चानंतानां कारणत्वकल्पना विशेषप्रागभावकल्पना गौरवमधिकं किं
चाद्यतत्त्वज्ञानकालोत्पत्तिकानामप्रतियोगी धर्माधर्महेतुः कथं नातिरिक्त एव पदार्थः स्यात् तस्य चाभावत्वे भावत्वे मानाभावः न
च ध्वंसप्रतियोगिसत्त्वावच्छिन्नप्रतिद्रव्यस्य समवायिकारणत्वादनादित्वानुपपत्तिरत एव न सत्ताश्रयः स इति वाच्यम् सत्तानाश्रयत्वेपि सामा
न्यादितुल्यत्वसंभवात् तथा च भावत्वेनाभावत्वेन चानिर्णीतमतिरिक्तमेव पदार्थांतरं स्यादिति तितंवेदांतिभिः अपिकारेणाप्रयोजकत्वमुसा
मग्र्यव्यवहितोत्तरकालस्य कार्यवत्त्वेनैव नियमान्नतु पदार्थोत्पत्तिमत्त्वेनेतिभावः ॥ ॥ ॥ ॥

ननु तत्सर्वं तल्लक्षणाप्रविष्टात्तदधिकरणक्षणात्मकातिप्रागभावप्रतियोगिक्षणसंबंधरूपात्स्वभिन्नतदधिकरणायावत्कालप्रागभावाधिकरणासंबं
धरूपाद्वा तदुत्पत्तिर्विना प्रागभावं कथं निर्वाच्येत्यत आह तदुत्पत्तिश्चेति तत्पदं घटादिपरमुक्तम् उत्पत्त्या प्रत्येनाभिमतं घटादि सर्वस्य
स्वसमयस्य विवक्षितपादार्थ्यधिकरणत्वानध्वंसाधिकरणत्वादसंभवः स्यादतः प्रथमं समयपदं कालिकसंबंधेन तद्घटाधिकरणत्वमापकम् तद्घटाधि
करणसमयध्वंसानधिकरणस्य भावित्व इद्वा गोचरत्तानस्य विवक्षिता संबंधे ऽतिव्याप्तिवारणाय द्वितीयसमयपदं कालिकसंबंधमापकम् तदु

तदुत्पत्तिश्च महाप्रलयमनंगीकुर्वतां मते स्वाधिकरणसमयध्वंसानधिकरणसमयसंबंधः तदुक्तम् अथ स्वस्वक्षणायोगस्य क्ष
णायोगाज्जनिर्मतेति क्षणः समयः ॥ ॥ ॥ ॥

कमिति अथ स्वस्वक्षणायोगोयस्य तद्वदेरित्यर्थः अत्र च स्वाधिकरणस्य स्थूलसूक्ष्मसमयमात्रीयध्वंसानधिकरणत्वस्य द्वितीयक्षणा
त्पन्नध्वंसप्रतियोगिन्याद्यक्षणस्यापि तत्कालेपि च सत्त्वात्तत्संबंधसंबोत्पत्तित्वेनभयत्र क्षणापदं व्यर्थमत आह क्षणः समय इति महाप्र
लयस्वीकारे च चरमध्वंसोत्पन्नाविदमव्यापकं स्वाधिकरणसमयस्यध्वंसरूपकालोपाधेर्महाकालस्य च ध्वंसाप्रसिद्धेरितिभावः ॥

॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

तदंगीकारे महाप्रलयांगीकारे यदीयेति यत्स्वरूपत्वमित्यनेनापि मतद्वयगरिपरं चरदीयत्वपत्नीक्षणसंबंधे द्वितीयक्षणावृत्तिध्वंसप्रतियोगित्वाभावस्य सत्वाद्
द्वितीयादिक्षणसंबंधेऽतिव्याप्तिरतः क्वचिदपीति यदीयसमयसंबंधत्वावच्छेदेनाभावसत्वार्थमुपात्तं द्वितीयक्षणावृत्तिध्वंसप्रतियोगित्वस्य चरदीया
द्यक्षणासंबंधे सत्वाद्याद्यक्षणावृत्तिध्वंसप्रतियोगित्वाभावस्य चरदीयसमय संबंधत्वावच्छेदेन सत्वान्नातिप्रसक्तमसक्ती भाविघटविषयक
ज्ञानरूपे चरदीयाविषयितासंबंधे आद्यक्षणावृत्तिध्वंसप्रतियोगित्वस्य सत्वासंभवस्त्वतः प्रथमसमयपदम् यत्र चरदीसतिक्षणाविनश्वर

तदंगीकारे तु क्वचिदपि यदीयसमयसंबंधेयत् समयवृत्तिध्वंसप्रतियोगित्वंना
स्तितस्य तत्समयसंबंधः ॥ ॥

वस्य माद्यक्षणात्मकं सर्वे ध्वंसा इत्याकारकं ज्ञानं तत्राद्यक्षणात्मकतज्ज्ञानसंबंधस्याप्युत्पन्नत्वान्नात्र्याप्तिः विषयित्वपातज्ज्ञानवृत्तिध्वं
सप्रतियोगित्वस्य चरदीयसमयसंबंधसामान्य एव सत्वादतो मध्यमसमयपदम् चरदीयद्वितीयादिक्षणसंबंधेप्याद्यक्षणावृत्त्यसंताभावप्रतियोगित्व
स्य सत्वासंभवस्त्यतो ध्वंसेति भाविघटविषयकज्ञानवृत्तिध्वंसप्रतियोगित्वाभावस्य चरदीयसमयसंबंधत्वावच्छेदेन सत्वात्तदीयविषयि
तासंबंधेऽतिव्याप्तिरतस्तृतीयसमयपदं महाप्रलयोत्पत्तावप्यत्र नाव्याप्तिः चरमध्वंसीयसमयसंबंधस्य तत्समयवृत्तिध्वंसप्रतियोगित्वा
भावादिति ॥

ननु क्रियामात्रस्य महाप्रलयानुरोधेन ध्वंसस्य च कालोपाधित्वांगीकारे पत्र घटोत्पत्तिक्षणमारभ्य द्वित्रिक्षणमध्ये क्रियापापविनाशेन जातं तत्र तृतीय
द्वितीयात्मीयक्षणसंबंधे क्षणत्रयात्मकस्थूलकालसंबंधे चातिव्याप्तिस्तद्वृत्तिध्वंसप्रतियोगित्वाभावस्य तद्वृत्तीयसंबंधत्वावच्छेदेनैव सत्वान्नह्येत्याद
द्वितीयादिक्षणाविनश्यपदार्थस्य कालोपाधित्वाभावान्नितिक्षणं क्रियापादिना शत्रुत्पन्नमभ्युपगमादितो गुर्वीपि क्षणावृत्तित्वलक्षणमाह स च तदधिक
रणेतिपद्यपि स्ववृत्तिध्वंसप्रतियोगित्वाभावव्याप्यतदीयसमयसंबंधताकसमयसंबंधोऽतिरिक्तलक्षणार्थो न तु तदधिकरणक्षणोत्यादिनाव्यपमा
णास्तथापि विशेषणानां भेदेपि विशेष्यस्य तत्समयसंबंधस्यैक्यात् स्त्वचेति निर्देशोपपत्तिरिति भावः तत्पदं घटादिपरं तत्समयवृत्तिध्वंसप्रतियो

स च तदधिकरणक्षणावृत्तित्वव्याप्यस्ववृत्तिध्वंसप्रतियोगिताकसमयवृत्तित्वम् ॥ ॥ ॥ ॥

गितातद्घटाधिकरणक्षणावृत्तित्वव्याप्यात्तत्समयसंबंधस्येत्यर्थः द्वितीयादिक्षणावृत्तिध्वंसप्रतियोगितानु तदधिकरणाक्षणावृत्तित्वव्याप्यात्तदधि
करणाद्यक्षणावृत्तिपरा तथापि द्वितीयादिक्षणावृत्तिध्वंसप्रतियोगित्वस्य सत्वादिति आद्यक्षणावृत्तिध्वंसप्रतियोगिनामपि तदधिकरणस्थूल
कालघमहाकालादौ वृत्तेरसंभवइतिक्षणेति द्वितीयादिक्षणवृत्तिध्वंसप्रतियोगिनामपि चिरातीतानां तद्घटाधिकरणक्षणावृत्तित्वाद्द्विती
यादिक्षणासंबंधेऽतिव्याप्तिरतोव्याप्येति पूर्वोक्तरीत्या सर्वे ध्वंसा इत्याकारकं ज्ञानं यत्राद्यक्षणात्मकं तत्र विषयितया तद्वृत्तिध्वंसप्रतियोगि
त्वस्य तद्घटाधिकरणक्षणावृत्तीनामपि सत्वादाद्यक्षणात्मकतज्ज्ञानसंबंधेऽव्याप्तिरतः स्ववृत्तित्वं ध्वंसस्य कालिकसंबंधेन वाच्यम्
भाविघटविषयकज्ञानस्य तद्घटाविषयितासंबंधेऽतिव्याप्तिरिति लक्षणेपि चरमपदमिति ॥ ॥ ॥ ॥

ननु तदधिकरणक्षणोत्पन्नक्षणोत्तं स जन्यविभागप्रागभावो यदि तत्कर्मोत्तरं स्ववृत्ति प्रागभावप्रतियोगि स्ववृत्तियावत्पदार्थविशिष्टसमयत्वं वा प्रागभा
वं विना कथं निर्वाच्यम् अत आह क्षणत्वं चेति स्ववृत्तीति स्वं लक्ष्यत्वेनाभिमतं तत्र शब्दादि स्ववृत्तिर्यो ध्वंसस्तत्प्रतियोग्यनाधारत्वमित्यर्थः अ
त्यन्ताभावप्रतियोगिनोरेकस्मिन्नपि क्षणे सत्वात् तादृशध्वंसेति एकस्मिन् क्षणे ध्वंसप्रतियोगिनोरसत्वादिति भावः अत्र ध्वंसत्वं निरूपिका प्रति
योगिता या सेति भावः क्षणिकपदार्थमात्रस्याङ्गीकारे त्वाह स्ववृत्तीति स्ववृत्तिर्यो ध्वंसस्तत्प्रतियोगिप्रतियोगिको यावान् ध्वंसस्तद्विशिष्ट
समयत्वमित्यर्थः यावद्ध्वंसविशिष्टसमयत्वे कृते महाप्रलयातिव्याप्तिः क्षणिकपदार्थमात्रस्याङ्गीकारे त्वाह स्ववृत्तीति स्ववृत्तियो ध्वंसस्तत्प्र
रिक्तक्षणाव्याप्तिरतः प्रतियोगिकान्तं ध्वंसविशेषणं स्ववृत्त्यन्ताभावप्रतियोगिप्रतियोगिकयावदभावविशिष्टत्वे तादृशयावद्ध्वंसविशिष्टतये

समय

क्षणत्वं च स्ववृत्तिध्वंसप्रतियोग्यनाधारत्वं स्ववृत्तिध्वंसप्रतियोगिप्रतियोगिकयावद्ध्वंसविशिष्टसमयत्वम्

वाव्याप्तिरिदानीन्तनक्रियादिहत्यन्ताभावप्रतियोग्यनागतपदार्थप्रतियोगिकध्वंसादिवैशिष्ट्यस्येदानीन्तनक्रियादौ सत्वात् न च
स्ववृत्तिध्वंसप्रतियोगिप्रतियोगिकयावदभावविशिष्टत्वमेव सम्यगिति वाच्यं ध्वंसत्वस्याखण्डोपाधितया तत्राभावत्वस्य प्रवेशेन वैय
र्थ्याभावात् अत्र च स्ववृत्तित्वं ध्वंसस्य पावद्ध्वंसविशिष्टत्वे च कालिकसंबन्धेन ग्राह्यम् अतएव मैन समयपदमतेन सर्वध्वंसाद्युत्पाका
रकत्वात् स्योप्यंत्यक्षणावच्छिन्नस्य क्षणत्वोदृश्यपितया तद्धूनाधनध्वंसविशिष्टत्वाभावान्नाव्याप्तिर्नवा स्ववृत्तिध्वंसप्रतियोगिप्रति
योगिकयावद्ध्वंसानाविमपितयावैशिष्ट्यस्य क्षणाद्युपावच्छेदेनैव तज्ज्ञानसत्वादतिव्याप्तिरिति अत्र च स्थिरगणानां क्रियादीना
मेतत्क्षणावच्छिन्नानामेव क्षणत्वमतस्तत्क्षणोत्पन्नध्वंसघटिततादृशयावद्ध्वंसवैशिष्ट्यस्योपान्त्यादिक्षणावच्छेदेनाभावादिति

॥ शुभम्॥

ननु स्ववृत्तित्वविशिष्टध्वंसानेव यावत्त्वेन विशिष्य तद्वैशिष्ट्यस्यैव लक्षणत्वं युक्तम् तत्राह सुचिरत्वसत्व आह स्ववृत्तीति यावद्ध्वंसेति स्ववृत्तिध्वं
सविशिष्टत्वस्येत्यि स्थिरगणे सर्वदैव ज्वाद्यतिव्याप्तिरतो यावदिति अत्रापि स्ववृत्तित्वं विशिष्टत्वं च कालिकसंबन्धेन बोध्यं तत्प्रयोजनं च पूर्वोक्तमि
तिनुध्वंसत्वस्याखण्डोपाधितानङ्गीकारे जन्याभावत्वं किंचित्कालावृत्त्यभावत्वं वा ध्वंसत्वं वाच्यं तत्र जन्यत्वं किंचित्कालावृत्तित्वं वा विशे
षणं व्यर्थं प्रागभावानङ्गीकारे तु स्ववृत्तियावदभाववैशिष्ट्यस्यैव सम्यक्त्वादित्याह स्ववृत्तीति स्ववृत्तियावत्पदार्थवैशिष्ट्यं न कस्यापि।
—स्थिरस्य प्रतिक्षणं कस्यचिदुत्पत्तेः कस्यचिद्विनाशात् तदुक्तमभावेति यावदभाववैशिष्ट्यं महाप्रलयान्यक्षणाव्यापकम् चरमध्वंसवैशिष्ट्य

स्ववृत्तियावद्ध्वंसविशिष्टसमयत्वम् स्ववृत्तियावदभाववि शि
ष्टसमयत्वम्॥

स्येदानीमभावात्वः स्ववृत्तीति समयपदव्याख्यातिस्कपूर्ववत् अन्यक्षणावच्छिन्नानां स्थिरगणानां क्षणत्वमुक्त्वा यक्षणावच्छिन्नानां तदा
हस्वस्वपूर्वेति अतिरिक्ताभावानङ्गीकारे लक्षणमाह स्वस्वपूर्वेति कश्चित्॥ ॥ ॥ ॥ ॥

तत्र स्वपूर्ववृत्तित्वं च स्वाधिकरणप्रागभावकालवृत्तिध्वंसप्रतियोगित्वमिति ग्रन्थविरोधात् स्वोत्तरक्षणत्वेनाभिमतं क्रियादिकं स्ववृत्तियावत्पदार्थवैशिष्ट्यं
न कस्यापि स्थिरस्य प्रतिक्षणं कस्यचिदुत्पत्तेः कस्यचिद्विनाशात् तद्वत् स्वपूर्ववृत्तियावत्पदार्थवैशिष्ट्यं न कस्यापि शिशिरातीतानागत
भावादातत्वमयमुपान्नम् स्ववृत्तिः स्वपूर्ववृत्तियावन्तद्वैशिष्ट्यस्थिरगणमापृक्षणावच्छेदेनाद्वितीयादिक्षणेऽत्र प्रथमादिक्षणवृत्तियत्पदार्था
नानाशादिति ध्येयम् अत्र स्वस्वपूर्ववर्तित्वं वैशिष्ट्यं च कालिकसंबंधेन तत्प्रागभावसमयपरं तेन स्ववृत्ति द्वितीयादिक्षणोत्पन्नस्य कालिकत
यास्ववृत्तेः स्वपूर्वस्मिन्नुत्पन्नादौ विषयतयाऽप्यतन्नेन वाध्यक्षणे तद्वैशिष्ट्याभावे पि नासंभवः न वा तद्वत्पूर्वकालीनोत्पन्नकालीनाश्च सर्वप
दार्थाः इत्याकारकज्ञानस्याप्याद्यक्षणे क्षणत्वापत्तिरतीतानागतस्वपूर्ववर्तिनिमपि विषयितयाप्युवृत्तित्वात् वैशिष्ट्यस्याद्यक्षणे सत्वेपि स्व

स्वस्वपूर्ववृत्तियावत्पदार्थविशिष्टसमयत्वं वा स्वपूर्ववर्तित्वं च स्वाधिकरणप्रागभावकालवृत्तिध्वंसप्रतियो

पूर्ववृत्तीनां विपरीततया वैशिष्ट्यस्य क्षणद्वयान्तर्भावेन सत्त्वेपि चाव्याप्तिरतिव्याप्तेर्वा ननु स्वपूर्ववर्तित्वं स्वोत्पत्ति गित्वम् ॥
कालीनध्वंसप्रतियोगिकालवृत्तित्वं तथा चातीताश्रयः उत्पन्नक्षणावृत्तित्वस्य क्षणलक्षणस्योत्पत्तिघटितत्वादत आह स्वपू
र्ववृत्तिं चेति स्वानन्तरोत्पन्नस्य स्वाधिकरणवृत्तिप्रागभावघटितध्वंसप्रतियोगिद्वितीयादिक्षणवृत्तेराद्यक्षणे वैशिष्ट्याभावात् द्विक्ष
णस्यापि स्वानादिस्थलेपि स्वाधिकरणमहाकालवृत्तिध्वंसप्रतियोगित्वं द्वितीयक्षणोत्पन्नानां स्ववृत्तीनां वैशिष्ट्यस्या
द्यक्षणेऽभावान्महाप्रलयातिरिक्तक्षणेऽव्याप्तिरतः स्वपूर्ववृत्तिनिरुक्तोपावश्यकादिति ॥ ॥ ॥

ननु क्रियामात्रस्य कालोपाधित्वेन तत्स्वघटितलक्षणमारभ्य सर्वाण्येव लक्षणान्यनुपपन्नानि तथाहि प्रतिक्षणं क्रियाया नाशस्यानभ्युपग
मात् यत्र यत्र घटोत्पत्तिपूर्ववर्तीयक्षणे क्रियाभावो जातो न घटोत्पत्तिक्षणे तत्साक्षणे वा न ततो घटोत्पत्तिप्राक्क्षणोत्पन्नेन तत्ववृत्ती
यक्षणोत्पन्नेन वा पदार्थे घटपूर्ववृत्तित्वमवज्ञायते नत्स्यात् एवं यत्र घटोत्पत्तिमारभ्य क्षणद्वयान्तर्भावेन क्रियाध्वंसो न जातस्तत्र द्वितीय
क्षणसंबंधस्वाधिकरणोत्पादिकं पदीयसमयसंबंधसत्वादिकं चोत्पत्तिक्षणमतिव्याप्तम् एवं यत्र क्षणद्वयमाख्यक्रियाया नवि
नाशसामग्रीनवोत्पत्तिस्तत्कालोत्पन्नज्ञानाद्युत्पन्नेन तदधिकरणक्षणावनित्ववृत्तितलक्षणमव्याप्तं ज्ञानाद्यधिकरणाभाव

जन्यमात्रस्यैव च कालोपाधित्वाददोषः ॥

संबंधेऽतिव्याप्तिः एवं यदा क्रियापान विनाशसामग्रीतरां सक्षैत्रणावच्छिन्नक्षणलक्षणां परानोत्पत्तिस्तदाद्यक्षणावच्छिन्नस्
णलक्षणमव्याप्तं महाप्रलयोत्तरोपहामंप्रलयक्षणे च सर्वलक्षणानामेवाव्याप्तिरत आह जन्यमात्रस्यैवेति मात्रपदं कृत्स्नार्थ
कम् नित्यस्य कालिकसंबंधेनाव्यावर्तकत्वाद्व्यावर्तकत्वार्थं जन्यानामनुप्रवेशावश्यकत्वे तेषामेव कालोपाधिना प्रायुक्तत्वा
दिति भावः तथा च प्रतिक्षणं कस्यचिदुत्पत्तिः कस्यचिद्विनाशाभ्युपगमात् तत्र तत्र तत्पदार्थानामेवोक्तरूपावच्छिन्नानां क्षण
त्वान्न कोऽपि दोषः महाप्रलयेपि चरमध्वंसस्यैव क्षणत्वान्नाव्याप्तिरिति भावः ननु क्षणत्वव्यवहारविषयो महाकाल ए
व तथा चासंभवस्तत्र निरुक्तस्वपूर्वस्य प्रसिद्धेरत आह जन्यमात्रस्यैवेति मात्रपदेन नित्यव्यावृत्तिरिति तु केचित् ॥

क्षणाद्वृत्तित्वमुत्पत्तिलक्षणमाह योयत्कालेति यत्पूर्वं यद्धंसादि परम् आद्यक्षणावृत्तिध्वंसप्रतियोगिनि समये वृत्तोदेरतत्रैवद्वितीयादिक्षणावृत्तिध्वंसप्रतियोगिन्याद्यक्षणवृत्तेर्नान्याप्तिरतिव्याप्तिः अत्र सर्वध्वंसाद्युत्पत्तिकारकाद्यक्षणात्मकज्ञानेविषयितया भावि ध्वंसानावृत्तेस्तत्प्रतियोगिकालवृत्तित्वात् घटस्य नादशज्ञानात्मकाद्यक्षणसंबंधः व्याप्तिरन्यायकालवृत्तीत्यत्र कालिकतयावृत्तिर्वाच्या अव्यवक्षणवृत्तिध्वंसप्रतियोगिन्यतीतज्ञानेविषयितयावृत्तादेर्वृत्तेरसंभव इत्यतः

योयत्कालवृत्तिध्वंसप्रतियोग्यवृत्तिस्तस्य तत्कालवृत्तित्वमुत्पत्तिरित्यपि केचित् इति
चेत् नैवमपचीयते किंचिदस्माकमिति एकदेशिनो वर्णयन्ति ॥ ॥ ॥

प्रतियोग्यवृत्तिरित्यत्रापि कालिकरूपावृत्तिः एवमतीतज्ञानवृत्तिध्वंसप्रतियोग्यवृत्तेर्घटस्यातीतज्ञाने विषयितयावृत्तित्वेऽतिव्याप्तिरस्तत्कालवृत्तित्वमित्यत्रापि कालिकतयावृत्तित्वं वाच्यमिति अत्रापि क्रियापात्रमाद्यकालोपाधित्वस्वीकारेपत्रक्षणद्वयमध्येक्रियायाविनाशेनजातस्तत्र द्वितीयक्षणवृत्तिध्वंसप्रतियोगिनि घटादेरवृत्तेर्द्वितीयादिक्षणसंबंधेऽतिव्याप्तिरितिबोध्यम् नेवमिति एवम् प्रागभावानंगीकारे ॥ ॥ ॥ ॥

स्यानधिकरणेऽपितिनेषामपिवंतुत्वेनतत्पटजनकत्वादितिभावः न च तंतुत्वेन पटत्वेन कार्यकारणभावे परत्वाक्रांतापापत्तिः किंचिदूर्ध्वकेस्तत्रसत्त्वात्कथं स्यानाधिकरणवृत्तपटापादनमिति वाच्यं यथा कार्यस्याकादाचित्कत्वं कारणस्याकादाचित्कत्वाधीनं तथा कार्यस्याकाचित्कत्वस्यापि कारणकाचित्कत्वाधीनतान्यथा तत्रैच्छादीनां कार्यकारणभावेऽपि सामानाधिकरण्यप्रत्यासत्त्यपेक्षानस्यात् दूरतमकारकधीशब्दे आत्मनितत्प्रकारकेच्छोत्पादनस्याकस्मिकत्वसंभवादिति न तंतुत्वेनेति न चैतंतुत्वेन कारणत्वकाल्पनेकथमनुपपत्तिप्रसंगः तत्पटत्वावच्छिन्नकारणान्तरविशिष्टायाएव सामान्यसामग्र्या स्तत्पटव्याप्यत्वापगमात् तत्पटानधिकरणे तंतुषु तत्पटत्वावच्छिन्नं प्रतिहेतुताया अभावात् अत्रेदमवधेयं तंतुत्वेन पटत्वेन कार्यकारणभावे घटस्य समवायेन व्याप्यतावच्छेदकतादात्म्येन व्यापकता एवं यद्यपि गोत्वतिरूपतिसंबंधेन पटोत्पादनत्वेकालिकतंतुत्वेन रूपकालिकव्यापकतापीति व्यापकताद्वय

अथपटस्यस्यानधिकरणेषु तंतुषु पूर्वातिवारणायसहकारीणां तंतुत्वेनतत्सजनकत्वं कथं तथा च लाघवादरेकएवप्रागभावःकल्प्यते ॥

मेवतन्त्रनिविश्यते ततस्तंतुत्वेनतत्पटत्वेन कार्यकारणभावे तु यदा तत्पट स्तत्रत्यं चैतं तु रिति वैविधा कालिकव्यापकत्वेवनि विष्टा न तु पत्र तत्पट स्तत्र तत्तंतुरन्येषु विभ्रांतौ लिकी व्यापकतापितततंतुभिन्नेपितत्पटस्य समवायिम तत्वेऽभिचारात् तत्पटानधिकरणातंतोतंतुरूपत्यासान्यसामग्र्यात् तद्रूपविशेषसामग्री विशिष्टाभावादेवतत्पटानुपधापकत्वं विशेषसामग्रीविशिष्टंचतत्तंतोस्तादात्म्यं तत्तंतोर्योगानां समवायइति क्रमेणात्वयम् स्यम् केचित्तु तादात्म्येनपटस्यव्याप्यता स्यात्तुयौगिकसमवायेनतत्तंतोर्व्यापकतापत्रतत्पटस्तत्रअतंतु रित्यत्र व्यभिचाराभावात् एवं संयोगादिकं प्रतिक्रिया

स्वाश्रयपदेनेति समानाधिकरणप्रत्यासत्त्येव तत्संबंधित्वमिति भावः इत्थं च तन्तुत्वाद्येनैव यथेः चानेकेति बहुपुरुषप्रापिका
रणेति भावः द्वितन्तुकपटेऽपीति तन्तुद्वयारब्धे तत्कारकस्यैव संयोगस्य कर्तृत्वादिति त्वनान्यथासिद्धत्वमात्रेकेस्य तन्ना च
वा प्रागभावकल्पने तु धर्मिणान्यथासिद्धत्वनिपतत्वर्वर्तित्वे योश्च कल्पने गौरवादिति भावः तत्सिद्धिः प्रागभावसिद्धिः प्रा
गभावकल्पनेऽपि तंतूनां तत्तं तुत्वेन हेतुत्वकल्पनस्यावश्यकत्वेन तत एवाविप्रसंगभंगे किं प्रागभावकल्पनयेत्याह त्रिचतु
रेति असमवायिकारणत्वार्थमाह संयुक्तेषु चेति न च दशतन्तुकपटोत्पत्तिकालीनतन्तूनां तत्संयोगानां चैकसत्ता
नवतंतुकः पटः कथं न जायत इति वाच्यम् तत्र दशतंतुकपटध्वंसस्यापि तत्त्वेन हेतुत्वात् इदं चात्रावधेयम् दशतन्तुकपटा

त्पत्त्याश्रयपटप्रतियोगिजनक इति नातिप्रसंगः इत्थं चानेकत्र प्रागभावसिद्धौ प्रागभावत्वेन प्रतियोगिजनकत्वा
द्वितन्तुकेऽपि तत्सिद्धिरिति चेत् त्रिचतुरेष्वेव तन्तुषु संयुक्तेषु चपटोत्पत्तिप्रसंगः नाव तन्तुत्वेन पटस्य कारि
पपविरहे कथमुत्पत्तिरिति चेत् न कार्यस्य कारणविनाकारणविरहमनभ्युपगमात् सामग्रीसत्त्वेः यिमप्रक्षणिका

त्पतिशक्कालेऽपि नवतंतुकपटोत्पत्तिर्भवति इह तन्तवेमा भिन्नातिनवत्वाशून्तं तन्तुसंयोगाद्दशतं (यस्तत्सावश्यकत्वोपगमान्न
तुकपुरुषनतिस्तत्काले च न पर्वोत्पन्ननवतंतुकपटस्य पुनरुत्पत्तिस्तत्कालोत्पन्नध्वंसविशेषस्य प्रतिबंधकत्वात् नाशकनाश
प्रतियोगिन्याः संयोगव्यक्तेर्विनाश्यहेतुत्वाद्द्वादशतंतुकस्यैकतन्तुपकर्षणानंतरं योनवतंतुकस्तत्र च दशतंतुकध्वंसस्यैव न
त्वेन तंते हेतुत्वान्न तस्य दशतंतुकान्तोदकालेऽयमादरीति तत्रद्वितंतुकपटस्य त्रितंतुकस्य वा पटस्योत्पादास्तु सामान्येनोत्पत्ता
वारनं तथैव तत्र स्वतंत्र सतोत्पत्तिनेति विनाकारणाविरहमिति तंतूनां तत्संयोगानां चसंतुत्वेन विजातीयसंयोगत्वेन वाहे

प्रवेशेतिप्रवेशो कारणतावच्छेदकत्वेनान्यथासिद्धिः अप्रवेशे तत्तत्तन्नामेव विशिष्यहेतुत्वावश्यकत्वे कृतं प्रागभावस्य हेतुत्वेनेति भावः
नन्वकारणत्वे प्यवच्छेदकतयैव प्रागभावः सिध्येत अवच्छेदकत्वेवास्वतंत्रान्वयव्यतिरेकशालिताकारणत्वस्यादत आह परस्य
रेति कतिपयेति तेनासमवायिकारणस्यपक्तिं चित्संयोगस्य सत्त्वेऽपि तत्स्वातावत्संयोगानामेव विशिष्य हेतुत्वं कल्पनं तथा च
हेतुत्वेन कारणत्वेऽपि नक्षतिरिति प्रागभावस्यावच्छेदकत्वमपि नेति भावः अप्रागत्वेऽपीति तत्तंतुयान्तरतीनामेव संयोगानादे
शिकतया तत्प्रागभावव्याप्यत्वादिति भावः ननु तत्पटप्रागभावाधिकरणीयः कालस्तद्वृत्तिः सन्नपस्तत्पटप्रागभावानाधि

तत्पटप्रागभावाश्रयपयाक्तं तुत्वेन तंतुत्वेन तत्पटजनकत्वमितिचेत् अवच्छेदककोटौ प्रागभावप्रवेशाप्रवेशयोः कारणा
तिप्रमाणाभावः परस्परासंयुक्तेषु चकतिपयतंतुषु पटो जायेत न च तत्प्रागभावव्याप्ययावत्संयोगानामपि जनकत्वे
तिपपतन्तुसंयोगेष्वमीतेष्वनन्तेष्वापद्यानुत्पत्तिप्रसंगात् तत्पटप्रागभावमेयुक्त्य च सोऽयं पदोपदीयात ॥ ॥

करणकालवृत्ति स्यादशानत्प्रागभावव्याप्ययावत्संयोगत्वेन पटजनकत्वं नैवं सत्यतीतानागतसंयोगमादायदोषसंभवः
तत्पटाव्यवहितपूर्वक्षणावृत्तितत्पटोत्पत्तिक्षणावृत्तितत्पटप्रागभावव्याप्ययावत्संयोगानामेवोक्तरूपावच्छिन्नत्वादत आह म
त्पटप्रागभावमिति तथा च तत्पटाधिकरणकालध्वंसानधिकरणं सद्घटप्रागनधिकरणकालिकत्वात् वृत्तिः सन्यस्तत्पट
वृत्तिस्यादशतत्पटव्याप्ययावत्संयोगत्वेन हेतुत्वे लाघवमिति भावः अत्र चतत्पटोत्पत्तिकालोत्पत्तिकध्वंसप्रतियोगिसंयोग
व्यक्तिवारणाय कालिकतया तत्पटवृत्तित्वं पर्वत्र च तत्पटप्रागभावानधिकरणकालवृत्तित्वं संयोगविशेषणं तेन तत्पटस्यानन्त

केचित्तु पूर्वातीतानागतसंयोगाभावस्त्रैवतावत्संयोगानुगमकत्वेन प्रागभावः सिद्ध्यति तत्प्रागभावसिद्धिं विना चत्वारि चतुरेषु तन्तुषु संयोगवत्सु च त्रितन्तुतरसंयोगानुत्पाददशायां तत्पटोत्पादप्रसंगभयेनोक्तरूपेणायावृत्तेयोगानाहितुत्वस्योक्तत्वात्त्रिचतुरेषु तन्तुषु संयुक्तेषु च त्रितन्तुकादिपटस्योत्पादावश्यकत्वे संयोगनाशाधीनतन्नाशानन्तरमवृद्दशातन्तुके पटस्योत्पादेन तत्र तादृशसंयोगस्य कस्यचिदतीतत्वमितिवाच्यम् यत्र त्रिचतुरेषु तन्तुषु संयोगोत्पादे त्रितन्तुकादिदोषोत्पन्नं तत्र मन्दः सर्वेषां तन्तुभिः संयोगजाताम्रार्थे कतन्तुनाशात्त्रितन्तुकस्यनाशोऽवश्यन्तसंयोगेभ्यद्दशतन्तुकोत्पादस्तत्रातीतानागतसंयोगविरहस्य संभवादित्याहुः ननु तत्तत्पटस्यैव तत्प्रागभावस्याप्यखण्डत्वात् तत्त्वेनैवप्रवेशे क्लृप्तत्वप्रसङ्ग आह यावत्त्वेति संयोगे यावत्त्वमपेक्षाबुद्धिविशेषः तथा च तत्प्रागभावस्याप्यसंयोगत्रयामात्रविषयिण्या अपेक्षाबुद्धेर्वारणापत्तेस्तत्संयोगव्यक्तीः प्राप्तिस्विकरु

यावत्त्वस्यानिरुक्तेश्च एतेन द्वित्वत्रित्वाद्युत्पत्तिर्व्याख्यातेति ॥ ॥ ॥

पेक्षापाद्यपत्तरवगाहित्वेन तादृशापेक्षाबुद्धिविशेषस्योपादानेतन्नदवगाहित्वानापरस्परविशेषणाविशेष्यभावे विनिगमनाविरहेणानन्तत्वं संयोगस्य मम संस्थाककार्यकारणाभावावश्यकत्वेऽतिगौरवादिति भावः आचार्यमतं दृषयति एतेनेति यावति द्वित्वादिप्रागभावस्तावत्त्वेव द्वित्वादिः अन्यथा द्रव्यस्य समवायिनोनानेकत्वस्या समवायिनोनानेकत्वावगाहिधिपापितिमितस्य धाविशेषात् द्वित्वाद्युत्पत्तिनियमो न स्यादित्याचार्याः तन्ना पि द्वयोः रूपादेः परस्यानुत्पाददशायां त्रित्वा युत्पादापत्तेस्तत्राश्रयाणामेव विशिष्य हेतुत्वस्यावश्यकत्वादित्वस्य लेचाधिकरणद्वयस्यैव विशिष्यानन्यथासि द्धत्वद्वयकल्पनेलाघवप्रागभावकल्पनेचधर्मिणस्तत्रानन्यथासि

साधारणांस्त्रीयपरिभाषाभिन्नतरन्भिन्नसाधारणं वस्तुतोध्वंसे सर्वसाधारणमत्पपवृत्त्यागभावस्यतथाप्रणेनास्तेवेत्याशये नाहकल्प्यत इति तद्वत्त्वेन तादृशप्रागभावप्रत्यक्षत्वेन वर्णनीयमाह अव्याप्यवृत्तेरित्यादिना शाखावच्छेदेन जातस्य कपिस संयोगस्य मूलावच्छेदेनासंतताभावसत्त्वात्पुनरुत्पत्त्यापत्तिरतः शाखावच्छेदेनैव संयोगः स्यादतः संयोगस्य प्रादेशिकत्वोपपत्तये वच्छेदकीभूतशाखादेरप्यवच्छेदकता संबन्धेन हेतुत्वं वाच्यं मूलादौ तादृशशाखादेरभावादेव न संयोगोत्पादः दवच्छिन्ने एवं चेतद्भयहेतुत्वापेक्षापालोह्वादेकस्यैव प्रागभावस्य हेतुत्वकल्पनेतस्यैवत्वावच्छेदेन कार्यजनकत्वात्प्रादेशिकत्वं संयोगादीनामिति प्रत्यक्षादिव लोदसिद्धेश्च प्रागभावे योऽभावस्य धर्मिणस्तत्रानन्यथासिद्धत्वनियतपूर्ववृत्तेरपुनरिहेदानीं घटध्वंसइतिवदिहेदानीं घटप्रागभावइति साधारणमेव लोकानां प्रत्यक्षं कल्पयंतस्तद्वलेन प्राग भावं सामान्यलक्षणं चव्याचक्षाणोपपंनावर्णयन्ति अव्याप्यवृत्तेः कार्यस्य द्वितीयक्षणे ॥ ॥ ॥

नित्ययोः कल्पनात्रयमेयस्य कुत्र नियतपूर्ववर्तित्वयोः शाखासंयोगासंताभावयोरनन्यथासिद्धत्वद्वयकल्पनेवलवी यसीस्यादतः प्रथमं प्रागभावप्रत्युपस्तत्र न च मूलाभिमुखक्रियातः शाखावच्छेदेन संयोगानुत्पादाच्छाखाभिमुखक्रियायास्तत्रावच्छेदेन संयोगजनकत्वं वाच्यं तथा च तावतैव संयोगस्य प्रादेशिकत्वनियम इति वाच्यं तदभिमुखत्वस्यैकस्याभावेन तत्तत्क्रियात्वेन तत्तत्संयोगत्वं किं प्रति हेतुतया मूलाभिमुखक्रियाजन्यसंयोगव्यक्तेः शाखावच्छेदेन प्रागभावाभावादेवानुत्पादाच्छाखावच्छिन्नसंयोगत्वं किं प्रति मूलाभिमुखक्रियात्वकरहेतुत्वात्क्रियांतरसेवतत्र

लीधावतीका रमतेसंयोगादेरव्याप्यवृत्तित्वाभावादाह धारावहनस्थलइति आत्मनः संयोगव्यक्तेश्चतुर्विषयसंयोगव्यक्तेश्चाभि
देतस्याएवविशिष्टहेतुत्वकल्पनेपेवानतिप्रसंगः संभवतीत्यत्रधारावहनपर्यन्तानुधावनंतथाचतत्संयोगात्मनःसंयोगादेश्च
तुर्थक्षणपर्यन्तवर्तमानत्वादित्यर्थः एवंचक्षणद्वयेस्वस्यैवप्रतिबंधकत्वादाह द्वितीयतृतीयक्षणानुवृत्तिर्विषयत्वतच्चतुर्थे
णइत्युक्तं सविकल्पकस्यतुपूर्वोत्पन्नविशेषणज्ञानव्यक्तेस्तत्रनहेतुत्वकल्पनेपूर्ववाहणंसंभवतीतिनिर्विकल्पक
पर्यन्तानुधावनम् क्षणविशेषस्यविशिष्टहेतुत्वाभ्युपगमेतेककारणपरिशेषापत्तिरितिभावः नचनिर्विकल्पकस्या
तीन्द्रियत्वात्प्रागभावस्यापितथात्वमितिकथंप्रत्यक्षोपष्टंभेनतस्यहेतुत्वमितिवाच्यम् निर्विकल्पकस्यायोग्यत्वेपिम

धारावहनस्थलेचप्राथमिकनिर्विकल्पकस्यचतुर्थक्षणोत्पत्तिवारणाय एकावच्छेदादिनाकार्याभावस्य
तज्ज्ञानाभावस्यचकारणत्वंवक्तव्यंतथाचलाघवात्प्रागभावस्यतत्त्वंकल्प्यते तत्त्वभावाधीनाचततदेशि
((कत्वादेशनियमः संयोगादीनामपीति ॥

वंधितावच्छेदकप्रकारकज्ञानादेवाभावप्रत्यक्षोपगमेतत्प्रागभाव
स्यज्ञानप्रागभावत्वादिरूपेणामत्वक्षत्योपगमादिति हेतुज्ञानाभावस्येति नचैवंपंचमक्षणेप्राथमिकनिर्विकल्पका
पत्तिः प्राथमिकनिर्विकल्पकत्वावच्छिन्नज्ञानस्यतादृशध्वंसस्यवाप्रतिबंधकत्वेतात्पर्यात् लाघवात् कारणताद्वयक
ल्पनापेक्षयापरकस्यप्रागभावस्यकारणताकल्पनेलाघवात् अव्याप्यवृत्तिस्थलेः वच्छेदकीभूतशाखादेःकारणता
कल्पनेनलाघवंमतुचंपतितत्त्वभावाधीनाचेति अत्रेहमहाविवीजमुक्तरूपेणप्रागभावस्याप्रत्यक्षमेवनास्तिन
चैवंसंयोगस्यनिर्विकल्पकस्यचतत्समानकालोत्पत्तिकतदवच्छेदकावच्छिन्नध्वंसविशेषस्यैवाप्रतिबंधकत्वे

सर्वत्रेतिवृक्षसमवायिकारणकद्रव्यस्थलइत्यर्थः अयंभावः दशांतुकपटादौचरमतंतुसमानकालोत्पत्त्यांततंर्घटापेक्षाबुद्धिर्नस्येयद
शत्वसंख्याविशेषस्यसामानाधिकरण्यप्रत्यासत्त्यानतत्वेनहेतुतानावत्तेवस्यानधिकरणतंतुषुतत्पटस्यनोत्पादस्तथातंतुसंयोगानां
चतत्वेनविनाशीपसंयोगत्वेनैवहेतुत्वंनतुतद्व्यक्तित्वेनापिकतिपयतंतुसंयोगानुत्पादशायामपितादृशसंख्याव्यक्तिपुरंहदेवृतत्पटो
त्पादप्रसंभवादित्याशयेनाह अभ्युपगमेनैवेति एवकारेणतत्तत्संयोगानांविशिष्यहेतुतानिरासः नचैवंयत्रचरमतंतुसंयोगोत्पा
दात्पूर्वमेवतादृशसंख्याविशेषोजातस्तत्रतद्दशायांतत्पटोत्पत्त्यापत्त्यातत्संयोगानांविशिष्यहेतुत्वमावश्यकमितिवाच्यम्

अन्यतुसर्वत्रतत्संख्याविशेषाणांविशिष्यहेतुत्वोपगमेनैवतत्तद्द्रव्योत्पादनियमसंभवेपियुगपद्धजुत्पत्तिषुनित्ये
षुचत्रित्वाद्युत्पादनियामकत्वेनप्रागभावः कल्प्यतइत्याहुः ॥ ॥ ॥ ॥ ॥

व्यणुकापेक्षाबुद्धितस्संख्याविशेषस्यातीन्द्रियतयाफलबलेन्नेवकल्पनेचरमसंयोगकालएवतदुत्पादकल्पनात् उत्प
त्त्ययत्रचरमतंतुत्वतिद्वितीयक्षणएवसंयोगोत्पादस्तत्क्षणः समवायिकारणभावेनसंख्याविशेषानुत्पत्तावपितृतीयक्ष
णोद्वित्वादिसंख्योत्पत्त्यनंतरमेवतादृशद्रव्योत्पादइत्येवंरूपेणतत्रद्रव्योत्पादनियमःसंभवतीत्यर्थः युगपदितिकर्मोत्पत्ते
यत्किंचित्समवायिनोत्पाददशायामपिसमवाय्यसमवायिमितानांप्रागभावास्यचसत्त्वात्रित्वाद्युत्पत्त्यापत्तिरतस्तत्त
त्समवायिनांतत्तदेकत्वानांवातत्तद्व्यक्तित्वेनहेतुतायाआवश्यकत्वेततएवातिप्रसंगभंगेनतत्प्रागभावस्याकल्पनादितिभा
वः केचित्तुकर्मोत्पत्तिस्थलेप्रथमोत्पन्नानांद्वित्वादिकंचरमोत्पन्नस्यैकत्वमनयोः विशिष्यकारणत्वेनैवानतिप्रसंगोभ

अत्र युगपदुत्पन्नस्थले द्वित्वोत्पत्तौ द्वयोरेव समवायिकारणत्वात्तेन विनानन्यथासिद्धत्वं द्वयकल्पनेन लाघवं प्रागभावकल्पने च स्वस्य नानन्यथासिद्ध
त्वनियतपूर्ववर्तित्वात् त्रयाणां कल्पने गौरवमतो द्वित्वमपेक्ष्य त्रित्वादीनां कं न त्रित्वस्थले त्रयाणां समवायिनां तदेकत्वानां वा त
त्विनानन्यथासिद्धत्वं त्रयकल्पने विनिगमनाविरहेण्यादिपदग्राह्यचतुष्टयादौ लाघवं तत्र चतुर्णां समवायिनां तद्विनानन्यथा
सिद्धत्वं च चतुष्टयकल्पनमपेक्ष्य प्रागभावकल्पनात्त्रयस्य लघुत्वादिति भावः न चात्राप्यपेक्षाबुद्धेरेवातत्त्वेन तत्त्वात्त्रातिप्रसंगः
एकस्या एवेभ्यस्यापेक्षाबुद्धेर्द्वित्वादिपरार्द्धपर्यन्तोत्पादकत्वात् न च तत्राप्यपेक्षाबुद्धेरेकत्वद्वयमात्रज्ञाने त्रित्वाद्युत्पा
दात् तदेकत्वत्रयज्ञानत्वेन तत्तत्त्रित्वं प्रति कारणत्वावश्यकत्वमिति वाच्यम् एवमप्यपेक्षादिताद्दृशज्ञानाविषययुग
पदुत्पन्नादित्वस्थले ईश्वरीययोगिमात्रताद्दृशज्ञानविषयापेक्षाबुद्धेस्तथा कारणत्वकल्पनापेक्षया प्रागभावस्य
गभावस्यैकः कल्पनस्य लघुत्वादिति भावः अत्रेदमरुचिबीजम् ताद्दृशत्रित्वादिकं प्रति त्रित्वादिकमेवोपलक्ष
णीभूतसमवायिकारणतावच्छेदकम् त्रित्वाद्याश्रयमात्रवृत्त्यन्यतमत्वेनात प्रागभावकल्पनेन तस्य तद्धेतुकित्वेनद्वि
त्वकल्पनात्तावन्मात्रवृत्तिभेदव्यक्तेरपि तत्त्वेनावच्छेदकत्वसंभवात् एवं च नित्यद्रव्यनेकत्रित्वादिव्यक्तिप्रावि
योगिकानंतप्रागभावकल्पनामपेक्ष्य लाघवात् तावन्मात्रवृत्तेरेकस्या एव भेदव्यक्तेः कारणतावच्छेदकत्वकल्पन
एव त्रित्वाद्युत्पादनियमसंभव इति ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

तदुपस्थितिम् इच्छोपधायकज्ञानकृत्युपधायकेच्छाव्यक्तेरुपस्थितिम् न च तदिच्छाकाले ज्ञानस्य कृतिकाले चेच्छायाः साक्षात्कार
इत्यर्थः संस्काराद्युत्पत्तिकाले ज्ञानादेरुत्पादस्यायुगपदमापद्येतेति यौगपद्यं अगम्य इत्युक्तिः निषेधादिति तस्याश्च तदन्यथानुपपत्त्या
योगविशेषणामात्मगुणाः स्वनाशजनाद्दृशगुणोत्पत्तिप्रतिबंधकत्वकल्पनेति भावः ज्ञानाद्युत्पत्तेरिति इच्छाकृत्युपधायकभिन्नज्ञानेच्छासा
क्षात्कार इत्यर्थः फलोपधायकव्यक्तिज्ञानं विनापत्त्वेन तदुत्तरक्षणोत्पत्तिमिपस्यान्यपरत्वस्य कारणताग्राहकस्य ग्रहासंभवः तदुक्तं

यत्तु ज्ञानेच्छाकृतीनां कार्यकारणभावग्रहो न तदुपस्थितिं विना न चेच्छाकृतिकाले ज्ञानेच्छासाक्षात्कारौ योगपद्यविशेषगु
णायोगपद्यस्यात्मविनिषेधादतो ज्ञानाद्युत्तरसाक्षात्कार एव ज्ञानत्वादिना इच्छादिजनकज्ञानादिकं गृहीतुमुपपन्न इति तत्र
पौर्वापर्यपरिचयेऽपि स्वरूपग्रहेऽपि कारणत्वग्रहासंभवात् इच्छाकृत्यनुत्पादस्थले ज्ञानेच्छयोः साक्षात्कारे ज्ञा
नेच्छासामान्यव्यतिरेकनियतेच्छाकृतिव्यतिरेकग्रहे मनसा कार्यकारणभावग्रहस्याभ्युपेयत्वात् ॥ ॥ ॥

सामान्यलक्षणासहकृतेनापि न संभवतीत्याशयेनाह पौर्वापर्येति कारणत्वग्रहासंभवादिति अवश्याभ्युपेयत्वादित्यत्र हेतुः
इच्छाकृत्यनुत्पादेति इच्छानुत्पादस्थले ज्ञानस्य कृत्यनुत्पादस्थले चेच्छायाः साक्षात्कारादित्यर्थः इदं च व्यति------ इत्य
त्र हेतुः एवं च सामान्यलक्षणाया फलोपधायकव्यक्तिग्रहेऽपि पौर्वापर्यग्रहाज्ज्ञानेच्छाव्यतिरेके इच्छाकृतिव्यतिरेक इत्येवं नि
यतव्यतिरेकग्रहो दत्तुमवादिना पौर्वापर्योपस्थितौ मनसा कार्यकारणभावग्रहस्यावश्याभ्युपेयत्वे किं स्वरूपतः फलोप
धायकव्यक्तिग्रहेणेत्यर्थः ॥

अप्युपेतफलोपधायकत्वं क्रियाज्ञानमन्यथोपपादयति कृत्यनुत्पादेति तथा चात्रत्ता नेच्छयोरन्वयग्रहोपि संभवतीति भावः इच्छा
कृत्योरप्यन्वयग्रहमाह म कृत्यनंतरमिति नचेच्छात्वेकृतित्वं निर्विकल्पककालएवेच्छानाशे कथं तादृशेच्छात्वादिनान्वयग्रह इति
वाच्यं निर्विकल्पकात्मकोपनयसहकारेण इच्छात्वविशिष्टोपनीतभानकृतित्वविशिष्टलौकिकप्रत्यक्षात्मकतन्नोत्पादादि विशिष्ट
बुद्धौ विशेषणज्ञानस्य हेतुत्वानभ्युपगमाद्वा अत एव पूर्वं निर्विकल्पकमपि द्वेष्यमिति नम एवं च घटोपि इच्छामिको मे मास्त्विच्छाप
नुव्यवसाय इच्छात्वादेर्विशेष्यविशेषणामिति वृत्यः घटोपि विशिष्टवैशिष्ट्यधीरूपव्यवसायविशेषणता नावच्छेदकचक्रप्रकार
कत्वस्वेच्छादेः सत्वादिति ध्येयम् यद्यपि यत्रत्ता नेच्छात्वकृतित्वे इष्टसाधनत्वादरूपनीतमानात्मकप्रत्यक्षो बुद्धिरूपबोधा

कृत्यनुत्पादस्य लिङ्गानेच्छयोः कृत्यनंतरमिच्छाकृत्योः समूहालंबनसाक्षात्कारस्य स्मरणेनस्तानानुमानस्य च संभवा
त् विशत्वं गुरुत्वच्छेदेन युगपद्धिशतिप्रयत्नोत्पादचद्विच्छाकृतिकाले ज्ञानोत्पादेप्यविरोधात् ॥ ॥ ॥

दानमत्र एवं तत्र कृत्यनंतरं त्रयाणामेव विशिष्टसाक्षात्कारः संभवति तथाप्येवं सा बुद्धनं तरमिच्छादि रूप्यत्वेनैव तस्याविनाश्या
त् क्षणत्रयावस्थायित्वमेव तस्यादतोपाश्या बुद्धनं तरमिच्छादिकं न जायत इति मतेनैव प्रकारः संभवतीति तदुपेक्ष्य ज्ञानकृति
कार्यकारणभावपक्षे प्रकारान्तरेणान्वयग्रहमाह स्मरणेनेति इष्टस्मरणस्य तत्त्वविशिष्टधीजन्यत्वविशिष्टस्मृतित्वादिसं
बंधेनेति तस्यार्थः ज्ञानेनयोरिवयोगपद्येनेष्यत इति आशयेनाह विंशत्येति तथा चेच्छाकाले ज्ञानस्य कृतिकाले इच्छायाश्च
साक्षात्कारेपि नानुपपन्न इत्यर्थः ननु सकलगोसमवेतत्वघटितस्य गोत्वस्य विनाशो मान्यलक्षणमङ्गानातेन रूपेण

प्रगल्भमतं निराचष्टे गोत्वमिति विशेषणमेतेति गोपदप्रवृत्तिनिमित्तत्वे साध्यतादात्म्येन गोत्वस्य हेतुतायां विशेषितं तत्र गोरूपादौ
व्यभिचारवारणाय प्रतियोगित्वान्तमेयत्वादौ तद्वारणाय समवेतान्तं सत्तादौ तद्वारणाय विशेष्यमिति न च गोत्वस्यापि
संयोगादिसंबंधावच्छिन्नगोनिष्ठत्वं ताभावप्रतियोगित्वात् समवायेन गोनिष्ठा संताभावाप्रतियोगित्वं वाच्यं तथा चेमत्वादिः
समवायेन गोनिष्ठाभावप्रतियोगित्वात् नेववारणमभवेत तस्य अर्थमिति वाच्यं सर्वस्यैव विशिष्टाभावादि प्रतियोगित्वेन निरु
क्तस्याप्रसिद्धा समवायेन स्वप्रतियोगिव्यधिकरणत्व स्याभावविशेषणत्वावश्यकत्वे मेयत्वाघभावस्य समवायेन गो
निष्ठस्य स्वप्रतियोगव्यधिकरणप्रसिद्धाप्रसिद्धयोगिव्यधिकरणत्वाभावेन तादृशप्रतियोगिव्यधिकरणघटत्वाभावप्र

गोत्वे तु गोनिष्ठाभावाप्रतियोगित्वेन समवेतत्वेन च विशेषितमविशेषितं वा गोवृत्तसमवेतत्वं व्याप्यतावच्छेदकं न तु स
कलगोवृत्तित्वविशेषितं सामान्यलक्षणया पि ग्रहीतुमशक्यत्वान्न तु समानविषयत्वेनापीति स्यादिति तत् समा
नप्रकारकतामात्रस्य प्रयोजकत्वे कचिद्रजतत्वप्रकारकेच्छाक चिन्नेति नियमानस्यात् ॥ ॥ ॥

तीयोगित्वस्य मेयत्वादावसत्वेन व्यभिचारवारणकत्वात् अविशेषितमिति मास्नादौ साध्यत्तत्र गवेतर समवेतस्यापि गोत्वस्य
कालादौ वृत्त्या व्यभिचारात् समवायेन हेतुतायाम वश्यं वाच्यत्वे वा हृद्यप्रतियोगित्वस्य समवेतत्वस्य चानुपादानादिति
भावः सामान्येति व्याप्यग्रहे निखिलस्य सकलस्य गोत्वमात्मस्य लक्षणया ग्रहीतुमशक्यत्वादिति भावः॥ ॥समानप्रका
रकतामात्रेपीति मात्रपदेन समानविषयत्वव्यवच्छेदः जनकीभूतज्ञानीयविषयस्यापीच्छाविषयत्वे इच्छामात्रस्यैव

चिं·नि·भ·
२०६

ननुपत्र रजतत्वप्रकारकेच्छा तत्र तत्प्रकारताघटकसंबंधेन स्वप्रकारीभूतरजतत्वाश्रयत्वसंबंधेन ज्ञानमिति क्रमेणैव कार्यका
रणभावो विषयतानियामकः स्यादित्याशंकां निराचष्टे तादृशेति जनकज्ञानप्रकारीभूतरजतत्वाश्रय एवेत्यर्थः तदुत्पादाभ्युप
गमे रजतत्वप्रकारकेच्छोत्पादाभ्युपगमे कथमरजते इति अनागतशुक्तिविषयकादिदं रजतमिति भ्रमाद्यत्र रजतत्वप्रको
रिकाशुक्तीच्छा तत्र व्यभिचारात्तत्र तादृशकार्यकारणभाव इति भावः ननु रजतत्वासंसर्गाग्रहस्य रजतत्वप्रकारकेच्छाया विष
यतानियामकोस्त्वत आह अनुपस्थितेति असंसर्गाग्रहस्यानुपस्थिते रजते तदादौ चेत्तुल्यत्वात्तन्मात्रविषयकज्ञा
तादृशप्रकाराश्रयस्यैवच्छन्तुत्पादोपगमे कथमरजते रजतत्वप्रकारिकेच्छा अनुपस्थिते चासंसर्गाग्रहोपि न नि
यामकः वस्तुतो संसर्गाग्रहमपेक्ष्य लाघवीयस्त्वाद्विषयत्वमात्रस्यैव नियामकत्वमुचितं सामान्यतश्च नादिच्छायां
(व्यवस्थितहेतुभावस्य तद्विषयकज्ञानस्य तत्प्रकारकत्वमवच्छे

नाद्यदोषापि रजतत्वप्रकारकेच्छा स्यादिति भावः यद्यपि भ्रमपत्वादिनोपस्थितेप्यसंसर्गाग्रहो न नियामक इत्यनुपस्थि
तेप्यसंसर्गाग्रहो न नियामक इत्यनुपस्थित इत्ययुक्तं तथाप्यन्यथाख्यातेरनंगीकर्तृमते इदं रजतमित्याकारकव्यवहारज
नकोपस्थिति विशेषविषयो यदसंसर्गाग्रहस्तद्विषयकत्वनियामकत्वं संभवतीति तद्व्यावर्तनायानुपस्थित इत्युक्ते न
नु रजतत्वप्रकारकेच्छायामग्रहीतासंसर्गस्य निखिलस्यैव विषयत्वेपि क्षतिविरहः उपादानप्रत्यक्षाभावादेवेत अत्र
वृत्त्यभावोपपत्तेरत आह वस्तुत इति तद्विषयककारणत्वकल्पनामसंसर्गाग्रहस्य निखिलस्यैव विषयत्वेपि क्षतिविरहः तु
सहकारकत्वं रजतत्वप्रकारकत्वतत्त्वावता असंसर्गाग्रहादेवच्छेदकत्वे हेतुत्वं चापि स्यात् लाघवात् ॥

राम०
२०६

नन्वेवं रजतत्वप्रकारकत्वस्य तद्विषयकत्वस्य च परस्परं विशेषणविशेष्यभावे विनिगमकाभावात् कारणताद्वयस्यावश्यं कल्प्ये संसर्गाग्रह
स्य हेतुत्वमपेक्ष्य कल्प्यपूर्वोक्ते च रजतत्वप्रकारकज्ञानस्य हेतुत्वमप्रकारकज्ञानस्य च विशेष्यभेदेनैव कारकं ज्ञानस्य तत्तद्विषयणतो
भेदः स्यादत आह अन्यथेति अतिप्रसंगेति ।।अतिप्रसंगात् एकपुरुषस्य रजतत्वप्रकारकज्ञानात्पुरुषान्तरस्य रजतत्वप्रकार
केच्छायत्तिर्विषयके विषये रजतत्वप्रकारकज्ञानसत्त्वे विषयान्तरे रजतत्वप्रकारकेच्छापत्तिरत्यन्तसंगात् एकस्मिन्नेव कारणा
तापामुभयं प्रत्यासत्तिः तथा च यज्ज्ञानं यदात्मनि समवेतं यत्र विषये रजतत्वप्रकारकं तदात्मसमवेतां विषयतासंबंधेन तत्र
अन्यथा समानप्रकारकत्वेनाव्यवस्थितकार्यकारणभाव इति प्रसंगभंगाय सामानाधिकरण्यमिव समानविषय
त्वमपि प्रत्यासत्तिः असंसर्गाग्रहादेः कारणतामपेक्ष्य समानविषयत्वस्यावच्छेदककोटिप्रवेशोपि लघीयान्
(कारणयथार्थत्वायथार्थत्वाधीनस्य कार्यस्य तथाविधो विशेषः ॥
विषये रजतत्वप्रकारिकामिच्छां जनयतीति भावः न च समानप्रकारकत्वमेव प्रत्यासत्तिरस्तु समानविषयत्वं तु कारणतावच्छे
दकमिति वाच्यं तथा सति तदुभयक्रियाभेदेन स्वत्वप्रकारकत्वमविशेष्यभेदेन च कार्यकारणभावस्यानन्त्यात् किं च वस्तुत
स्य प्रमेयत्वादिना ज्ञाने इच्छाविरहात् तदुद्देश्यस्याभावत्वाद्विप्रकारकधीत्वेन फले इच्छायामिच्छाविषयसाधनतावच्छेदकप्रका
रधीत्वेन उपायेच्छायां च हेतुत्वमावश्यकमतः समानप्रकारकत्वस्यैव प्रत्यासत्तित्वमिति ननु विषयतासंबंधस्य वृत्त्यनियामक
त्वेन तदवच्छिन्नप्रतियोगिताया अभावान्नान्तेन संबंधेन व्यापकत्वं तथा च कुत्र प्रत्यासत्तिरित आह ।असंसर्गाग्रहा

यत्तु रजतारजतयोरिमे रजतारजते इति समूहालंबनाद्रजतत्वप्रकारिकेच्छा सर्वत्रैव स्यात् समानविषयकत्वप्रत्यासत्त्या रजतत्वा
दिनिष्ठरजतत्वप्रकारतानिरूपितविशेष्यतासंबंधेन यत्र ज्ञानं तत्र तेन कालिकेनैव मुक्तौ दोषाभावादिति यदपि यत्र चैत्रस्य
रजतत्वप्रकारकं ज्ञानं रजतमैत्रस्य शुक्तौ न तत्रैव चैत्रस्य शुक्तावपि रजतत्वप्रकारकेच्छापत्तिर्विषयतासंबंधेन मैत्रीयस्य रजत
त्वप्रकारकज्ञानस्य तत्र सत्त्वात् चैत्रीयस्य समवायेन तदात्मनि सत्त्वादिति तन्न उभयप्रत्यासत्त्यवच्छिन्नकार्यकारणतायाम्
क्तातिप्रसंगस्य सुदूरपराहतत्वात् न हि विषयतया रजतत्वप्रकारकेच्छायां विषयतया यस्य कस्यापि तत्र रजतत्वप्रकारकं
ज्ञानं सहकारि येन तादृशसहकारिवाशाधक्किंचिद्धर्मिकस्वीयरजतत्वप्रकारकज्ञानेनान्यत्र रजतत्वप्रकारकेच्छापत्तिः
स्यात्परं तु यत्रैकं रजतत्वप्रकारकं ज्ञानं सहकारि येन तादृशसहकारिवाशावी तत्किंचिद्धर्मिकस्वीयरजतत्वप्रकारकज्ञाने
नान्यत्र रजतत्वप्रकारकेच्छा यतिः स्यात्परं तु यत्रैकं रजतत्वप्रकारकं ज्ञानं विषयतया प्रत्यासत्तिं प्राप्तात्मनि समवायेन
स्थितं तत्र विषये रजतत्वप्रकारिकामिच्छां तदात्मसमवेतां जनयतीति । अन्यथा परामर्शस्य सामानाधिकरण्यप्रत्या
सत्त्याऽनुमितिजनकत्वस्य कारणापरामर्शसत्त्वेऽप्यनुमित्यापादनसंभवादिति न किंचिदेतत् समानविषयत्वस्येति जया
वत्तद्विषयकरजतत्वप्रकारकेच्छां प्रति तद्विषयकरजतत्वप्रकारकधीत्वेन कार्यकारणभावो पि विशिष्य मेदेन भिन्न स
वेतिभावः समानप्रकारकत्वस्याप्यवच्छेदकत्वात्कत्वात्कोटीति निवेशोपीत्यपिनाप्रत्यासत्तित्वं समुच्चितं ननु समान
विषयत्वत्वस्य प्रत्यासत्तित्वे रजतत्वप्रकारकज्ञानत्वस्य कारणतावच्छेदकस्याविशेषात्कथं यथार्थत्वायथार्थत्वरूपका
यवैलक्षण्यं मन्मते तु दोषाभावभेदाग्रहाद्यात्मकसहकारिवैलक्षण्यात्तदुपपत्तिः स्यादत आह कारणेति तथाविधः

एतेन कारणयथार्थत्वायथार्थत्वनियामकेन तत्प्रकारकं रजतत्वकारकं दोषाभावसहितमिति तेन रजतत्वप्रकारकज्ञानाच्छुक्तौ न
संवादिनीच्छा तत्र दोषस्यैव सत्त्वादिति भावः उपस्थितेति उपस्थितं यद्रजतं तत्रयो रजते भेदाग्रहस्तत्सहितमित्यर्थः त्वद्विशे तिप
थोपस्थिता रजतद्वितित्वविशिष्टरजतभेदाग्रहाभावादनुपस्थिते रजते रजतेवान विसंवादिनीच्छा तथोपस्थितयद्रजततद्वितित्व
विशिष्टभेदाग्रहस्यैव हेतुत्वकल्पनयैवानुपस्थिते रजते वा संवादीच्छाभावोपपत्तौ न दोषाभावस्य गुरोः कारणत्वकल्पयितुमुचित
मिति भावः तथा चानागतरजतोपस्थित्यर्थमपि मामान्यत्वलक्षणावश्यकीति हृदयं भेदाग्रहस्यैवैकस्य कारणे दोषाभावस्य वावच्छे
दः दोषाभावोपक्षपाल्लघवं दर्शयति दोषाणामिति रजतभेदग्रहे निदोषाणामानन्त्यात्तत्त्वेन तत्तदभावानां हेतुत्वे कल्पने । नतको

एतेन रजतत्वप्रकारकेच्छायां तत्प्रकारकं ज्ञानं संवादिन्यां तस्यां दोषाभावसहितं विसंवादिन्यां तदुपस्थिता रजतभेदाग्रह
सहितं हेतुरिति परास्तम् तद्विशापि च संवादिन्यामुपस्थितरजतभेदाग्रहस्यैव हेतुत्वौचित्याच्च दोषाणां रजतभेद
ग्रहप्रतिबंधकानामभावमपेक्ष्य लघुत्वात् ॥ ॥ ॥

र्यकारणभावापत्तिरतो रजतभेदग्रहप्रतिबंधकाभावत्वेन हेतु
तावच्छात तथा च तदपेक्षया रजतभेदग्रहाभावत्वेनैव हेतुत्वमुचितमित्यर्थः न च भवन्मतेपि रजतत्वाभावादिग्रहाभावस्यापि विनिगम
नाविरहाद्धेतुत्वं स्यादिति वाच्यं रजतत्वांशेन्यप्रकारकं रजतत्वप्रकारकेच्छां प्रति रजतत्वाभावग्रहस्याविरोधित्वात् तथात्वेपि च भाव
द्वयकारणतामपेक्ष्योक्तदोषाभावस्य गुरुत्वादिति रदमुपलक्षणं दोषाभावस्यात्मनिष्ठतया हेतुत्वे रजतं रंगो यो रजतत्वप्रमाभ्रमादौ
रजते संवादिनीच्छा न स्यात् विषयनिष्ठतया हेतुत्वे च रंगे रजतत्वभ्रमकाले प्यनुपस्थिते उपस्थिते वा दुष्टदोषादर्शदोषाभावसत्त्वा
त्संवादिनी रजतत्वप्रकारिकेच्छा स्यात् विसंवादिन्यामुपस्थितरजतभेदाग्रहस्य हेतुत्वेपि यथा कथंचिदुपस्थितारजतभेदाग्रहसत्त्वा

सिद्धएवेत्येवकारेणानागतव्यवच्छेदः ननुसिद्धत्वस्येच्छाविरोधित्वात्कथंसिद्धइच्छेत्यत आह लाघवादिति तत्प्रकारावच्छेदेनेतिपक्तिरितिसुखत्व
सुखत्वसामानाधिकरण्येनासिद्धत्वप्रहाभावोवर्त्तनएवेतिभावः ज्ञानमेवेति ननुसिद्धत्वमपीत्येवकारार्थः स्वरूपसत्सिद्धत्वस्यच्छाविरो
धित्वेप्यनागतसिद्धत्वज्ञानकालेइच्छानुदयात्सिद्धत्वज्ञानस्यविरोधित्वमावश्यकंतथाचकल्पनालाघवात्स्यैवतथात्वमस्तुननुस्वरू
पसतसिद्धत्वस्येतिभावः तत सुखत्वावच्छेदेनासिद्धत्वज्ञानं प्रकृते सिद्धसुखेसिद्धत्वेमच्छाविरोधीत्यत्रयुक्तिमाहकथमन्यथेति अ
न्यथा स्वरूपसतःसिद्धत्वस्यभिन्नरूपेणासिद्धत्वज्ञानस्यचेच्छाविरोधित्वेप्रोषितस्येति कांतामरणाज्ञानस्यच्छासामग्र्याःसद्भाव
नायच पेघपिप्रोषितेपीच्छोदयात्तत्कांतामरणानामपीच्छाभवत्येवतथापिवाधनिश्चयस्यप्रतिवंधकत्वमभ्युपेत्याह अज्ञातकां

अत्राहुःसिद्धेसुखेसुखत्वेनरूपेणेच्छालाघवात् तत्प्रकारकेच्छायांतत्प्रकारावच्छेदेनसिद्धत्वज्ञानमेवादिविरोधिनपततत्प्र
कृते तत्सत्वेइच्छोत्पत्तेस्तत्त्वपाप्यनंगीकारात्कथमन्यथाप्रोषितस्याज्ञातकांतामहेशस्यतत्कांतावलोकनाद्याविच्छेदातत्व
लोकनादीनोसिद्धत्वज्ञानादतिरिक्तस्यचासत्वादित्यादिवहुतरमूहनीयम्॥ ॥ ॥ ॥ ॥

तामरणस्येतिअसिद्धकांतात्मएवलोकनेइच्छानानुपपन्नेत्यतस्तत्कांतेति अतिरिक्तस्यसिद्धत्वेनज्ञातादतिरिक्तस्यनचतत्रतत्कां
तावलोकनत्वेनानागतानुयायिवेच्छाविषयःसोदितिवाच्यंतत्कांतावलोकनत्वेनघटादाविच्छापपादकदोषाभावात् अनागता
गतपदार्थेताहृशेच्छाविषयत्वकल्पनामपेक्ष्यतत्कांतावलोकनत्वेनज्ञातेकतिपयावलोकनएवेच्छाविषयत्वकल्पनेलाघवाच्चेति॥

लाघवादसिद्धत्वज्ञानमेवेति यद्यपिभ्रमत्वेनाज्ञातसिद्धत्वनिश्चयाभावापेक्षयाभ्रमत्वेनानिश्चीयमानासिद्धत्वज्ञानमेवगुरुत
थापियत्रविषयत्रविषयविशेषभ्रमत्वेनाज्ञातएवसिद्धत्वासिद्धत्वज्ञानेतत्रोक्तलाघवस्योक्तत्वादिति विशेषरूपावच्छेदेनत
तत्सुखत्वादिना सामान्यरूपेण सुखत्वादिना तत सिद्धसुखेःसिद्धत्वप्रकारकंज्ञानंएकंज्ञानंज्ञानद्वयंवेति तथाचतत्ता
क्षाणपास्वातंत्र्योपस्थितासिद्धत्वस्यासंसर्गाग्रहएवान्यथाख्यात्यनंगीकर्त्रोकारणंवक्तव्यमितिभावः नेन्वसंसर्गाग्रहमात्रेण

अथसिद्धत्वनिश्चयाभावापेक्षयालाघवादसिद्धत्वज्ञानमेवहेतुःनचसिद्धत्वेनज्ञातेतत्संभवतीतिअसिद्धत्वत
ज्ञानार्थंसामान्यलक्षणेतितन्नविशेषरूपावच्छेदेनसिद्धत्वेनज्ञातएवसामान्यरूपेणासिद्धत्वग्रहसंभवात
ज्ञानार्थंसामान्यलक्षणेतितन्नविशेषरूपावच्छेदेनसिद्धत्वेनज्ञातएवसामान्यरूपेणासिद्धत्वग्रहसंभवात् ॥ ॥
तदेकंज्ञानेज्ञानद्वयंवेत्यन्यदेततसामान्यलक्षणासहस्रुणाप्यसिद्धत्वस्यज्ञातुमशक्यत्वाच्च

वस्त्रमत्वसंभवेसप्रकारकप्रत्यक्षामात्रस्यैवभ्रमत्वापत्तेरन्यतोदोषविशेषाणामपिहेतुत्वंवाच्यंतथाचयत्रसिद्धत्वे
द्धत्वभ्रमजनकदोषाभावस्तत्रेच्छानस्यादतोःसिद्धत्वभ्रमोत्पादापसामान्यलक्षणावाच्येत्यत आह सामान्यल
क्षणेति सुखत्वसामान्यलक्षणायावस्त्रकगत्याःसिद्धसुखस्यसुखत्वेनज्ञानंभवतुनदसिद्धत्वज्ञानंतुकुतइति
भावःननुसामान्यलक्षणयासुखत्वेनोपस्थितेऽनागतसुखेसुखंवर्त्तमानप्रागभावप्रतियोगित्वमानकालावृ
त्तित्वेसत्यतीतकालावृत्तित्वादित्यनुमानादसिद्धत्वस्यग्रहमेवेत्यत आह॥ ॥ ॥ ॥

वस्कृतरति एतत्कालवृत्तिप्रागभावप्रतियोगित्वरूपस्य तत्कालप्रतियोगिकध्वंसाधिकरणक्षणोत्पत्तिकत्वरूपस्य वाऽसिद्धत्वस्य पक्षधर्मताबलात् सिद्धिसंपादनायायमिति अतीतसुखादेरपि वर्तमानध्वंसादिस्वरूपाभावप्रतियोगित्वादसिद्धत्वस्वरूपलाभायसाध्ये प्रागभावपर्यंतप्रागभावत्वमखंडोपाधिरतो नाननुगमः प्रागभावे मानाभावेत्याह सुखोत्पादेतिसिद्धसुखस्यापि स्वद्वितीयक्षणवृत्तिध्वंसप्रतियोगिप्रथमक्षणवृत्तित्वात् सिद्धत्वस्वरूपलाभो न स्यादतोऽस्येदृशत्वादेति अतीतसुखोत्पादाधिकरणस्थूलकालवृत्तिध्वंसप्रतियोगित्वमादायोदृश्यासिद्धिवारणाय कालपदं सेतरापरं न चोत्पत्तेः क्षणस्य च स्वत्वे घटितत्वादसिद्धं सुखोत्पत्तिक्षणसाधारणस्योत्पत्तित्वस्य नदधिकरणक्षणसाधारणस्य

वस्कृतस्य सामान्यलक्षणं विनापि अयं कालः सुखप्रागभाववान् सुखोत्पादकालीनध्वंसप्रतियोगी वा कालत्वादेतादृशकालवदित्यनुमानादसिद्धसुखस्य तदसिद्धत्वस्य च ज्ञानं सुलभमेवेति निपुणतरमुपपादयितुं पूर्वापि ध्यातेवेदं कालत्वस्यैकस्याभावेऽप्यसुखोत्पसुखोत्पादकालीनध्वंसप्रतियोगीत्यर्थः ॥ शब्दमणिदीधितावितिरूतं पल्लवितेन ॥ सिध्रद्विति वाच्यं स्वोत्पत्तिक्षणवृत्तित्वसंबंधेन कालिकतयास्वावच्छिन्नत्वसंबंधेन वा सुखविशिष्टो यो ध्वंसस्तत्प्रतियोगित्वस्यानुगतत्वादिति महाप्रलयाभ्युपगमेत्याह एतादृशेति इदानींतनत्वाद्यभावाधिकरणस्येत्यर्थः अंत्यापांत्यक्षणयोर्व्यभिचारवारणाय इदानींतनेतिनत्वनागतसुखप्रागभावव्यापकत्वाज्ञानात् कथं तदनुमितिरत आह निपुणतरमितिसुखप्रागभावत्वेन सिद्धसुखप्रागभावस्याव्यापकत्वज्ञानादसिद्धसुखमागभावस्यापि पक्षधर्मताबलादनुमितौ भानं समानप्रकारकत्वस्यानियामकत्वाच्च नातिप्रसंग इति भावः शब्दमणिदीधिताविति अनागतयाकानुमानप्रस्तावइ

ननु संशयत्वादिना घटत्वप्रकारकनिश्चयसत्त्वात् कथं घटत्वप्रकारकसंशयप्रत्यक्षमत आह संशयसमानाकारो हीति न केवलं प्रकारस्य समानत्वं किंतु प्रकारतापि अपितु चाभिमतिभावः कोटितावच्छेदकघटत्वेति घटो न वेति संशयेतादात्म्येनैव घटस्य कोटित्वाद् घटत्वं कोटितावच्छेदकमिति भावः तथा कोटितावच्छेदकघटत्वांशे निष्प्रकारकः तत्र प्रमेयत्वस्यैव घटत्वांशे प्रकारत्वादिति भावः अत एव समानप्रकारकनिश्चयस्यैव विरोधित्वादेव नन्वेवं तदंशे घटत्वप्रकारत्वाद् घटत्ववानिति निश्चयोऽपि न तादृशसंशयविरोधी स्यादत आह घटत्ववानिति तिवटान्यतासंदेहमिति तत्कोटिकसंदेहप्रतिरुद्धं घटान्यवृत्तित्वविशिष्टस्पर्शनेयथाविशेषदर्शनतया विघटः सरत्वादिसंशयसमानाकारो हि निश्चयस्तद्विरोधी घटो न वेति संशयस्य कोटितावच्छेदकघटत्वांशे निष्प्रकारकः न च प्रमेयवानिति प्रत्ययस्तथा अत एव ज्ञातिमानिश्चये यत्र घटेतरावृत्तित्वविशिष्टघटत्वमवगाहमानो घटान्यतासंदेहं विरु

यत्तु पाकादौ चिकीर्षोत्पत्त्यादौ विच्छानस्यात सिद्धेच्छाविरहात् असिद्धत्वस्यातानात् तस्मात्सुखत्वेन ज्ञातेषु सिद्धविहायासिद्धेच्छाभवतीत्युपेयमितितन्न असिद्धस्याज्ञानेऽपि सिद्धे चरज्ञानादेवेच्छाप्रवृत्तिस्वाभावात् असिद्धत्वेरूपपत्तेः न चातिप्रसंगः समानप्रकारकत्वेन तत्तेच्छाप्रवृत्तीनां कार्यकारणभावादिति न तु समानविषयत्वेनापि क्वचिदपि कल्पनात् समानाधिविषयत्वमन्यपि समानप्रकारकत्वाभावेनेच्छाप्रवृत्त्योरभावात् आवश्यकत्वाद्धोरवाच्येति परसिद्धांतात न च सद्धेतुत्वेन संशयो न स्यादिति दोषः घटः स इति घटत्वप्रकारकज्ञानं हि संशयविरोधि तच्च न तदा

वाऽङ्गुरुत्वादिविकल्पकोटानिश्चयत्वगुरुत्वमसंशयांसस्सामग्रीविरहादितिघटइतिनिश्चयप्रतिद्वंद्वत्वांशेनिविकल्पकरोधितथातद्धटत्वविशिष्टस्यापि दर्शनेऽप्याववर्तकधर्मदर्शनोऽविषयाविरोधीत्यनु ॥ ज्ञानकारणं जातित्वादिनाद्धटत्व ॥ भववलादास्थीपतइतिभावः यद्यपि तादात्म्येन घटकोटिकसंशयेऽपि घटेतरावृत्तित्वविशिष्टधर्मवत्ताज्ञानं व्याप्यदर्शनमेवे

तिनिश्चयेऽपिघटोनवेतिसंशयः घटत्ववानिश्चितेनि

घट इति निश्चयं प्रतीति निश्चयपदं ज्ञानसामान्यपरं निश्चयत्वस्य कार्यतानवच्छेदकत्वात् घट इत्याकारकसंशयेपि तादृशज्ञानस्य जन
कत्वात् ननु प्रमेयत्वसामान्यलक्षणयैव यावत्प्रमेयगोचरं निर्विकल्पकं जन्यतां तामत आह सामान्येति निश्चयेन नु प्रमेयत्वप्रका
रकप्रमेयप्रत्यक्षत्वापेक्षया प्रमेयप्रमेयप्रत्यक्षत्वस्य लघुत्वात्तदेव जन्यतावच्छेदकं तच्च निर्विकल्पकसाधारणमत आह विशिष्ट
ज्ञानेति प्रमेयत्वज्ञानस्यैव प्रत्यासत्तित्वाद्विशिष्टज्ञानसामग्रीसत्त्वादर्थवशसंपन्नमेव विशिष्टज्ञानमिति भावः यद्यपि घटो
नवेति संशयानुरोधेन घटत्वांशे निर्विकल्पकं ज्ञानमावश्यकं न च तादृशनिर्विकल्पकसत्त्वेपि दोषादेव घटः स्यादिति न ज्ञानमि
ज्ञानेपि तदनुदयात् सामान्यलक्षणायाश्च सामान्यप्रकारकत्वाजनकत्वनियमात् विशिष्टज्ञानसामग्रीसत्त्वात् इ
॥ इति सामान्यलक्षणारहस्यम्
स्वसामग्रीविरहाद्घटो घटत्वादिसकलविशेषज्ञानेपि स घटो न वेति संशयोभवत्येव ॥

समाप्तं सामान्यलक्षणारहस्यम् ॥

तिवाच्यम् घटत्वांशे निर्विकल्पकाभावान्न तादृशज्ञानमिति तस्यासंगतत्वापातात् तथापि यत्र प्रमेयवानिति सामान्यलक्ष
ऽनंतरक्षणे घटत्वांशे निर्विकल्पकमेककोटिकस्मरणं संशयजनकदोषा
णाजन्यनिर्णयोत्पत्तिकाले तादृशदोषाभावो ... घटत्वांशे निर्विक
ल्पोत्पत्तिश्च ततो घटो न वेति संशयः तत्र प्रमेयवानिति निर्णयस्य घट इत्याकारकसंशयो न स्यादित्यास्तेपि च घटत्वांशे निर्विक
ल्पकाभावात्तादृशनिर्णयस्य न घट इत्याकारकत्वमिति समाधानं सम्यगिति मंयतेम ॥ ॥ ॥

वस्तुतस्तु सामान्यलक्षणाव्यवस्थापकं प्रतिमोपहासमयमाक्षेपः सामान्यलक्षणया विम्बस्येव घटे तत्प्रकारकतादृ
शज्ञानसंभवात् आत्मत्वेन तादृशज्ञानवत्त्वस्याप्यगृहीतं तथा च सामान्यलक्षणाव्यवस्थापयितुत्वपरकीयज्ञान
विषयो घटो न वा यस्तादृशघटज्ञानवान्न वेति संशयो न स्यात् विशेषदर्शनस्य सत्त्वात् अत एव पूर्वपक्षे पर
कीयज्ञानविषयइत्युक्तम् सर्वस्य सामान्यलक्षणया घटत्वप्रकारकज्ञानसंभवेपि घटत्वांशेऽभ्रमप्रकारकतादृश
ज्ञानासंभवेनात्मत्वेन तादृशघटत्वप्रकारकज्ञानत्वव्याप्यमिति विशेषदर्शनाभावात्तादृशज्ञानस्य संशयोनानुपपन्न इ
ति सिद्धान्ततात्पर्यमिति तु वयं ब्रूमः ॥ ॥ इति श्रीभवानंदसिद्धांतवागीशभट्टाचार्यविरचितानुमानमणि
शिरोमणीयप्रकाशव्याख्यासमाप्तः ॥ ॥ संवत् १८२९ फाल्गुनकृष्णद्वादश्यां काशीस्थस्थाने प्रथमप्रहरे

415

अनुमान चिंतामणी.